
कविकुलगुरू - कालिदास - संस्कृत - विश्वविद्यालयः

प०मु०२
१

॥श्रीगणेशायनमः॥ ॥अथद्वितीयकांडेवर्गान्संगृह्णन्नाह वर्गाइत्यादि इहद्वितीयकांडे, गोर्भूरादि
भिरूपांगैश्च खिलादिभिः। पुरैरापणादिभिस्तेषां वृविपणपादिभिः सहवर्तमानैः पृथ्व्यादिभिःसंपा
दिताद्युपलक्षितावादशवर्गावक्ष्यमाणाः आदिकर्मणिक्तः आशंसायां भूतवच्चेतिवाक्तः। मृगशब्दः
पशुमात्रेपियद्वन्नृपतिपशवोपिमृगाइति अतोत्रसिंहस्यग्रहणं आदिशब्देनव्याघ्रादिग्रहइतिस्वा
मी। सर्वधरस्तुमृगशब्दः पशुमात्रवचनः आदिनापक्षिकीटादिग्रहः तस्यवांगोपांगानिपक्षि
मत्स्यादीनित्याह। कश्चित्तुमृगान्भुंक्तेशीलंयस्येतिमृगादीसिंहइत्याह॥ भूरित्यादि भवत्यस्यां
सर्वमितिभूः वहुलवचनादधिकरणेक्विप् जित्सुभ्रुवैभुवषष्ठीवहुवचनेभुवांभूनांडोभुवां
भुविहेभूः भूरितिरेफांताव्ययंचयथाद्योतयन्भूर्भुवः स्वरिति। भूवद्भुतपस्याभुवः किमिति
तिक्विन्भूमिः ऊर्मिश्च मिरम्मयइति मिरित्यन्येङी। विभूमीच। एवंधरणीक्षोणीअवनीच॥

एम
१

५२

नचलत्यचलाप्त्वादित्वादिच्॥ नास्त्यंतोस्याइत्यनंता। रसोस्यामस्तीतिअर्शआद्यच्विरस्यतआस्वाद्यत
इतिघञर्थेकेवारसा विश्वंविभर्तीतिविश्वंभरासंज्ञायांभृतृहृजीत्यादिनाखच्॥ एवंसर्वंसहावसुंधरयो
रपि। तिष्ठतीत्यजिरादित्वात्। किरचुस्थिरा। धरतिविश्वंधरापचाद्यच्॥ एवमत एवअमित्रादिभ्यइत्तोत्तौ
गौरादित्वात्ङीष्धरित्री। ध्रियंते प्राणिनोऽस्यांअशनिवरर्तिष्टष्टइत्यादिनाऽनिःधरणिः। गौरादित्वा
त्ङीषीधरणी। क्षौतिशब्दायतेक्षुवंजिवास्यांउक्षुशब्देवहिश्रिश्रुयुडुइत्यादिनावाहुलकात्रिःक्षो
णिः ङीषिक्षोणी। जिनंतिवयःपरिणामंलभंतेऽस्यांज्यावयोहानौभिदाघङ् संज्ञापूर्वकत्वान्नवहुल
वचनाद्वानसंप्रसारणंअम्मादित्वाद्यत्प्रत्ययेवाज्मा ज्या मौर्वी ज्या वसुंधरेतिशाश्वतादिज्येतिना
शंक्यं॥ भार्गवेणजित्वाकश्यपायदत्तेतिकश्यपस्येयंकाश्यपी॥ क्षियेतिवसंत्यस्यांक्षितिवासग
त्योः क्तिनिक्षितिः क्ष्मायंतितामितितुभट्टसर्वधरौ॥ सर्वंसहते पूःसर्वयोरितिखच् सर्वंसहा। वसुध

रा॰सु॰२

२

नंतद्योगात् वसुमती। वसुधनं त्रातइतिकः वसुधा। विस्तीर्णत्वादुर्वी वा तो गुणवचनादिति ङीष्। वसुध
रयतिपूर्ववत् खचुखविक्कस्वइतिकः स्वत्वेंवसुंधरा। गोत्राः शैलास्तद्योगात्दर्शआघञ् गांजलंत्रायतेवा
गोत्रा। कायतिकूयतेवाभितङ्क्वादित्वाडुः कुः। प्रथ ते विस्तारंयातिप्रथेः षिवन्संप्रसारणं चेतिषिवन्ता
दौङीषिच पृथिवी पृथुनावतारितत्वात् पृषोदरादित्वात्पृथिवीत्येके। पृथिवीत्तिवदेहिनी पृथिवीपृ
थ्वीधरित्रीधरणीधरेत्यारभ्य उर्वीकुः पृथिवीपारेति वाचस्पतिः। पृथ्वी त्सुर्वीवत्। न्हम तेभारंपचा
घञ् पृषोदरादित्वाद्कारलोपः वा बहुलकान्मनुदिलोपेन्हमेत्यन्येह्मा। एवंन्हमाच। अवतिप्रजाअम
तेनृपैर्वा अशनिवद्ध्वनिः। मेघतीतिमेदिनिःयस्यादिः। मधुकैटभयोरासीन्मेदसासंपरिप्लुता। तेने
यंमेदिनीदेवीप्रोच्यते ब्रह्मवादिभिरितिनिरुक्तं। अदंतान्मेदशद्वादतइनिठनौवात्हस्वाकल्पः इ
भिहरामलघ्नोमेदकुष्ठहेतिशालिहोत्रः पृषोदरादित्वात्सलोपइतितुस्वामी।

राम

२

मह्यंते भूतान्यस्यां मह्यते वा महपूजायां पुंसि संज्ञायामिति घः महणात् घः गौरादिङीषि मही महेर्वा हु
लकादवइर्महिः ङीषि तु मही तिस्वाम्याद्याः ‍चुरादावप्पर्द तोमहिस्तनोर्णग्यं नादवइरिति तु कौमुदी। वी विः
पंक्तिर्महिः केलिरित्याद्याः हस्वदीर्घयोरिति वाचस्पतिः। रत्नगर्भासागरांवरास्त्रब्धिमेखला रत्नवती वि
पुलामध्यमलोकमर्त्यीदयोप्यत्र समप्रविंशतिः पृथिव्याः॥ मृदिति मृदत्तोदेर्मृद्यतइति मृत्संपदादिः।
स्वार्थे मृदस्तिकन् मृत्तिका द्वे मृत्तिकाद्वे मृत्तिकायाः॥ प्रशस्तासर्वसस्योत्पत्तियोग्यामृत्स्नात्स
प्रशंसायां मिति सस्नपोः मृत्सा मृत्स्ना च द्वे प्रशस्तमृत्तिकायाः॥ सर्वशस्यसमृद्धामृत् उर्वेति हिनस्ति
सर्वदुःखं उर्वी हिंसायां वा हुलकादरन् खुरून्महतो वृणोतीति वा पृषोदरादिः उर्वरा उर्वेतिरन्हातिउ
रुमियर्त्ति वेति भट्टः एकं सर्वशस्योत्पत्तिमत्या भूमेः॥ ऊषरुजायां कर्मणि घञ् ऊषः दीर्घादि रदंतः
इगुपधेति केवा। ऊषारयतेसस्यानि अबन्तारा तत्कर्मधारयः एकं लवणमृत्तिकायाः॥ युषशब्दा

न्मनु पुरुषवानूरुषस्तुषीतिरूषरः द्वावप्येतौ विशेष्यलिंगौ द्वे असारभूमिभागस्य। स्थल स्थाने
स्थल्यते स्थीयते ऽत्रेत्यधिकरणे घञर्थे कविधानमिति कः स्थलं न्यासकृता तु कपिष्ठलो गोत्र इत्य
त्रपवादाज्जिन्यत्तुक्तः स तु व्युत्पत्तिमात्रमिति स्वामी। स्थलयति स्थलं स्थल संवरणे ऽच् स्त्रियां तु।
स्थली भवति अकृत्रिमा चेदिति जानपदेत्यादिना ङीष् स्थली कृत्रिमे तु गवे वस्थलेति द्वे स्थलभू
मेः। सेति म्रियंते दूरात् प्राणिनो ऽत्रेति भृमृशीङ्त्वरित तिध निलाधिमस्तिभ्य उः मरुः। धवि गत्यर्थः
सौत्रो धातुः धन्व्यते गम्यते स्थानांतरमस्मात् कनिन् युवृषितक्षिराजिधन्वीत्यादिना कनिन् धन्वा
द्वे निर्जलदेशस्य॥ खं शून्यं लाति खिलं पृषोदरादित्वात् खिल्यते उंछ्यते खिल उंछे घञर्थे क इति वा
न प्रहतं हलादिभिरकृष्टमप्रहतं एते द्वे समे समार्थे त्रिषु लिंगत्रये स्त्रियां खिला ऽप्रहता द्वे हला
दिना ऽकृष्टभूमेः॥ पुनः पुनर्हलेन हन्यते यो गच्छति जगत् पृषत्बृहन्महज्जगच्छतृवदिति गमेर

तिप्रत्ययो हित्वं टिलोपश्च निपात्यते शतृवदित्यतिदेशात् उगितश्चेति ङीप् जगती। लोकं ते पश्यंत्यत्र लो
क्यते वा हलश्चेति घञ् लोकः। पिष्टपं भुवनं वष्टपाद्युक्तं पिष्टपः पुंलिंगोपि भुवने पिष्टपः पुमानिति वोपा
लितात् जगदुक्तमेव एकं महाभूतं पृथ्वी पंचमहाभूतविषयेंद्रियात्मकं तु जगदिति पृथ्वी जगतोर्भेदः
पंच जगतः। लोकोयमिति त्रयं लोको जंबुद्वीपाख्यो यत्रैतत्ग्रंथकारादयः स्थितास्तद्भारतं वर्षं वने
प्रव्रजता किल ऋषभनाम्ना नृपेण जंबुद्वीपोयं खंडशो भुत्वा दितः तत्रा … स्मदादिगोचरखंडं भ
रतनाम्ने पुत्राय दत्तमिति भरतस्येदं भारतं॥ भरताय यतः पित्रा दत्तं प्रव्रजिता वनं तेनेदं भारतं व
र्षं प्रोच्यते ब्रह्मवादिभिरिति आदिपुराणे नयः॥ भारतादीनि वर्षाणि जंबुद्वीपे नव क्रमादिति वाचस्प
तिः। महर्षिव्यासचरिते जंबुद्वीपे च भारतमिति रभसः। वर्षं प्रथिव्यंश इति स्वामी दृश्यते सिध्यते
न्त्यपेक्षरे शइति भट्टः पुंनपुंसकयोर्वर्षं जंबुद्वीपाद्यद्वशिष्टिरिति रुद्रः। वर्षं स्थानं वि डुः प्राज्ञाद्यं लो

रा॰मु॰२
४

कंचभारतमितिभारविः॥ अतएवसामान्यविशेषभावाज्जंबुद्वीपेतदेकदेशेचभारतप्रयोगः प्रकरणादिभि
स्कृतरवगमः यथाएषइरगुरुभारतंवर्षमध्यममवर्त्ततेवशइतिमाघः तथा एतेनभारतमित्याहतवद्विभा
तीतिच। अन्यान्यपिवर्षाणियथास्याद्भारतंकिंपुरुषंहरिवर्षंचदक्षिणाः। रम्यंहिरन्मयकुरुसुमेरोरु
त्तरास्त्रयः॥ भद्राश्वकेतुमालौतुद्वौवर्षौपूर्वपश्चिमौ॥ इलावृतंतुमध्यस्थं सुमेरुर्यत्रतिष्ठतीतिवा
चस्पतिः अन्यच्चउत्तरंयत्समुद्रस्यहिमाद्रेश्चैवदक्षिणं॥ वर्षंतद्भारतंनामभारतीयत्रसंततिरिति। व
र्षः पुंल्लिंगोपिवर्षो॰ स्त्रीभारतंद्वीचजंबुद्वीपाद्दृष्टिच्छितिमेदिनेर्लिखितरुद्राक्ष॥ शेतिअस्मिन्भा
रतेवर्षेशरावतीनामनदीऐशान्यादिशः सकाशात्नैर्ऋत्यादिशापश्चिमाभिगामिनीतामवधिं
कृत्वायः प्राक्पूर्वोदेशः तत्सहचरितोयोदक्षिणोदेशः सप्राच्यः साहचर्यादक्षिणोपिप्राग्व्यव
हारः युप्रागवागुदक्प्रतीचोयत् एकं। तामेवावधिंकृत्वापश्चिमसहचरितउत्तरोदेशउदीच्यः।

राम
४

साहचर्यात्पश्चिमे प्युदग्व्यवहारः पूर्ववत्पत् एकं॥ प्रेति भारतवर्षस्य प्रतिगतोऽ तं प्रत्यंतः शिष्टाचारर
हितः कामरूपवंगादिर्म्लेच्छः उक्तंच चातुर्वर्ण्यव्यवस्थानं यस्मिन् देशेन विद्यते। तन्म्लेच्छविषयं प्राहु
रार्यावर्त्तमतः परमिति॥ हे॥ मेति उक्तावधेरिवयोर्मध्योदेशः समध्यमः॥ हिमवद्विंध्ययोर्मध्ये यत्प्रा
ग्विनशनादपि। प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्त्तित इति मनुः विनशनं तीर्थभेदः मध्येभवो म
ध्यमः मध्यान्मः हेमध्यदेशस्य॥ आर्याः साधवो वर्त्तंते ऽत्रेति आर्यावर्त्तः हलश्चेति घञ् अन्येषामपी
ति दीर्घः। पुण्यस्य भूमिः पुण्या वा भूमिः आसमुद्रात्तु वै पूर्वादासमुद्राच्च पश्चिमात्। तयोरेवांतरं गि
र्योरार्यावर्त्तं विदुर्बुधा इति मनुः नि स्रु ‾ दिपूर्वसमुद्रावधेरार्यावर्त्तस्तदा गंगायाः पूर्वकूलमि
तिस्यात् नैवं पूर्वं किल देवीकोट्टसमीपे पश्चिमे पूर्वोदधिरासीत्तमयेन्मोक्त मिति स्वामी हे विंध्य
हिमालयावधिकमध्यदेशस्य॥ नीति नियमेनावश्यतया नियतं वा वर्त्तते वसंति जना अत्रेति पुं

सिवा कुलकात्संपरादित्वादन्येभ्योदि दृश्यत इतिवाऽधिकरणे किं पुनर्हि हतीत्यादिना दीर्घः त्रीहृत्
हंद्वाकरणात्रीहृत् [illegible] स्त्रीत्येकेसा इचर्यात पुंस्त्वमित्यपरे। जनैः पद्यते गम्यते चेति पुंसीति घः
जनपदः जनानांपदं स्थानं स्थितिरत्रेति वा हे अंगवंगकलिंगपंचालादे जन निवासस्थानस्य।
दिश्यतेऽत्रेति हलश्चेति घञ् देशः दिश्यते देश इति भट्टः। विषीयंते त्रेत्ये [illegible] रद्रु विषयः विसिनो
तीति भट्टः। उपवर्तते त्रेत्युपवर्त्तनं क्लुद्र। त्रीणि जनपदस्य तत् समुदायस्य तदेकदेशस्य चेति
जानरूपः सजननिर्जनमात्रस्येति तु पंजिका उपाधिभेदेन देशात्रिकं भिन्नार्थं सामान्ये न प्रयो
गदर्श नात्रीहृदादयः पंचैवैकार्था इत्यपरे एतच्चायुक्तं मध्येत्वं तत्वात्। त्रीणि तो घशाद्द पर्यंत
वक्ष्यमाणा स्त्रिषु मर्यादायामाङ्‌ अभिविधावित्यन्ये तथा च एन्हिष्टपुंभिः प्रविताः सगोष्ठा
नितिभट्टिः॥ नडोनलः प्रायशाद्वो बाहुल्येन डानांप्रायोवा हुल्यं यत्र देशो स नद्वान् कुमुदन

डवेतसेभ्योड्मतुप् झयइतिवत्वं एवं नड्वलः नडशादाड्ड्वलच् टिलोपः । द्वे नडबहुलदेशस्य । एवं
कुमुद्वान् कुमुदबहुलदेशस्य ॥ एवं वेतस्वानिति वेतसलताबहुलदेशस्य ॥ शेतिशाड्डशातने द्वलादि
त्वात्स्यः शाद्वल इति सर्वधरः ॥ श्रीयंते चेति तु भट्टः शादो जंबालशष्पयोरिति वचनात् शष्पं नवतृणं शादे
हरिते देशे शाद्वलः नड्वलवत् ड्वलच् सवशष्पवाचिन एव तान्यतोऽनभिधानादिति सर्वानंदः द्वे नव
तृणबहुलदेशस्य ॥ तदस्मिन्नस्तीति करणाद्वा बहुल्ये सर्वत्र प्रत्ययाः अत एव प्राय इति वक्ष्यतीति वो
क्तं । जंबालः पंकस्तत् सहिते देशे पिच्छादित्वान्मत्वर्थीय इलच् पंकिलः कर्दमयुक्तदेशस्यैकं ॥
जलप्रायं जलबहुलं अनुगता आपो यत्रेति ऋक्पूरित्यादिना अः समासांतः ऊदनोर्देश इत्यनोरू
त्वं अनूपं द्वे जलबहुलदेशस्य ॥ तथाविधो जलप्रायो नद्यादेरुपांतो देशः । कं जलं छ्यति परिच्छि
नत्ति कप्रत्यये कच्छः के न जलेन छाद्यते कच्छे रनित्य एयं ताहन्येभ्योपीति डे पूर्वस्य तु कि कच्छ इ

तिवा। पुंसीति त्रिष्विति वाधनार्थं अन्ये तु प्रायेण पुंस्त्वसूचनाय पुंसीत्युक्तमित्याहुः तथाच अनूपः
प्रायकच्छमिति रत्नमाला कच्छमनूपमिति वोपालितः स्त्रियां कच्छेत्यपीत्यप्रमाणमिति पंजिका
एकं॥ स्त्री शर्करेति सिकताशर्कराभ्यां चेत्यण् शार्करः सर्वत्राणप्रकरणे ऽन्यतरस्यां ग्रहणान्म
तुप् च। शर्करावानिति सामान्येन द्वे रूपे देशे तु वाच्ये देशे लुबिलचौ वेति सिकताशर्कराभ्यां विहित
योः पक्षे लुबिलचू प्रत्ययस्तेन देश एव द्वे रूपे शर्करा शर्करिल इति एवं च देशे शर्करा शर्करिलः शा
र्करः शर्करावानिति रूपचतुष्कं एवं सिकता शब्दस्यापि सिकता सिकतिलः सैकतः सिकतावानि
ति अदेशे तु सैकतो घटः शार्करं मधु सिकतावान् शर्करावानिति जयादित्यः। लुपि युक्तवद्भावा
त्स्त्रीत्वबहुत्वे सिकता देशः शर्करा देश इति तु हट्टचन्द्र न्यास इति सर्वधरः तथा च लुपि युक्तवदिति
सूत्रे लिंगं स्त्रीत्वं तद्वचनं च बहुवचनं भवतीति देशे लुबिलचावित्यत्र मैत्रेयः बहवश्च समाः सिकता

इतिवामनोक्तेर्लुप्यधिसिकताइतिबहुवचनांतंग्रंथकृत्तुशर्करामेकवचनांतामाहतच्चिंत्यं।आदिमोशर्क
राशर्करिलोएवंसिकतासिकतिलौआद्योभवआदिमःमध्यान्मइत्यत्रआदेश्चेतिवक्तव्यमितिमःएवं
उक्तप्रकारेणउन्नेयाऊहनीयाःआद्याश्चत्वारोऽभिकटीवहुलदेशस्यतत्रांन्यौद्वावन्यस्यापितद्युक्त
स्यसिकताद्यास्त्कवाद्युकावहुलदेशस्य॥देशइतिनद्यंबुभिःसंपन्नैर्जातैःसस्यैर्देवीव्रीहिभिःपालि
तोदेशोनदीमातास्येतिनदीमातृकःएवंवृष्ट्यंबुसंपन्नैर्व्रीहिभिःपालितोदेशोदेवोमेघोमातास्ये
तिदेवमातृकःदेवोमेघस्तुदेशाश्रीतिमेदिनिःमातेवमातानष्टृतश्चेतिकप्रद्वयोरुक्तार्थयोःक्र
मेणैकैकं।स्वधर्मपरत्वात्शोभनोराजायत्रदेशेनपृजनादितिटचोऽभावःसुराज्ञीति।प्रशं
सायांमतुपिराजन्वान्राजन्वान्सौराज्येइतिनिपातनान्नलोपाभावःदेशोलोकोपलक्षणंसुरा
ज्ञिलोकइत्यर्थःएकंस्वधर्मपरराजयुक्तदेशस्य।अन्यत्रराजमात्रयुक्तदेशेराजवानेकं॥ग वि

तिगावस्तिषंत्यत्रेतिघञर्थेकः अंवांवेत्यादिनाषत्वं। गवांस्थानंगोस्थानकंस्वार्थेकः हेगवांस्थानस्यान
तत्पुनर्गोस्थानकंयत्रगावआसन्ताद्दशंसतगोष्ठात्खञ्भूतपूर्वेइतिखञिगौष्ठीनं एकं॥ परितः स
रंत्यत्रेतिपुंसीतिघः परिसरः हेनदीनगरपर्वताद्युपांतभूमेः॥ स्त्रियांवर्त्मनाध्वनिमार्गः पुमा
चस्पादित्यन्वयः। आर्यतेऽनयेत्यर्त्तेराङ्पूर्वाद्दचरः कपिरिकादिः ङीषित्वालीचइन्नादिभ्यइती
जितितुस्वामी आलीयतेंऽभोऽत्रेतितुभट्टः। सिन्वंतिवंभ्रंत्येतमितिसितनीत्यादिनातुः सेतुः हे
आलेः। वेतिवामैर्लूयतेलूञ्छेदनेखजिपिंजादिभ्यः ऊरोलवाविन्सूरः वामलूरः वम्यतेउद्दीर्यत
इदमितिवामः कीटाद्युत्स्यापितामृत्कर्मणिघञ्लवनंलूञ्छेदः वामस्यलूर्वामलूंतांरातिआतद्
तिकेवा। नश्वकतिगच्छतिवाकुल्पाकुः नम्यतेखर्वतांप्राप्यतेभूभागोनेनेतिवाणमुख्यद्कृत्वेशाद्दफलि
पाटिनमिमनिजनांगुकूपटिना किंधतस्त्रेत्युः नाक्यादेशः इकारउच्चारणार्थः नाकुः वामलूरसा

हवयीतूनाकुः पुंसि। वलंते प्राणिनोत्रेति वल्मीकः अलीकादयश्चेति निपातितः ञी एयुधिकाल्कृत मृ
त्तिकास्तूपस्य॥ अयंते नेनेति ल्युटि अयनं ईयते ऽनेनेति स्वामी। हलंत इति वर्त्म नू वर्त्म कांतारो वर्त्म दुर्ग
ममित्युक्तेः क्लीवत्वं। पथिकपा दैर्मृज्यते विवरणी क्रियते ऽसाविति मार्गः मार्ग्यते वा मृग्यते ऽनेनेति वा
। अत्निवलं पथिकानां अत्यते सततं गम्यते ऽनेनेति वा अदेरमे वीर्घश्चेति क्तं विपृथश्चांतादेशः अध्वा
। पथ्यंते ऽनेनेति पथे गतौ पथिमथिभ्यामिति रितीनिः पंथाः पतंत्यनेनेति वा गमेरिति रित्यनु वर्त्म
नेपतेस्थश्चेतीनिप्रत्ययस्यांतादेशश्च। वाटः पथश्च मार्गश्चेति त्रिकांडशेषात् पथो ऽद्दंतोपि। प
दमवतिपदं वास्त्यत्रेति वप्रकरणे ऽन्येभ्योपीतिवः उभयत्र गौरादित्वात् ङीष् पदवी पदेः पथ्यटि
भ्याम विरित्यविः पदविः ततः कृदिकारादिति ङीष् पदवीति पंजिका। पदस्य विः पत्नीरणी पदविः
कृदिकारादिति ङीत्तु पदवीति सर्वधरः॥ सरंत्यनयेति क्तिन् सृतिः। एवं सरणिः धरणिवदत्निः ङीष्

पि

सरणी च सरणिः श्रेणिवर्त्मनोरिति रन्त्यादौ रभसः। सृ हिंसायां ततः शरणिरित्येके तथा च सुभं सुभे
पदीष्विव शरणिः पथि चाऽवल्ली विततावलम्बा इत्यजयः स्मृतिसाहचर्यात् स्त्रीत्वमस्य एतत्साह
चर्यात् पद्धतेः पद्यासाहचर्याद्वा॥ पद्भ्यां हन्यत इति हन्तेः क्तिन् हिमकाषिहतिषु चेति पद्भावः म
येहोऽन्यतरस्यामिति धत्वं पद्धतिः। पादाय हिता वितरणत्वात् शरीरावयवाद्यत् पदमस्मिन् दृश्यमिति
वा यत् पद्यत्यतदर्थ इति पदादेशः। पद्यते गम्यते वा ण्यत् संज्ञापूर्वकत्वात् वृद्ध्यभावः। वर्त्तते ऽनयेति
वृतेश्चेत्यनिः वर्त्तनिः चकारान्मुड् चेत्येके तेन वर्त्मनिरिति चेन्मुग्धानलदत्तः तथा च वृत्तिकामदहन्नौ
वर्त्मनि राशिवितर्दिपुरंध्रीत्युक्तं कृदिकारादिङी षु वर्त्तनी। एकोऽसहायः पादोऽस्यामित्येकपदी
गन्तॄणामविरलपादत्वादेकोऽभिन्नः पादोऽस्यामित्येकपदी कुंभपदीषु चेति निपातिता द्वादश प
थः॥ अतीति अति पंथाः सुपंथा इति स्वती पूजायां कुगतिप्रादय इति समासः न पूजनादित्यत्र।

स्वतिग्रहणात् ऋक्पूरब्धूरित्यादिना प्राप्तस्य समासांतस्य निषेधः। संख्यासोपथ्या अश्चेति सत्पथः स्व

तिग्रहणादन्यत्रानिषेधात् समासांत एव त्रीणि शोभनपथस्य। विरुद्धोऽध्वा अपथः उपसर्गादध्वन इत्यच्।

समासांतः। दुर्निन्दितोऽध्वा दुरध्वः। एवं विरुद्धः पंथा विपथः ऋक्पूरित्यादिना ऽकारः समासांतः कुत्सि

तोऽध्वा कदध्वा। एवं कापथः कोः कत् तत्पुरुषेऽचि का पथ्यक्षयोश्चेति कोः कत् कादेशौ अतिपंथा

इत्यादौ पथः संख्याव्ययादेरिति नक्लीवत्वं संख्यादिपथशब्देनाभिचारि समासांतेन साहचर्यादव्

ययादिपथशब्दस्यापि कृतसमासांतस्यैव ग्रहणात् एवं च विपथः कापथ इति पुंलिंगपाठः स्वामा

दिकः तथा च संख्याव्ययादेरित्यत्र विपथमेवोदाहृतं संख्याव्ययपूर्वकश्च पथ इति वामनेनापि

क्लीवत्वमुक्तमिति स्वाम्यादयः। अन्ये तु लिंगमशिष्यं लोकाश्रयत्वादिति समादधते वयं तु पथः

संख्याव्ययादेरित्यत्र कृतसमासांतस्य पथरूपस्य ग्रहणात् पथते ऽध्वा प्नोतीति पथ्ये गतावित्यु

स्यपवाघर्जंतपथशद्बेनसमासेपुंस्त्वमेवाचन्नमहे· तथाचत्रिकांडशेषः· वाटःपथश्चमार्गश्चेति·
अतएवसत्पथस्तुसुपंथाःस्यादध्वाविपथकापथाविति रभसेपुंस्त्वं। पवाद्यर्जंतपथशब्देन।
कुपथोपीतिपंचनिर्दिष्टतपथस्या अपंथाइतिनपंथा अपंथाः पथोविभाषेत्यत्रविकल्पः अवि अ
पथंनपुंसकमितिक्लीवत्वंमार्गएवयोनभवतितस्यहे॥ शृंगग्राधान्यसान्वोश्चेतिनान्यर्थवन्न
तिशृंगंप्राधान्यमटतीतिकर्मण्यण्शृंगाटकंस्वार्थेकः शृंगेनाटंत्यत्रेतिभट्टः। चतुर्णांपथां।
समाहारः चतुष्पथंपूर्ववदच् ईदुडुपधस्येतिषत्वंपथः संख्याव्ययादेरितिक्लीवत्वंद्वेचतुष्पथ
स्य॥ दूरंशून्योदूरशून्यइतिसुपसुपेतिसमासः दूरश्चासौशून्यश्चेतिदूरशून्यः छायातरुज।
लादिवर्जितोऽध्वेतिपंजिका। ईदृगध्वाप्रहृष्टमंतरंव्यवधानमवकाशोवायामयोरत्रेतिप्रां
तरं एकंयानइतिख्यातस्य। चौरकंटकादिभिर्दुर्गमः पंथाः कांश्चिन्नतारयतीतिकांतारःक्वे

त्वादि॰

दरादीति सुभूतिः कस्य जलस्य सुखस्य वा ऽतं नाशमियर्त्ति कांतार इति कर्मण्यणिति तु भट्टाहिः क्लीबेपि कां
तारं । कांतारं पुंनपुंसकमित्यनेकार्थवन्हस्पते कांतारश्चांतरे तुल्यार्थे इत्येक इति भट्टः एकं चौराद्युपद्रुतस्य
पथः ।गेति ऊति यूतिर्ति ति यूतिशब्दः साधुः गोर्यूतौ छंदस्यध्वपरिमाणे चेत्यवादेशे गव्यूतिः पुंसि स्त्रियां
वंधन्वंतरसहस्रं तु क्रोशः क्रोशद्वयं पुनः । गव्यूतं स्त्री तु गव्यूतिर्गोरुतं गोमतं च तद्धि ति वाचस्पतिः
धनुर्हस्तचतुष्टयमित्युक्ताहाभ्यां धनुःसहस्राभ्यां गव्यूतिः पुंसि भावित इति शब्दार्णवः । क्रोश
योर्युगं क्रोशयुगं हे क्रोशद्वयस्य । किष्कुर्हस्ते वितस्तौ चेत्यनेकार्थवन्हस्ते किष्कुरत्न हस्तः तेषां च
तुःशती नल्वः नलबंधने उल्वादित्वाद्वः कात्योनल्वो विंशं हस्तशतमित्याह एकं चतुःशतहस्त
प्रमाणस्थानस्य । दशधन्वंतरो राजमार्गो घंटापथः स्मृत इति चाणक्यः घंटोपलक्षित हस्त्याद्य
संबाधगतिर्मार्गो घंटापथः पूर्ववदकारसमासांतः । सम्यक् संध्यवासरं त्यजाने नेति वाल्यु

इ संसरणं द्वे सामान्येन राजपथमात्रस्य। तत् संसरणं पुरस्य चेद्भवति तदा उपनिष्करं इति आधिक्ये
न निस्सरंति सैन्यान्यत्रेति ञ्सदेरप् उपनिष्करं किष्कुश्वपारस्करादीन्यस्य नुर्घटाप घः संसरणं ए
व पुरस्येति दुर्गं पुरस्येति स्वामिसर्वधराद्याः। बुधैः संसरणं वर्त्म गजादीनामसंकुलं। पुरस्योप(
स्करं चोक्तमिति भुग्नः। अंगोपांगापेक्षया भूमिरत्र प्रधानं प्रधाने न च व्यपदेशा भवंतीति भूमिवर्ग
इत्युक्तं एवमन्यत्रापि मंतव्यं॥ ॥इति भूमिवर्गविवरणं॥ ॥पूरिति पिपर्ति पूरयति वा स
र्वकौतुकं इष्टपालने भ्राजभासेति क्विप् उदोष्ठ्यपूर्वस्येत्युत्वं हलि चेति दीर्घः पूः पुरौ पुरः अस्मादेव
धातोः कृदोरप् पूर्वं विप्रतिषेधेन गुणादुत्वं गौरादित्वात् ङीष् पुरी इति सर्वधरः पूर्यते त्रेति पु
रं सुरवगमनेघञर्थे कस्तनो गौरादि ङीषि पुरीति स्वामी नगा इव नगाः गजाः प्रासादादयो वा
नि संत्यत्रेति रवसुरवनगपांसुपांडुभ्यो र इति रः स्त्रियां गौरादि ङीष् नगरी। वा शब्दात् पत्तनेऽप्यत्र

नसाहर्येणपुरंनगरमित्युत्तरत्रोक्तेश्चक्लीवत्वमेवेतिनिश्चयः क्लृग्ठइत्यादिनाइप्रत्ययेपुरिरिकारांतोपिसर्वध
रः। नाना दिग्भ्यः पतंतिवणिजोत्रेतिविपतिभ्यांतरनन्पन्ननंपतनंपत्‌गतिस्तनोतीतितनंअत्रपतस्तनंप
त्तनमितिवा। तद्वैपन्ननंतत्रपट्टनंपुटभेदनमितिवाचस्पतिः तत्रपटेर्वाहुलकात्तनन्‌ पण्पानांपुटाभिद्यंते
त्रेतित्युद्भेदनंपुटानिपण्यागाराणिभिद्यंतेत्रेतितुमहः पुटैर्विशिष्टगृहप्रकोष्ठादिभिर्भिद्यते विशेष्य
तइतिपुटभेदनमितितुपंजिका। स्थितिः स्थानंतस्मैहितंप्राक्रीताच्छः स्थानीयंराजादिभिः स्थीयतेत्रे
तिक्तत्यन्युटोवहुलमित्यधिकरणेऽनीयइतितुपंजिका। नियतंगच्छंतिवणिजोत्रेतिगोचरेत्यादिना
निपातनान्निगमः यहहहनिश्चिगमश्चेत्यादिनाऽधिकरणेऽविति तुसर्वधरः केचित्तुत्रननगरपत्तन
स्थानीयानांभेदमाहुः अष्टशतग्रामीयाणांमवहारस्थानंपुरंतत्रप्रधानभूतंनगरंयत्रराजातत्
परिवारकाश्चतिष्ठंतितत्पत्ननंदुर्गनगरंयोजनविस्तीर्णंप्राकादिवेष्टितंस्थानीयमिति जातरूप

ः॥ सोमनंदीत्वेर्वनगरलक्षणमाह देवेतायैर्नेश्चित्रैः प्रासादापणवेश्मभिः। नगरं दर्शये द्विद्वात्रा ज
मार्गैश्च शोभनैरित्यर्थशास्त्रमिति अधिष्ठानं कटकको दृ राजधान्यादयोप्यत्रैव सन्नगरस्य। मू
ल० नगरे॰ संमानोज्जनौ घस्यावस्थानार्थं मूलनगरसन्निधौयदन्यत्पुरं नगरांतरं क्रियतेतन्मू
लनगरस्यनरुस्थानीयस्यशाखेवशाखानगरं अभिस्यंदिवमनमप्यत्रैवरकं। वेशइतिविशतिमू
नांमनः कास्तुकोवानेति विशप्रवेशनेहलश्चेति घञ्वेशः। नेपथ्येमृगमात्रेच वेशोवेश्यागृहे
पिवेतिनालभ्योनेरभसः। वेविषतिव्याप्नुमिच्छंतिजनमनांसीमं पूर्ववत्घञिवेषोमूर्द्धन्यांतो
पीतिपंजिकास्वामी चतन्नुनद्रुघंमूर्द्धन्यांतेषु सर्वत्रकोषादावनुपात्नत्वात्गृहमात्रेगणिका
याः सद्म निवेशोभवेत्तुतालव्यः। तालव्योमूर्द्धन्योडलंकरणेकथितआचार्यैरित्यूष्मविवेकाद्व
। विश्याजनस्यसमाश्रयः आश्रयोवासस्य।नंवेश्याजनसमाश्रयः द्वेदारिकाणां निवासस्था

नस्य। आसमंतात्पणायंते क्रयविक्रयव्यवहारं कुर्वंत्यत्रेत्यापणः गोचरसंचरेत्यादिना साधुः। निषीदंति क्रयविक्रयाय जना अस्यामिति निषद्या संज्ञायां समजेत्यादिना क्यप् सदेरप्रतेरिति षत्वं हट्टवणिक्पथ क्रियारोहपण्याजिरादिकमप्यत्र हट्टे हट्टस्य। विपणंतेऽस्यामिति वा हुलकादृचकः विपणिः पूर्वोत्तरसो हवयोः तत्स्त्री कृदिकारादिति ङीषि विपणी च। पण्यानां विक्रेतव्यवस्तूनां वीथी गृहद्वारपिंडिका स्वार्थे कन् पण्यवीथिका द्वे विक्रयार्थप्रसारितनानाद्रव्याया वाणि आविहीतिख्यातायाः चत्वार्यं वहट्टस्येत्यन्ये। आद्यो वणिक्स्थाने अंत्यौ हट्टवर्तिन्यामिति तु भट्टः तथा च शाश्वतः आपणः पण्यवीथी च द्वयं वीथीति संज्ञितमिति। आपणः पण्यवीथ्यां च पण्ये च विपणिः स्त्रियामिति रभसः। पर्यायतत्क्रयिकलोकमगण्यपण्यपूर्णापणां विपणिनो विपणिं विभेजुरिति माघे आपणिरावारिका विपणि हट्ट इति वल्लभेन व्याख्यातं

अतएवप्रयोगा ह्विपणेः पुंस्त्वमपीति तु सर्वधरः। रथ्येति रथं वहति रथ्या नद्ह ति रथयुगेत्यादिनाय
वहितार्थे खलयवमाषेत्यत्र चकाराद्यदिति तु स्वामी प्रतोलयं त्यस्यामिति प्रतोलयति परिच्छेद
यति परात्मीयानिति वा एयंता तुलपरिच्छेदने इत्यतएरङ्गौरादिः प्रतोली। विशाखंते प्रकाश्यं
तेइमाएयस्यामिति शीङः किद्रुरवश्चेति खल् विशाखा विगतशाखास्मुंदिते वजनसंमर्दात् विशि
खेति तु भद्दः। श्रीणिलाक्कइति ख्यातस्य। केचित्तु विपएयादीन् पंचैकार्थानाहुः तथा च कौटिल्यः
विशिखायां सौवर्णिकप्रचार इति तु भद्दः। चेति चीयत इति चिञः कर्मण्येरच्चयः उप्यते प्राका
रोत्रेति वप्रं इवत्तवपिहृषिभ्योऽरन्निति स्वामी हे दुर्गनगरे परिखायाउद्धृतमृत्तिकास्तूपस्य
त्रिंशद्धस्तप्रमाणस्य मूलवंधस्य यस्योपरि प्राकारो भवति तस्य तथा चार्थशास्त्रे खातादुद्धृ
तपांशुना वप्रं कारयेत् तस्योपरि प्राकारमिति तथा च धरणिः चयश्चावरणे हर्म्ये प्राकारमूल

वंधनमिति॥ प्रेतिप्रथमं क्रियत इति प्राकारः सा इकारयोः क्षान्तिम इति दीर्घः ध्रियते वेष्ट्यते नेनेति वर
णः करणे ल्युट्। सलगतौ करणे घञ् सालोऽयं त्यादिः सालो वरणस ऽजेयोऽप्रतिरभसः स्यतिपर्यंतं कु
रोतीति साल इति सुभद्रः। शलगतौ ततो घञि तालव्यादिश्च तथा च तालव्योन्त्यपफषयोः शालो हन्ते
हन्तौ डुमेहेव। तालव्य ऽयं त्य उक्तास्तयास्त्रियां हन्त्यशाखायामित्यूष्मविवेकः। श्रीणिपगार इति ख्या

गं०४

तस्य। प्रागेव प्राचीनं विभाषां वेरहिक्षस्त्रियामिति खः प्राचीनमित्येक इति भट्टः प्राचीरमिति तु
प्रत्याङः पूर्वाद्विनोतेः सुपि विमीँ दीर्घश्चेति क्रन् दीर्घयोः प्राचीरमेवेति पंजिकादयः। प्रातन इति
सप्तम्यास्तसिः ध्रियते नयेति ष्टतिरित्यपि नामेति भट्टः। अन्ये तु हृतिर्वेष्टनमित्याहुः एकं तु
गे नगरादेः प्रांतभागे वेणुकंटकवेत्रादिमय्यावेष्टनिकायाः। मृत्तिकादिमय्यास्तूपचारादिति
स्वाम्यादयः। भिद्यत इति भित्तिः भिदाविदारणा इत्यङो विधानादन्यत्र क्तिन् भित्तिः। कौतीति कु

शद्वेवा हुलकात्तद्ध्वनूटर्वगत्तनीयवत्कुड्यमितिसर्वधरादयः। कवतेर्यन्नुडश्च निवानेवेतिय
तिउडागमेच कुड्यमितिवामनः। कुध्यंसा धुस्तवसाधुरितियत्तष्टषोदरादित्वात्डत्वमिति
भट्टः। कौघ्योततइ तिउप्रकरणेः न्यत्रापीतिडइतिसोमनंदीए तेनदकारोचनडकारइ तिस्वामी
कुणिवेश्मनिसाधुर्यत्डलयोरेकत्वस्मरणात्डत्वेकुड्यमितिवाहेगृहादेर्भित्तिरिष्टकादिमयु
स्यकांघइतिख्यातस्य॥ ततकुड्यमध्यन्यस्तास्थिकंसतएडूकमुच्यतेईध्यतइतिईडस्कंतो
घेरणोवाउल्लूकादयश्चेतिनिपातनात्साध्वितिसोमनंदीजातरूपस्कंदत्वमिच्छतिओ
कारमध्यस्थंवएजोकंतथाच द्विरूपंभवेदेडोकमेडूकमेडूकंचेत्यादि। कीकसमस्थिए
तत्काष्ठादिकठिनइमोपलन्हाणएकंमध्यस्यापितास्थ्यादिमत्कुड्यस्य॥ गृहेतिगृह्ना
तीतियहेगेंह्देकः एकंश्चतएवनिर्देशाज्जेहं। गांभुर्वदिशंवाईहतेकामयतेगेहंकर्मण्यपए

गेहेकइतिनिर्देशादोकारस्यात्वेकृते आगुणेचगेहं पुमानपिगेहोवासः कुटोद्वयोरितिगेहमस्त्रीशा
लासभेस्त्रियामितिवाचस्पतेश्च। उदकंवसितमाछादितंप्रतिहतमनेनवा। उदवसितंष्टषोदरादित्वा
दाद्देशोशकंध्वादित्वाद्वाऊर्द्धमवसितमितितुभट्टः विशंत्यत्रेतिमनिन्वेश्म। एवंसीदंत्यत्रेतिसद्म
कितनिवासेनिपूर्वादधिकरणेनिकेतनं। निशायामम्यतेगम्यतइति अमत्यादौक्तः भिशांतंरुष्य
मत्वरेतिनेट् निशायाअंतोविरामोऽत्रेतिवानिशामंत्यत्रेतितुभट्टः। वसुस्तंभेक्तिव्वस्तिरस्तत्रसा
धुरितियत्वस्त्यंवसंत्यत्रेतिवस्त्यंवसेस्तिरितिप्रत्ययः वाहलकाद्यत्प्रत्ययोपीत्येकइतितु
स्वामीवस्त्यतेयाच्यतेहिंस्यतेवावस्तगंधअर्दनेचुरादिणिजंतादतोयतिवस्त्यमितिसर्व
धरः ष्ट्यैस्त्यैशब्दसंघातयोः अवस्त्यायंतिसंहताभवंतिजनाअत्रेतिघञर्थेकवष्टिभागुरीत्य
कारः लोपः वस्त्यंएवमघपूर्वात्केवष्टीत्यकारलोपःपस्त्यमित्यपीतिस्वामिकौमुद्यादयः

ग ४

तथावधिशांतंसदनंपस्त्यमगारंमंदिरंपुरमित्यारभ्यनलोदवसितंपरस्थमितिवाचस्पतिकोषः। सीदंत्यत्रे
तिल्युट्सदनंवकुलंछंदसीतिदीर्घत्वेपृषोदरादित्वाद्वापुरुषोनारदःसादनमपीतिपारायणेतथाच
नजीवहीनोयमसादनंव्रजेदितिरामायणेनेष्यतेयमसादनमितिभारतंचसदनंसादनमितिद्विरूपं
च। भवंतितिष्ठंत्यत्रेतिल्युट्भवनं। नगीर्यतइतिगृहनिगरणेवाहुल्यात्घञ्अगारंकस्वादिश्चागी
र्यतेत्रेत्यागारंअगारस्यैवान्येषामपीतिदीर्घत्वेवादीर्घादिसंहितासाम्यादुपात्तंवसंश्चतुर्थोभि
रिवाम्यगारइतिरघुः। यदगारघटादकुट्टिमस्त्रवदिंदूपलतुंदिलापयेतिनैषधः। विद्यादगार
मागारमघगामापगामपीतिद्विरूपकोषः। मंघतेसुप्यतेत्रेतितिमिरवन्मंदेरिरन्मंदिरंस्त्रीनपुं
सकयोरित्यमरोक्तेःस्त्रियांदापुमंदिराम्वथयोगश्चव्रजतिपथिमनाङ्मंदिरातस्तवारिरितिस्मृ
भूतिः। गृहशब्दःपुल्लिंगोनित्यबहुवचनाएवक्लीवलिंगस्तुसर्ववचनःभुक्ष्विवहुत्वेगृहाणीत्या

प्याहुरितिभट्टः। निचीयते छाद्यत इति निकाय्यः पाय्यसान्नाय्येति साधुः। निलीयतेऽत्रेति पुंसीति घः।
एरजवा निलयः। एवमालयः। वसंत्यत्र हलश्चेति घञ् वासः साहचर्यात् पुंलिंगोऽदंतः। कुटति कुटि
लीभवति कुट कौटिल्ये इगुपधेति कः कुटः कुघनेत्रेति घञर्थे क इति स्वामी द्वयोरित्युक्ते स्त्रियां गौ
रादिङीषि कुटी च। इगुपधत्वात् कौ कुटिश्चेति भीमसेनः। लघुकुघा कुटीरमिति ह्रस्वा तो पि
स्त्रियां कुटिः यथा भ्रूकुटिरिति पंजिका शलंत्यत्रेति शाला हलश्चेति घञ् शलं तिगच्छन्त्येनामिति
कर्मणि घञ् बालो काश्रयत्वा ल्लिंगस्य स्त्रीत्वमिति स्वामी स्त्रियां शाला पुमान् शालो नृपमत्स्य
प्रभेदयोरिति तालुव्यादिः। सह मिलिता भांत्यत्र सभा अन्येषामपीति डः वा हुलकाद्वा आत श्चो
पसर्गे इत्यङ् सम्यग्भातीति सभा पृषोदरादित्वान्मलोप इति स्वामी ओको घंञ्ञं तौ तत्रोकः सां तं.
वात्रैव दृष्टमेविंशा तिर्गृहस्य। संजवनं त्विति संजवंत्यत्रेति जुर इति सौत्रधातोर्गत्यर्थाद् धिकर

रा.मु.२
१५

णोल्युड्इसंजवनंसमंतादुपयष्यध्वः संयम्यतेसंयमनंक्रन्त्यल्युट्इतिकर्मणिल्युट्संयमनमितिचपा
ठइतिटीकासमुच्चयसारः। चनस्त्रः शालाः समाहृताश्चतुः शालंह्रस्वोनपुंसकइतिह्रस्वत्वंपात्रा
दित्वात्क्लीबत्वमेवनस्त्रीत्वमितिसर्वधरादयः। आवंनोवेतिस्त्रीत्वपक्षेचतुः शालीत्यपीतिपं
जिका। अलिमुखंशालाचतुष्टयेचतुः शालमितिश्रीधरः हे अन्योन्याभिमुखगृहचतुष्टय
स्य। पर्णप्रधानाशालापर्णशालाशाकपार्थिवादिः। उटस्तृणपर्णादिरितिदेशीकोषः ततोजा
यतइतिउप्रत्ययेउटजोक्रस्वादिः तथाचरघुः सोध्वजालमुटजेषुविस्मृतइतिहेमुनीनांपर्णरवि
तगृहस्य॥ चीयतइतिचित्याग्निचित्येचेतिसाधुस्तस्येदंचैत्यंअण्। आयतनंतेचैत्यायतनंहेय
ज्ञस्थानस्ययज्ञायतनेचैत्योपिदेवकुलेआयतनमात्रेउद्देश्यवृक्षेप्येवयथाअल्पावशेषापृ
थिवीचैत्यैरासीन्महात्मनः। गयस्ययजमानस्यतत्रतत्रविशांपतइतिआयतनमात्रेयथान

रम
१५

चैत्यं छिंद्यान्नापि च्छेष्माणमुत्सृजेदिति उद्देश्यहन्त्येयथा आकुलग्राम चैत्या इति कालिदासः। चैत्यमाय
तने बुद्धबिंबे प्युद्देश्यपादपइति रुद्रः॥ मंदं तेमोदं तेस्वपंति वा नेनेति मंदिराणि मधिचनीत्यादिना उरच् मंदुरा
दे अश्वावस्थान गृहस्य॥ आविशंत्यत्रेति ल्युट् आवेशनं शिल्पिनां स्वर्णकारादीनां शाला गृहं शिल्पि
शालेति स्वामी कारूणां कर्मस्थानं शिल्पशालेति निरिकारः पाठ इति सुभद्रः हे शिल्पकर्मशालायाः॥
।प्रकर्षेण पिबंत्यस्यामिति घञर्थेकः आतश्चोपसर्ग इति त्यङ् वा प्रपा। पानीयशाला इव पानीय
शालिका स्वार्थेकन् ह्रस्वमित्वं च ह्रे यानि शालेति ख्यातायाः। मेतिमठं तेत्रेति मठमद निवासयोः
घञर्थेकः पुंसीति घो वा। छत्रशीला विद्यार्थिनश्छात्राः छत्रेण गुरुसेवा लन्द्यते गुरुदोष छ
दना छुत्रं त छीलत्वाद्वा छत्रादिभ्यो णः आदिना परिव्राजक नमपणकादिग्रहः सत्रशाला व्रति
श्रयश्चात्रैव बौद्धानां तु विहार इति एकं। गंजं। निशाद्वायं तेमनाअस्यामिति गजगजिगृजिगुजिघु

रा॰मु॰२
२६

जसुजिशब्दार्थाः गुरोश्च हलः इत्यकारः गंजा मदिरायामघस्य संधानाश्रयत्वात्संधिगृहं मदिरा
गृहं हेमन्यसंधानगृहस्य।। निर्वातत्वाद्गर्भ इवागारं गर्भागारं। वासायगृहं वासगृहं मध्यगृहं कोष्ठ
कारकवास्त्वादिकमप्यन्ये वदन्ति मध्यगृहभागस्य वासहरेति ख्यातस्याप्येतदेव नामेत्येके तथा चर
भसः गर्भभोगवासगृहं मंडपोस्त्री ननाश्रयः इति। मंत्रादिन्यासेन नास्ति रिष्टमत्रेति अरिष्टं हिंस्रे
विरिष्यते सूतरन्नत्वादिति भट्टः। सूतैव सूतिका सूतकादीनां वेति पन्हो इत्यं तस्या गृहं तथा हि नव
सूतस्त्री गृहस्य गर्भा[illegible]गारादिभिश्चतुर्भिरेव पर्याय इत्यन्ये।। वेति वातस्यायनं गमनमनेन वा
तायनं। गवां नयनरश्मीनामन्वीव पथ्यान्तेनयनान्तरश्मयः प्रसरं तितयात्रापीति भावः अ
न्योऽदर्शनादित्यच् समासांतः अवङ् स्फोटायनस्येति व्यवस्थित विभाषया जालके नित्यमव
ङ् गवान्तः प्राणिनि तुगोऽन्तः वधूहगयनं गवान्तो जालकं चान्वैव हि जालकस्य कुंडुरुकी तिरश्चा

राम
२६

नस्य॥ मंडनं मंडो भूषां तं धातीति मंडपः मंडं पिबतीति के अवयवार्थं विनैव रूढिलक्षणया मंडपः मंड्य
ते जनैरिति ऊषिकुटिहलिकविखडिभ्यः कपन्निति वा कुलकात्कपनिवा। जनानामाश्रयो जनाश्रयः
द्वे मंडपस्य। हेति हरति मनो हर्म्यं अम्यादित्वात् हृञो यत् मुडूव हर्म्यं आदिशब्देन स्वस्तिका हाल
कादेर्ग्रहणं धनिनां राजव्यतिरिक्तानां वासो गृहं द्वे कं काष्ठेष्टकादिकृत तस्य धनिगृहस्य। देवानां भूभु
जां च गृहं प्रसीदति मनो त्रेति घञ् प्राकारवद्दीर्घः प्रासादः अन्यत्रापि साहश्येनोपचारादेकं॥
लेपस्य दर्भं सुधा तद्योगात् ज्योत्स्नादित्वादण् सौधः। प्रायेण राजार्हत्वाद्राजसदनमिति स्वा
मी सदनानां राजा राजसदनमिति राजदंतादित्वात्परनिपात इति कोशकारदयः प्रासादसौधयो
रेकार्थतेति केचिदिति तुस्वामी सौधशब्दस्तु तन्मते पि राजसदनमात्रवाची अतएव माघे सेनासु
धान्हालितसौधसंपदामिति द्वे सौधगृहस्य। उप अधिकं क्रियत इति कर्म णि एपत् उपकार्या

रा॰मु॰२
१७

।उपकरोतीति एवुउपकारिका उप अधिकं करोति कर्मण्यण् उपकारी स्वार्थे क इति स्वामी एतदेव
कल्पं तु ध्यामहे उपकार्यु परकारिके ति द्विरूपकोषादर्शनात् द्वेराजन्यगृहसामान्यस्य॥ स्वेति
स्वस्तिक्षेमं कायति आतइति कः स्वस्तिकः। सर्वतोभद्रं क्षेमं मस्यात्रेति वा सर्वतोभद्रः। साधु
नंदयतीति नंदी नंदी आवर्तोयस्य स नंद्यावर्तः नंद्या विवाती यस्येति वा। विशिष्टं छंदो ऽभि
प्रायो त्रेति विछंदकः विशिष्टे छान निर्मितो विछंदक इति सर्वधरः। उक्तं दिरदीनो बुन्वविछर्दक
इत्यन्य इति भद्रः विछंदकप्रभेदास्त्वनाविशेषाः यथाह वराहः अपरांतगतो लिंदः प्रागंत्यगतौ
न तु स्थितौ चान्यौ ततश्चांत्यः प्राक् द्वारं स्वस्तिकं शुभद मिति एवमन्यत्रापूह्य एते तेन स्वस्तिका
दीनां क्लीवत्वमपि पंचद्वादश विंशति दश प्रभेदाः क्ष्मापतेर्गृहाः नंद्यावर्त स्वस्तिक विछंदक
सर्वतोभद्राः इति चतुरस्रश्च तुर्द्वारतोरणः स्वस्तिको मत इति विहाराकृतिः उपघ्नुपरिगृहं चो

एम
१७

रीहइतिख्यातंसर्वतोभद्रः वर्त्तुलाकृतिर्नंद्यावर्त्तइतिपंजिका आदिनारुचकवर्द्धमानेत्यादियहः द्वारालिं
द्यादिभेदभिन्नानांमीश्वरगृहविशेषाणांपृथक्पृथग्वेकैकं। अगारमितिभूभुजांस्त्रीणामगारंअ
गारंअंतरभ्यंतरेपुरंगृहं अगारेनगरेपुरमितिवन्हपते। अवरुध्यंतेऽत्रेति अवरोधनंत्सु एवंघञ्यव
रोधोपि। शुद्धाउपधाशुद्धास्तकाअंतेसमीपेस्येतिशुद्धांतः अंतः पुराद्ययोराजदारेष्वपितास्था
द्दिहंतेशुद्धांतसंभोगनितांततुष्टइतिनैषधे। यस्यावरोधस्तनचंदनानामितिरघुः चत्वारिन्त
परस्त्रीगृहस्य। अद्यतेऽसाविति अट्ट अतिक्रमणेचुरादिरपंतादेरच् अट्टः। ह्लुवंतिशब्दायंतेत्र
अर्तिस्तुहुस्त्रिवन्यादिनामः न्होमोऽट्टद्वारादिदेहर्म्या गृहपृष्ठस्येतिसुभूतिः प्राकाराग्रस्थितरण
गृहस्येतिकौटिल्यः प्राकारमंडपस्योपरिशालायाहर्म्यादिपृष्ठेवातकुटिकायाइतिस्वामीप्रा
कारधारणार्थोऽभ्यंतरेन्होमोरम्यइतिशुभदृः अट्टेतिख्यातस्यगृहस्येतिकोट्टः मंडपस्यो

रा॰सु॰२
१८

परिहर्म्यमिष्ठस्येति तु पंजिका। प्रेतिप्रहन्यते गम्यत इति प्रघाणः अगारैकदेशे प्रघाणः प्रघणश्चेति हंते
रपि घनादेशः पन्हेहहिश्च निपात्यते हंतेरत पूर्वस्येति णत्वमित्येके नेत्यपरे तेहि तत्रोपसर्गादित्य
नुवर्त्तते प्रादीनां चोपसर्गता क्रियायोगेन चेह क्रियायोगोस्ति प्रघन इत्यनेन गृहैकदेशाभिधानात् त
स्मादेतौ नांतावेवेत्याहुः वयं तु विश्वधरणिमेदिनिवैजयंत्यादिषु णं तवर्गदर्शनात् णांतावेतिब्रूमहे
अल्यते भूष्यत इति अलतेर्वा हुलकात् कलिपुलिभ्यां किंदत्वत् अलिंदो ह्रस्वादिः यस्मामलिंदे षुनवत्तु
रेवेति माघः प्रत्याह्मणि आलिंदो दीर्घादिरपि तथा च गृहैकदेशे। आलिंदः प्रघाणः प्रघणस्तथेत्यम
रमाला त्रीणि द्वाराद्बहिः प्रकोष्ठकस्येति गृह द्वारपिंडिकस्य वीथी ख्यातस्य च अलिंदस्त्वल्पपिंडि
के पीति सुभूतिः। गृह्ममवगृह्यते परिछिद्यते ऽनया गृहावग्रहणी अवगृह्यते द्वारसारशाखे अन
येति तु भट्टः॥ दिह उपचये भावे घञ् निदेहं गोमयादिलेपं लातीति क प्रत्ययांतो गोरादिर्देहलीति। द्वे

वे॰४

राम
१८

गृहद्वारस्थूणोपचतुष्काष्ठाधः प्रस्तारदत्तकाष्ठस्यपाषाणस्यवेति कोक्कटादिः द्वारपिंडिकायाइतिस्वामि
सुभूतीद्वाराग्रेस्थानस्यवीथ्याख्यस्येतिभट्टादिः ॥ अंगणत्यनेत्यंगणंपृषोदरादित्वाल्लत्वमितिस्वामीयं
जिकाव। नांतमितितुसर्वधरः तथाचअंगनंदर्शनवेतनयत्नयंजनयोजनरत्नवितानमितिनांतेषुशाव
रः अंगेननवित्यंगनंश्रीभोजः अंगनंप्रागणेयानेकामिन्यामंगनामतेतिनांतवर्गेविश्वः वत्सतइहभि
तिचुनेवदेगतौशर्वरीवत्प्रत्ययवत्वरं। अजंत्यत्रअरिवत्किरच्अजिरं। नीणिप्रांगणस्य। स्तंभस्या
धस्तात्स्तंभाधारदारुणिशिलेतिभट्टादयः। शिलउंछेशिलतीतिगुपधात्कः टाप्चतुष्किकाया।
आधारदारुगोभट्टइतिरभसात्। शिलास्यात्साचतालमादिः शिलउंछेस्त्रियांयावद्वाराधः स्थितद्वा
रुणोरितितालआदौरभसात्। कप्रत्ययांतोगौरादिङीषिशिलीत्यपितलदारुशिलीयोषित्क्ता
सादारुऊर्ध्वमस्ययदितिवोपालितादिः ॥ एकं। स्तंभाद्यादेरुपरिस्थितंदारुना सायोस्त्रशब्देशुरोच्छे

रा॰मु॰२
१९

त्यकारः टाप्। विज्ञेयानासिकानासानासादारूर्द्ध्वदारुचेति दंत्यांतेषुरुड्डान्सदंत्यानासादार्विति सम
स्तमेकमेवनामेति कश्चिदिति स्वामी द्वारोपरिस्थितमेव दारुनासेति पंजिकालिखित रुड्डान्नासादारु
परिद्वारस्याधो दारु शिला स्त्रियामिति नाममाला श्रावणे विसतंतौ चेति प्रक्रांते। नभोव्योम्नि नभान
साधोणादारूर्द्ध्वदारुणोरिति दंत्यांतेषु रभसाच्च। एकं स्तंभस्य द्वारस्य वा उपरि भित्तिधारकस्य का
ष्ठस्य माघट इति ख्यातस्य। प्रेति सौधादौ प्रकर्षेण छन्नमाहृतं गुप्तं प्रच्छन्नं। अंतः स्थितं द्वारमंतर्द्वा
रं। हे गृहाभ्यंतरे च कोष्ठकद्वारस्येति को कोटः। गृहाभ्यंतरकोणकादिद्वारं जालकद्वारं वा प्रच्छन्ना
दिद्वयेनोच्यत इति स्वामी॥ पक्षे पार्श्वे द्वारं पक्षद्वार इव पक्षकः स्वे प्रकृतौ कन्। द्वे खडकी द्वारस्य पूर्वाभ्या
मेकार्थमेतदिति कात्यः यदाह प्रच्छन्नमंतर्द्वारं स्यात्पक्षद्वारं तदुच्यत इति सर्वानंदः। वलीनि संव
लितानि कानि तोयानि यत्र तद्वलीकमन्येषामिति दीर्घः वलत्याहरणोति कुड्यादिकमिति अली

राम
१९

कारयश्चेतिनिपातनाद्धावल्लीकः पटलप्रांत इति पुंस्कांडे वोपालितात्पुंस्त्वमपि। निश्चयेन ध्रियंते
संध्रियंतेऽनेन मूलविभुजादित्वात्कः पृषोदरादित्वाद्दीर्घः। पटलस्य छदिष आलस्य प्रांते वर्त्तते॥
नीध्रस्त्रीणि श्रोहानीति ख्यातस्य॥ श्रयेनिपद्यते व पटति गमयत्युदकं वा पटेरंतर्भावितण्यर्थाद्वा पटे
ह्वयादित्वात्कलच् पटलं पटलानीति तु भट्टः। छाद्यतेऽनेनेति छदेरिसुरादिणय ताहर्विस्तु वीत्यादि
नाइसिः इस्मन्नित्याहिना ह्रस्वः पटलसाहचर्यात् छदिः सांतं क्लीबं पटं चालमप्यत्र। द्वे वालस्य। गो
पेति गोपा वृत्त्वर्गिणश्च आनास ते आद्कयति ण स्तृश द्वेप चाद्य इ पृषोदरादित्वा उपधा ह्रस्वत्वं गौरा
दित्वात् ङीष् गोपानसी गोपनं गौः घञ् तमानयति प्रापावं तं करोतीति स्वार्थे ण्यंताद्दसु निणिजो
पेङ्गौ तश्चेति ङीपि गोपानसी वा स्तुद्धानं वडभी चंद्रशालेसौ वोहूवेश्मनीति रभसः। तद्वत्तु भि
त्तिष्वच्छादनार्थं यद् हरणकाष्ठं वक्रीकृत्य हीयते सा गोपानसी पटल्लाधारो वंशपंजरं गोपानसी तु

रा॰मु॰२
२०

भद्दः। कुलेनवडभ्यप्युक्ता कृस्वांतापिवडभिः तथावलांकस्यांचिकृवलवलभावितिमेघदूतः। चि
त्रस्थानवलोक्यमूल्यवडभावेकेकमाभाषतइतिपूर्वश्लोकः। आगारवर्णिका। विष्कंभदार्वप्प
त्रेत्यन्येतथाचचरकः गोपानसीनामागौरवणीकाचारचिंतकैरिति॥ एकं॥ कपोतान्पालय
तीतिकर्मण्यपण्ङीवंतात्स्वार्थेकत्र एवुलंतावाकपोतेतिप्रायोवाद्दः पक्षिमात्रपालिकावोध्या
विशेषेणटंक्यतेत्रटकिवंधनेधिकरणेघञ्कर्मण्यञ्वाविटंकंसौधादिषुवांतेकाष्ठादिरचि
तद्देकपक्षिस्थानस्यएकं। द्वुआवरणेचुरादिः द्वारयंत्या॰द्व एवंतिपक्षिणोऽस्यामिति द्वुआ
नावरणाइतिकेचित्पठंतितन्मतेद्वार्यतेऽनाद्दतंक्रियतेसंपदादित्वात्क्विप्द्वाः द्वारोद्वार
इत्यादिरूपंकर्मणिघञिद्वारंशद्वशक्तिस्वाभाव्यात्घञंतेपिस्त्रीवत्वमितिस्वामी। द्वुआवर
णेचुरादिद्वजोवाउपसर्गवलादावरणार्थताप्रतिहारयंतिवारयंत्यनेत्यधिकरणेघञ्उपस

राम
२०

र्गस्य वा यत्रीनिर्दीर्थः प्रतीहारः नानार्थेरत्नं चाग्रैव गोपुरमपि त्रीणि द्वारस्य। तर्द हिंसायां सर्वधातुभ्य इतीन्वितर्दिः वितर्दिर्हिंसास्याः वेदिकासाहवर्या तस्त्रीत्वं। एवं वितर्द्यस्या मिति इत्यंता त्कृदि कारादिति ङीष् स्वार्थे कप्रत्यये केऽणः इति ह्रस्वः पक्षे रकारांतात्कन् अत एव वेदिर्वेदी च द्वे देवागारादौ काष्ठादि चतुष्किकायाः प्रांगणादिमध्यगतायावेतिस्वामी दारुपरिष्कृता चतुरस्रा विश्रांतिभूर्वितर्दिरिति मुकुटः स्तंभपीठिकेत्यन्ये इति सर्वधरः चतुष्किकादिगृहमध्यस्य चतुःस्तंभोपरि वक्रकाष्ठनिर्मितायावेदिकाया इति कौमुदादयः। तोरेति। स्कृवं तोरणं त्रिशब्दायंते न तोरणः पुंषोदरादिरिति स्वामी मंगलार्थं तुरं तित्वरंते अत्रेत्यधिकरणे ल्युट् तोरणः इति मुकुटः तुरीत्वरणहिंसयोः द्वाराद् बहिर्वहिर्द्वारं द्वेमूलद्वारा द्वाद्बहारस्येनि कौमुदः द्वाराग्रे निखातस्तंभयोरुपरि निबद्धनानारत्नवस्त्रादिमयस्य तोरणास्येति सर्वधरः तयाबहुराच्छन्नं संपुरपतिधनु

श्चारुणातोरणौ इतिमेघः॥ अतएव द्वाराद्वहिः कल्पनाद्वहिर्द्वारेवंदनमालेतिख्यातस्येतिकेचित्। पुरस्य
द्वारंपुरद्वारं। गोप्यतइतिवा हुलकात्कुपेरुरच्चगोपुरंद्वारमात्रेपिगोपुरमित्यनेकार्थे वक्ष्यते। द्वेनगर
द्वारस्यदुर्गपुरद्वारस्येत्यन्ये। पुरोद्वारियन्मृत्तिकाकूटंतत्र इस्तिनखइवहस्तिनखः। एकंदुर्गद्वा
रावरणार्थंक्रमनिम्नस्यमृत्कूटस्यवहिरटनस्यांतःसोपानस्ययुद्धार्थस्यमृत्कूटस्यवातत्रहि
स्थित्वाविपन्नेषुकांडंक्षिप्यतइति॥ प्रविशंतंकंवातंप्रविशंतंकंशिरोवापाटयतिकपाटंपप
वर्गादिमध्यंत्रपालुवाजवादित्वात्तुवत्वेकवाटमित्यपीतिभट्टः। स्वामीतुकंवायुंवटतिवेष्टयति
वटवेष्टनेअतःकर्मण्यण्कवाटंकपाटमित्यपिहश्पतइत्याहस्त्रियांङीषिकपाटीकवाटीइत्य
र्न्नीतिअर्त्तिकमीत्यादिना ऽरन्प्रत्ययेवासरवदररन्अररंस्त्रियामररीतिपंजिकातथाचकवा
टश्चकपाटश्चविंशुस्यादररंननेतिवाचस्पतिः॥ अररिरिहंतःपुंसिक्लीवेचदृश्यते तथाचकष्कि

नास्पृहयेवेर्यंते ऽमीपरमरयोहर्म्यवातायनानामिति। सकृच्छमस्थि वेसत्त्वक्तिनथा ऽरनिस्यादिति हली
वेवामन:। हेकपाटस्य। तद्विष्कम्भात्यवश्यमित्यावश्यकेणिनि: तद्विष्कंभिकपाटधारणंकाष्ठं। अ
र्यतेऽनेति अर्जसर्जअर्जनेहवादित्वात्कलच् कुत्वं अर्गलेस्त्रियांदीप् अर्गलावार्यर्गलाभंगर व
यहन्तस्वरघु:। लघुविवन्नायांऊपिअर्गलीत्यपीतिपंजिका। तद्विष्कंभोऽर्गलमितिमूलपाठ:
विष्कंभेवंधनिमित्तदंडइतिभट्ट:। एकंकपाटद्वस्तारदर्गलौहादिकृतदंडस्यहुलीतसली। तिरभा
तस्येतिहुस्वामी। आरोहेति आरुह्यतेऽनेनेतिल्युट् आरोहणं। उपपूर्वात् हनितेर्भावेघञिधात्
नामतेकार्थत्वाडपानमाक्षेकृपेनप्रापणंतेनसहवर्तंतेसोपानंसहउपानेनोर्द्धगमनेनवर्त्त
नइत्यन्ये। सोपानपथमुत्स्वत्यवायुवेगसमुद्धतइतिसवायुवेगसमुद्धतोऽपानपथमुत
सृज्येतियदंभंगेऽश्लीलत्वाभेदाद्दंत्यादित्वं। सोपानसिंधुसाध्मा: संवाधसमूहसत्राणीतिदं

न्यादावृषाविवेकाद्य। इष्टकादिरचितायाःसिटीतिख्यातायाद्वे। निश्रयेनश्रयंतिप्राकारादिकमनये
तिवह्निवल्लिप्रत्यये निःश्रेणिः अविसर्जनीयनिशब्दान्नियताश्रेणिःपंक्तिरत्रेतिनुस्वामी। अधि
रोहिणीसाहचर्यात्स्त्रीत्वंङीपिनिश्रेणीच। अधिरुह्यतेऽनयेतिल्युट्ङीप् अधिरोहिणी। द्वेवेणु
हस्तमय्यानिशारणीतिख्यातायाः। संमृज्यतेऽनयेतिल्युट्मृजेर्वृद्धिः संमार्जनी। शोध्यतेऽनया
शोधनीवर्द्धन्यप्यत्रैवद्वेबाहुनीतिख्यातायाः। नयान्क्षिप्ते धूल्यादौ संकीर्यतेसंमिश्र्यतइतिकर्म
णिघञ्संकारइतिसुभूत्यादयःस्वामीच। भरतस्त्वकारमित्यपिसंकरइत्याह। अवकीर्यते
निरस्यतेऽवकरोरप्अवकरः द्वे। खस्यतइतिखनुअवदारणेडित्खनेर्मुड्वोदात्तइत्यच् आदे
र्मुडागमश्चमुखं। मुखतिर्मंडयतिमुखमंडनेइगुपध। त्वात्केमुखमित्यन्ये। निस्सरंत्यने
नेतिनिस्सरणंल्युट्। द्वेगृहस्यनिष्क्रामणप्रवेशवर्त्मनइतिभट्टसर्वधरौ। स्वामीतुगृहादि

स्यत्रेति उपसर्गे वस इत्यथत्रु। संवसथः। ग्रस्यते सो ग्रिति रिति ग्रसते रात्त्रेति मत्रं त्रैरस्य शात्वं ग्रामः ग्रामयंति निवसं ५

द्वयं प्रवेशो मुखं। आरिद्वयं तथा च मुखं स्वांगमित्यत्र पाम्मुखी शालेत्यत्र न्यासउक्तं शालायाः द्वारत्रवे
शो मुखमुच्यत इत्याह पंजिकादिरप्येवं। कोष्ठादस्य द्वे हद्दमंडपादेः प्रवेश निर्गममार्गस्येत्याह
। समंतान्निविशंते त्रेति हलश्चेति घञ् सन्निवेशः। एवं निष्कष्यते निकटी भूयते त्रेति निकर्षणं ल्युट्
निर्गतं कर्षणमस्माद्वा। द्वेपत्तनादि भुदिगादिपरिछिन्नप्रवेशस्य द्वे पूर्वदिगाद्यव छिन्नगृहाणाम
पीति कलिंगः मुरारेर्विहरणाभूमेरिति तु भट्टः। सेतिसंवसं त्यत्र ग्रामकुट निकेतन रत्यश्चोरादिकात्
पुंसीति घे ग्रामः गम्यते जनैर्घ जि घषोरद दित्वात् डे फेवा विप्रादि वर्णाद्राया श्राकारपरिखादि रहित।
बहुजनवसतिर्ग्राम इति नगराद्भेदः॥ द्वे ग्रामस्य। वेश्मनो गृहस्य योग्या भूः वेश्म भूः। वसंत्यस्मि
न्वसेरगारे णिश्चेति तुन् वद्धिः वास्तु। द्वे गृहकरणयोग्याया भूमेः। ग्रामस्यांतं समीपं ग्रा
मांतं अंते विक्षार्थं शल्पबन्हो पाडुपगतं शाल्यं चिक्ररूपकील कमत्रेत्युपशाल्यं। उपशालेस

मीपभ्रमणोसाधुः तत्रसाधुरितियद्वा॰ अत्रयामइत्युपलक्षणं। ग्रामादीतिबोध्यं। तथाचमाघः
शैलोपशल्यनिपतद्रथनेमिधारेतिअतएवात्रप्रकरणेउपकंठोपशल्येद्वेइतित्रिकांडशेषः
एकंग्रामादिसमीपदेशस्य। सीयतेबुध्यतइतिसीमासीमन्नामकृसामन्नित्यादौसाधुमनइति
डीब्विषेधेडाबुभाभ्यामितिडाप्सीमाआघाटशब्दोप्यत्रदिङ्मात्रंगघटाविभक्तचतुराघाटा
महीसाध्यतइतिप्रयोगः। द्वेसीमायाः भट्टस्तुचतुर्भिरिवपर्यायमाह। घोषंतिगावोत्रेतिघञ्
घोषः। आभीरागोपास्तेषांपल्लिर्गृहमाभीरपल्लीतिभट्टः कुटीग्रामकयोः पल्लिरितिशाश्व
तः। पल्लिः कुटीसमुदायइतितुसर्वधरः। पत्तंतिचरणेनभ्रमणेनजीवंतिक्विपिपत्तोभावः
तेनलीयंतेचेतिवाहुलकात्डिः टिलोपः कृदिकारादितिङीष्पल्लीपल्लीस्थानमितिस्वा
मीपल्लीग्रामइतितुवयं। आभीरपल्लिर्द्वेस्वांतेतिपंजिका। द्वेगोपालग्रामस्यगोपगृहस्य

त्वा पच्यत इति पक्कस्तत्यल्युटो वहुलमिति कर्मणि क्विप् पक्कः पच्यमानः कणो धान्यांशो यस्येति प
क्कणः पच्यत इति नान्यत्कर्म कुरुते नेति विते: कणः कश्चेति वाहुलकात् पचेरपि कणः कश्चाना
देशः पक्कण इति वा कद्वयमध्य इति सुभूतिः। पक्कणोऽस्त्रियामिति जातरूपः। पक्कणं तु न पुंस
कमिति रत्नकोषः। शवराश्चरणप चंडालास्तेषामालयो गृहं शवरालयः। द्वे शवरगृहस्य॥ ॥इ
ति पुरवर्गविवरणं॥ ॥महीध्र इत्यादि महीं धरतीति मूलविभुजादित्वात् कः महीध्रः। शिख
रं शृंगं तद्योगात् इनिः शिखरी क्ष्मां बिभर्तीति क्विप् क्ष्माभृत् हर्तुं देशांतरं नेतुमशक्यः अहार्यः
अहलोपधत्। धरति भुवं वा धरः। पर्वाणि भागाः संत्यत्र तद्योगात् पर्वमरुद्भ्यां तप्। पर्व
तः भृमृदृशियजिपर्विपच्यमितमिनमिहर्यर्थिभ्योऽतजित्यत पर्वत इति स्वामी। अदि
शादिभूशुभिभ्यः क्रिन्निति क्रिन् अद्रिः। गां भुवं त्रायत इति गोत्रः। आत इति कः। गृह्णाति

गिरतिवाग्ट शब्देग्टनिगरणइत्तोवाक्टग्टम्टष्टकुटिभिदिछिदिभ्यश्चेतिइः ग्टनिगरणेवाकुल कादितो
पिश्रगुपधात्किः अतइद्वातोरितिद्वपरत्वयोर्गिरिरितिसर्वधरः। गिरतिग्टणातिवाऽस्यन्येभ्योपीति
।किःष्टपोदरादित्वात्वक्तेर्ग्रासनादेशःयावा। नवलतीत्यवलः पचाद्यच्। क्षुरशिलायोग।
नस्त्रूश्रिज्योःल्मादित्वात्रणशीलः। उच्चीयतेहच्छिंनीयतेएरच्उच्चयः कूटंततः षष्ठीसमासेशिलोच्च
यः। निर्भरिस्यावासानुमज्जीवतटष्णुशेखरकटकिकुहाराहयोप्पत्रैवत्रयोदशपर्वतस्य॥ लो
कतिअंतर्लोक्यतेल्लोकः वहिस्क सूर्यकिरणास्पर्शनान्नलोक्यतइत्यल्लोकः कर्मणिघञंतौ
लोकश्चासावलोकश्चेतिलोकालोकः। चक्रंभ्रमिवक्रंवडतेवेष्टयतिचक्रवाडः कर्मण्यणिष्ट
षोदरादिरितिस्वामी। चक्रंभ्रमंडलंवल्लतेवेष्टयतीतितुसर्वधरः। वक्राकारेणवाडतेवाउआह्ल
मइतितुभट्टः। वक्राकारेणवलतिवेष्टयतिवाद्वेधाकारवत्साद्विद्वीपांमहीमावेष्ट्यस्थितस्य

गिरेर्लोकालोकाख्यस्य। त्रीणि कूटानि शिखराण्यस्येति त्रिकूटः। ककुदं चूडा त्रीणि ककुदाकाराणि शृंगाण्यस्येति त्रिककुत् त्रिककुत्पर्वत इत्यंतलोपात्साधुः। हे त्रिकूटनाम्नो गिरेर्यस्य शिखरे लंका॥ अस्तयति

ग्रहादीनामनुपलब्धिं करोतीति णिजंतात्पचाद्यच् अस्तः अस्तं ग्रहादीनामदर्शनमत्रास्तीत्यर्शआद्य

च् अव्ययानां भमात्रे टिलोपः अस्त इति स्वामी। चरंत्यनेन चरेर मिचरमन्त्मात् पश्चिमाचलोऽस्त्यर्थः

हे अस्ताचलस्य। उद्यंति ग्रहा अस्मादित्युदयः एरच्। पूर्वदिशि पर्वतः पूर्वपर्वतः। हे उदयाद्रेः॥ हीति

हिमवदादयः सप्त नगविशेषाः हिमयोगात् ह्रस्वमिमतुप् हिमवान्। नियतं सीदंत्यत्रेति घञ् निषधः

पृषोदरादित्वाद्धत्वं। आदित्यगमनविरोधेन विरुद्ध्यायंत्यत्रेति विंध्यः पृषोदरादिः विशेषेण

रुध्यते दीप्यते ऽस्मादिरिति तु भट्टः माल्यं माल्याकारा अस्यास्तीति माल्यवान्। परितो यात्रा यांभवः

पारियात्रक इति तु भट्टः पारियात्रयात्रस्पतेशेषे ऽणि ततः स्वार्थेकन्निति पुरुषोत्तमः पारियात्रको

रा·मु·२
२५

ऽतस्यतृतीयः तथा चभुंक्तेमहीमत्रविधाययात्रांससस्यविंध्याबलपारियात्रामित्यंतयमकेवराहः
गंधेनमादयतिनंद्यादित्वात्ल्युः स्वभावात्क्लीवत्वंगंधमादनं।हेममयः कूटोस्यहेमकूटः।आदि
नामलयदर्दुराम्रकूटचित्रकूटमंदरमैनाकरैवतकसत्याहिमहः देवालयत्वान्मेरुः प्रागुक्तः स्वनाम
प्रसिद्धानांपृथक्पृथक्।पेतिपनवणसंभक्तौपाश्चंखनतिआप्नोतीतिकर्मणिपरिशुषोहरादिः
पाषाणः पषेर्णिरित्यानत्ववापाषाणोमूर्द्धन्यमध्यः संहर्षपाषाणपुरीषदूषिकानिषेधदुःषे
धमृषामुषंगिणइत्यूषविवेकात्।प्रस्तृणातिआच्छादयतीतिप्रस्तरःपचाद्यच्।गिरतीतिया
वापूर्ववत्।उपसमीपेलातीतिकः उपलः।अश्नुतेआप्नोतीतिमनिबुअश्मा।शिलतिउंछेतालआ
दिः इगुपधत्वात्कः ततष्टाप्शिलाभिदाद्यङितिस्वामी।दीर्घेतइतिम्टहभुसोऽहिनित्यगु
हनौहणानेः सुगरङ्गस्वश्चेतिअदिप्रत्ययः सुगरङ्गस्वत्वंचहपद्दानामर्द्धन्यमध्याकषायः क्रूषमां

राम
२५

जेमहिषवृषभमोषवृषदृषदन्ष्मनेरातशरदृरदृशदरि इति दृशेरित् प्रत्ययः इकारस्याकारस्तकारस्य
दत्वं च निपात्यते तेन दृशत् हितिचांद्रो णाद्दिसाधनान्नालव्यमध्यापीति सर्वधरः ॥ शिलासा हृवर्यात् दृशदः
स्त्रीत्वं ॥ समप्रस्तरस्य ॥ कूटयति कूटदाहे रगुपधेति कः कूट्यते वा सूर्यदाघाभ्यामिति घञि कूटः ॥ शिखा
स्यास्तीति शिखाया कृरवश्चेति रः कृरवत्वं च शिखरं ॥ शिखाशानीति ज्यायोरिति कृरव इति स्वामी ॥ अस्त्री
त्वमुभयत्रयोज्यं शिखरं वानेति वन्यते ॥ शृणातीति शृंगं शृणाते र्ह्रस्वश्चेति गन्नस्तुटौ पुंस्यपीति स्वा
मी घुंजिकावत्तथा वजि गायजं ब्रूजनितश्रियः श्रियं सुमेरुशृंगस्य तदा नदासनमितिमाघः ॥ त्रीणि
पर्वताग्रस्य ॥ प्रपतंत्यस्मादिति प्रपातः अकर्तरीति घञ् ॥ अविद्यमानस्तटश्चालंवनस्थानं समर्थं भा
गो वा न अतटः ॥ अर्कीकरादिभिर्भृज्यत इति प्रथिम्रदिभ्रस्जां संप्रसारणं सलोपोन्यं च क्यादित्वा
त् कुत्वं भृगुः त्रीणि अवटीति ख्यातस्य ॥ केतिकघते हन्त्वादिभिराक्रिपते कटे वर्षावरणयोः कुत्व

रा॰ मु॰ २
२६

शिल्पिसंज्ञयोरिति कुन्‌ कटकः। नितंबो मध्यभागः। एकं पर्वतमध्यभागस्य मेखला रव्यस्य। स्वाती
निस्तुः स्तौ नितम्बरन्यं भोवा मितह्यादित्वात्‌ उः मृगघादिः अनयोः स्नु नितंबयोः साहचर्यात्‌ स्त्रीत्वं
स्तुः पुमानेवेति सर्वधरः। प्रतिष्ठंते नेति स्यास्तेन्यादिना कः प्रस्थः। षणोति ददाति सुखमिति सम्यते
सेव्यते वा षणु दाने इह सनि जनीत्यादिना ञुण्‌ सानुः त्रीण्यपि इसमभूभागस्य पर्वतैकदेशस्य च॥ उं
दति जलेन उंदी क्लेदने उंदिगुधिकुषिभ्यश्चेति सः किद्वेति कित्वाद नुषंगलोपः उत्सः। प्रस्रवंत्या
पोनेनल्पुरुङ्‌ प्रस्रवणं। द्वे अविच्छेदेन उंदिगुधि... भ्यश्चेति सः किद्वेति कित्वा...
त्सः। ...प्रस्रवंत्यापोनेनल्पुरुङ्‌ प्रस्रवणं। द्वे अविच्छेदेन स्रवज्जलं यत्र स्थाने पतति निपत्य च वहुलीभवति तस्येति स्वाम्याशयः। अजस्रं मंदवेगेन स्रवज्जलस्येति तु कौञ्कटः। निर्झरंत्यनेनेति ज्झृष्
वृष्वयोहानौ ऋदोरप् निर्झरः। एवं धरः षित्वादङि झरा अवरः झरिः तनोडीषि झरीचेति स्वाम्या।

राम
२६

रयः॥अन्योपसर्गनिह्नवयेनिर्झरः।हेपर्वतावतीर्णजलप्रवाहस्येतिसर्वधरः पर्वताद्वेगेनपतज्जल
स्यझोराइतिख्यानस्येतिकोऽझरद्रयः॥देतिदृणातीतिपचाद्यच्विदारस्त्रीतिदरीशब्देनापिसंवध्यतेते
नकंदरसाहचर्यान्पुंस्यपिदरइतिगौराद्दिडीदरीतिस्वामी।पचाद्यौदरडितिपाठादितितुभट्टः॥क
मितिमांतान्ययजलदादिजलेनदीर्यतेकंदरःस्त्रियांटाप्कंदराः कंदराः कुलरूणीदिह्नयतिरवि
रितिमाघः।डीप्कंदरीचेत्यपीतिपंजिका।हेसजलस्यनिर्जलस्यवाकृत्रिमस्यगृहाकारगिरि
निम्नप्रदेशस्य।हेवखातेःकृत्रिमेविलेपर्वतस्यविवरेगुहागुह्यतेऽनयेतिभिदाद्यङ्।गांभुवंव्ह
रतिकुटिलांकरोतिगतिंव्हरयतिकुटिलयतिपचाद्यच्पृषोदरादित्वाच्छिह्वरव्हलरेतिनिपात
नाद्वागव्हरंगव्हरंक्लीवमेवगव्हरागव्हरीत्यपवारादितितुपंजिका।केचित्तुचत्वार्येवनामानी
त्याहुः तथाचकात्यः हेवखातोविलंगुहेतिशाश्वतश्चगव्हरंविलदंभयोरिति।हेअकृत्रिमपर्वत

बिलस्य गृहप्रायस्य। भूकंपादिना पर्वतात् च्युता गलिताः स्थूला महांत उपलाः प्रस्तराः गंडशैलाख्याः
गंडः कपोले पिटक इति विश्वः शैलानां गंडा इव राजदंतादिः स्थूलोपला इत्युपलग्रहणमुपलक्ष
णं तेन नीलांहश्मौ राजतगंडशैल इति माघप्रयोग उपपद्यते एकं। खन्यते धातुलाभाय खनिः खनि
कष्यंज्यमीतिइः ङीषि खनी धृतगंभीरखनीखनीलिमेति नैषधः। इञजादिभ्य इतीञि खानिः आ
करस्तु खनिः खानिरिति कोषांतरं। खनिरेवमनाख्या निरिति द्विरूपकोषः। आकीर्यंते धातवोत्रे
त्याकरः पुंसि संज्ञायामित्यधिकरणे घः। द्वे धातुरत्नाद्युत्पत्तिस्थानस्य। पादार्वाधःस्थत्वा
त्पादाः पद्यते गम्यते एभिरिति हलश्चेति घञ्। महाद्रीणां समीपे ये क्षुद्रपर्वतास्तेषां द्वे॥ अ
धः पर्वतस्य सन्निहिता भूमिरुपत्यका उपाधिभ्यां त्यकन्नासंन्नाधिरूढयोरिति त्यकन्
यासयोरित्यत्र त्यकन उपसंख्यानमितीत्वाभावः अद्रेरित्यस्य संबंधिमात्रोपलक्षकत्वादन्य

त्रापिसमुद्रोपत्यकाहेमीपर्वताधित्यकापुरीतिभट्टिरितिस्वाम्यादयः। एकं गिरिसन्निहितभूमेः। अद्रेरू

र्द्ध्वमुपरिसन्निहिताभूमिरधित्यका एकमद्रेरुपरिभूमेः॥ धेति अद्रेर्मनःशिलादिर्धातुरस्यतेधत्तेशो

भामितिसितनीत्यादिनातुन्धातुः। आदिनाहिंगुलहरितालकठिनीसुवर्णादिग्रहः यदाहुः सुवर्ण

रूप्यमानाम्राणि हरितालमनःशिला। गैरिकांजनकासीससीसलोहाः सहिंगुलाः। गंधकोभ्रक

मित्याद्याधातवोगिरिसंभवाइति। एकंमनःशिलादेः। गैरीत्तिगिरौभवमित्यण्। आत्मादित्वात्ठञ्

गैरिकंतुविशेषएववर्त्ततेगैरिकशब्दस्यगिरिभवत्वसामान्येपिगिरिभवविशेषएववर्त्ततेगिरि

तियस्यप्रसिद्धिरितिस्वामी धातवोमनःशिलादयःसामान्येनोक्तांगैरिकमेवविशेषतेधातुसं

ज्ञकंसामान्यतोविशेषस्यापिवातुल्यार्थत्वात्धातुशब्दोगैरिकार्थएवप्रचुरप्रयोगीत्यर्थः

तथाहि अकालसंध्यामिवधातुमत्तांन्यस्मान्हराधातुरसेनयत्रतुशब्दः पूर्वोक्तात्सामान्या

दाच्छिद्यते परस्मिन् विशेषेऽव्यवस्थापयति। एकं। निकुंजेत्यत्र कुजि अव्यक्ते शब्दे हलश्चेति घञ् नि
कुंजः कौ जायत इति सप्तम्यां जनेर्डः पृषोदरादित्वान्मकारागम इत्यन्ये। न्यंक्वादेरिति कुत्वाभावः
निरत्रोपसर्गो निरन्तरे निरुक्तये। लतादिपिहितोदर इति अन्तस्थान इति शेष इति भट्टः लतापल्लवतृ
णादिभिराच्छादितगर्भस्थाने शैलवर्तिने इत्यर्थः उदरमिवोदरं इदं पर्वताद्देर्लतादिपिहितस्था
नस्य॥ ॥इति शैलवर्गविवरणं॥ ॥अटेति अटंत्यत्रेति पद्यटिभ्यामवि कृदिकारादिति
ङीष् अटवीयद्वा अटंतीत्यटा अत्र अटावयवः पक्षिणो वेति अटविः पूर्ववत् ङीष् अटवीसं
ज्ञाशब्दत्वादनुपसर्जनादिति स्त्रीप्रत्ययस्य न निषेधः। अर्थेते गम्यते वनत्वेन श्वापदैरिदमित्य
रण्यं अर्तेर्निरिदित्यन्यः। वेपंते कंपंते भयेनात्रवेपितुः लोके स्वश्चेतीनन् कस्त्वौ विपिनं। मृगया
र्थिभिर्गोप्यत इदमिति गाहू विलोडने वहुलमन्यत्रापीति घुत्र्वा हुल्या हूस्वत्वं पृषोदरादि

त्वाद्वागहनं॥ कनतिदीप्यतेकानयतिवाकनीदीप्तिकांतिमतिष्ठुपूर्ववद्युचवा कुल्यादीर्घत्वंकेनजलेन
ननंजीवनमस्यवाकाननंअनप्राणने। वनतिसंभजतेजनानुवन्यतेसेव्यतेवाऽचिवनंगोरादिङीषिव
नीचस्वनीसंभवदत्तपिकापिकेतिनैषधकाव्यात्॥ ॥षट्वनस्य॥ ॥महारण्यमितिसन्महदि
तिकर्मधारयः इंद्रवरुणेत्यादिनाहिमारण्ययोर्महत्वइतिङीषानुकोअरण्यानीद्वेमहारण्यस्य॥ गृ
हेतिगृहस्यारामाउपवनानिगृहारामाः।कुटात्गृहान्निर्गतानिष्कुटाः द्वेगृहोपवनस्य। आरेतिआ
रमंत्यत्रहलश्चेतिघञ् आरामः। उपसमीपेवनंउपवनंप्रादिसमासः। एवकारादकृत्रिमवनस्तु
दासः द्वेगृहसमीपकृत्रिमवनस्य॥ अमेतिअमात्यानांवेश्यानांचगृहारामेह्वन्त्रसहितावाटिका
ह्वन्त्रवाटिकाशाकपार्थिवादिः वेटः संज्ञायांचेतिवुजिवाटिका॥ एकं॥ पुमेतिआक्रीडंत्यत्रेतिआक्री
डः घञ्अमरमालायांतुक्लीवलिंगःयउक्तंज्ञेयमाक्रीडमुद्यानमिति॥ उद्यांत्यत्रल्युट्उद्या

विष्वः प्रमदावनमिति स्त्रिः। एर्के। वी। ति। वीय्यतइति विथ्यावने इगुपधत्वात् किन्। ङी षिबाकृ ल्यादी घत्वं ३

वीथि३

नं। राज्ञः साधारणं सर्वोपभोग्यं राजवनं द्वे राज्ञः साधारणोपभोग्यवनस्य॥ स्यादिति एतदेव राजोपव
नमेव यत्र सावरोधो राजा क्रीडति तत् प्रमदवनं प्रमदानां वनमिति विग्रहे च्छापो रित्यादिना ह्र
स्वः अतः प्रैवीथी वीथि ईस्त्रां तावघनवीथिमिति माघः। अलज् भूषणादौ आङि इरितिरः आलिः
वल संरणे आवलति संहरणो ति पूर्ववहिः आवलिः। पवि विस्तारे क्तिविन्नभिपंक्तिः। श्रिञ् सेवायां व
क्तिवल्लिः श्रेणिः कृदिकारादि ङीषि श्रेणी च पंच पंक्तेः। लेइति अतिनैरंतर्यात् लेखा इवलेखाः लिखे
र्भिदाङ् वा कुल्या कुणः रलयोरेकत्वस्मृतेः रेखाः अत्र सांतरा ला पंक्तिः यथा तरुपंक्तिः सौधपंक्तिः
निरंतरा त्वाराजिः यथा तृणराजी रोमराजिरिति भेदः॥ राजनीति राजेराशिवदिन्न राजिः ङीषि राजी
च द्वे रेखायाः॥ वेतिवनानां संघातो वन्या पाशादिभ्योयः द्वे वनसमूहस्य॥ अंकुर इति उद्भिन निभु
वं क्षिप उद्भित्तन्नूतनेतत्र अंकुरः स्यात् अंकयते लक्ष्यतेनेन अकिलन्हणे मंदुरा वदुरच्छर्न्दूरा

दित्वाद्गूरः अंकूरोपि अंकूरश्चांकुरः प्रोक्त इति हलायुधः हे अंकुरस्य ॥ वृन्त इति वृश्च्यते छिद्यत इति व्र
श्चेः सकृषढोः कसीति कत्वं वृन्तं त्यादृणोतीति वा ऽवृहन्तः । महीरुहो इति जायते मूलविभुजादित्वात्
के महीरुहः शाखी ब्रीह्या दित्वादिभिः । विटपः शाखाविस्तारः तद्योगात् विटपी । पादेन मूलेन रसं पिब
ति पादपः सुपीति कः मूलं वुध्नोंघ्रि नामक इति वध्नते । तां त्यात पमनेन पथिकाः तरंतियां तीमे पुष्प
फलार्थिन इति वा तरुः तरतेर्मरुवड्डः । अनसः शकटस्याकं गमनं हंति अन्येष्वपीति डः अनोकहः ॥
कौ तिष्ठति कुठः पृषोदरादित्वात् कौतिशब्दायते वपन्ही ति कणोष्ठः वा हुल्या दन्येभ्योपीति ठः कुटादि
त्वात् नित्वे गुणाभावः बाहुलकान्नेकादेशः इति वा । सल्यते गम्यते ऽसा विति सलगतौ घञ् सा
लो दंत्यादिः सलति वा धुना चलति हालिति कसं तेभ्यो णइति णो वा पुंसि भ्रूरुह मात्रेपि सालोव
रणा सर्जयोरिति दंत्यादौ राभसादेः । पलाशं पत्रं तद्योगात् पलाशी ॥ इवं तिगच्छंति पथिकाः प

रा·स्कु·२
३०
२३

ल्पिण्श्चाद्रुमिति मिलद्दादित्वाद्रुः द्रुः। द्रुरिति पदमस्यास्ति द्रुः शाखा पितद्योगात् द्रुद्रुभ्यां मः
द्रुमः। नगच्छत्यगमः अगः। नयोः शहन्त्यस्य। वेतिवनस्पतौ भवो वानस्पत्यः पुष्पाज्जातैः फलै
र्लक्षितः आम्रजंब्वादिः पारस्करादित्वात्सुट्। दित्यदित्येति ण्यः पुष्पादिति अपेन्क्षित क्रियापा
दानत्वेपंचमी एकं। नैरिनि अपुष्पाज्जातैः फलैर्वनस्पतिः वनस्पतिर्नो द्रुमात्र रति मेदिनो द्रुमात्रे पिप्पल
सोदुंबरादेः एकं। ओषेति फलपाकेनांतो विनाशो यस्याः सा ओषधिः ओषः श्लोषपर्वते पुराव्रीह्य
लनादीन्निर्वाध्यीयते कर्मण्यधिकरणे वेति किः कृदिकारादिति ङीष् ओषधी फलपाकांतेति
रूपभेदात् स्त्री वंयनौषधयोरजन्यामिति कुमारः एकं॥ स्येतिकृत्वाभ्रोफलानिगृह्णातिधा
रयति फलेग्रहिः फलेग्रहिरात्मंभरिश्चेतीनएकारश्च निपातनात् ग्रहिर्धारणार्थः स्वीकारा
र्थश्च तत्र धारणार्थेहन्तरएवरूढिः स्वीकारार्थे तु फलेग्रहीन्हं सि वनस्पतीनामिति भट्टिः द्वे

राम
३०

तुकालेफलधरस्य॥ वेतिवंधनंवंधः वंधोऽवष्टंभः वंधेफलावष्टंभेसाधुरितिदिगादित्वाद्यत्वंध्यः। अफलः
अत्यंताभावेनञ् अत्यंतफलहीनः। केशोयोनिरितिभारतटीकासर्वज्ञात्तु कृतोविशेषः अवध्यस्तुः केशो
योनिरवकेशः प्रादिसमासः तद्योगादितिः अवध्यस्तुः केशोवकेशश्छिन्नकेशाः तद्धर्मानैष्फल्यंधर्मध
र्मिणोरभेदात् तदप्यवकेशः तद्योगादिनिरितितुवयं अवश्यंक्लेशयतिपुष्पमितिणिनिः पृषोदरा
दित्वाद्वर्णलोपेवा अवकेशी त्रीणिऋतुकालेपिफलरहितस्य॥ फलेतिफलयोगान्मतुप्फलवान्
फलवर्हाभ्यामिनच् फलिनः। अतइतिः फली॥ त्रीणिफलसहितस्यतरोः। त्रेतिजिफलाविशार
णेविशरणंविकासः ञीतः क्तः आदितश्चेतीडभावः निष्ठातकारस्याद्युपसर्गात्फुल्लन्त्रीवक्त
शोल्लाघाइतिलत्वंप्रादिसमासेनप्रफुल्लादिन्नयंउत्फुल्लसंफुल्लयोरुपसंख्यानमितिल
त्वंप्रफुल्लस्फुफुल्लसाधनात्पश्चादुपसर्गात्फुल्लविकसनेप्रपूर्वः प्रवाघ्यविवाउपस

रा.मु.२
३१

गप्रतिरूपकोवाप्रशब्दः यथाप्रदत्तमित्यत्र। आहतोनिहतः कोषोस्मात् आकोषः मूर्द्धन्यांतस्ता
लव्यांतोवाकोमविषयौचेत्सूक्ष्मविवेकात्। विकचंति विकसंति कचवंधने ऽच् विकचः विशब्दो विश्ले
षद्योतकः अव्ययानामनेकार्थत्वात्। स्फुटति विकसति स्फुट विकसने इगुपधत्वात् कः स्फु
टः। फुल्लः अनुपसर्गाद्धिति निपातनं। कसगतौ इत्यंतः क्तः विकसितः दलानामन्योन्यविश्लेषात्
समुदायो विकसित उच्यते विकसितं सितमिति क्लीवकं यमकाद्यन्यमप्यः। एते प्रफुल्लादयो
विकसिते स्युः। अर्वध्यादयो विकसितांतास्त्रिषु त्रिलिंग्याः स्युः वाच्यलिंगा इत्यर्थः। अष्टौ विक
सितस्य। स्थेति हृन्त्वं छेदेपि तिष्ठति स्थाणुः आगुत्कः थेन्वा हित्वा तत्तुरीणत्वं चेति सुभूतिः। स्था
णुवातिरूपभेदात् क्लीवत्वं वानेतिवचनात् पुंस्त्वं। ध्रुवः आगुत्तः। शंकुर्जलहेतुभेदप्रकरणे
एवोक्तः। द्वेणिस्तुदादितिरव्यातस्य।। क्रस्वेति शाखा मूलाग्रगामिनी लता शिफा मूलं ते केव

राम
३१

लेमिल्लिनेवाक्रत्वेस्वर्वयस्यसशाखोटकादिः क्षुपः स्यात् क्षुम्पति वलति लघूपधत्वात् कः पृषो
दरादित्वात् भस्य पत्वं क्षुपः । अग्रेति मूलादारभ्य शाखातः पूर्वभागः प्रकांडः । अविद्यमानप्र
कांडे वृक्षुपत्रवति मिंविकादौ स्तंबगुल्मौ स्यातां स्थ स्तो । बजिति अंब वृप्रत्ययः स्थस्तादेशः
स्तंबः । गुड वेष्टने वा हुलकादूमेवन्मन् डलयोरेकत्वं गुल्मः द्वे अविद्यमानप्रकांडस्य वृक्षु
कोल्याः। अथेति मंकति मकि मंडने पिंनादित्वाहूल वा हुल्लकादन्नुषंगलोपः स्वार्थेकनिमकूलकः

पृषोदरादित्वाउकारेमुकूलक इत्यपिपाठः। निष्ठुर्शास्कुभ्नाति विस्तारयति मूलं स्कुभिः सौत्रोधातुः ततो
ऽचिपृषोदरादिः निकुंभः नियतः कुंभोऽइवमोचनान्निकुंभ इत्यन्ये। दंता भांत्यत्रदीप्यंतेऽनयादंती तिस्वा
मी दंतान् दीपयतीतिक्षातिपद्दिकादित्याद्दिएप्ंतादस्वि ङीपि स्वार्थेकनिवादंतिका। प्रत्यक्श्रेण्युक्ता। उ
दुंवरवत् पर्णमस्या उदुंवरपर्णी। पंचइत्याः तन्मूलस्येत्यन्ये। अजेति अजस्येवमोदोगंधोस्या अजव
दामोदोस्या इतिपृषोदरादिर्वा अजमोदा। उग्रगंधोक्ता। दभतिदभीयंयेपचाद्यच् दर्भः ब्रह्मास्त्रष्टा
ब्रह्मतपोवा दर्भोयंथकोस्या अत्र तद्धीजानामगणे यानांग्रथनासंभवात्। यन्त्रिब्रह्मणोदर्भोस्यां वा
ब्रह्मदर्भी। यौतिमिश्रीभवति अविष्यवः उष्टोयवोयवानी इंद्रवरुणेत्यादिना ङीषानुकौयवानीवच
वानिकाद्वार्थेकन्यछतिक्षियछत्यग्निमांद्यंपृषोदरादिः स्वार्थेकनियमानिकासमकारेतिस्वामी
द्विविधायवानी एकान्नोत्रयवानी अजमोदेभिरव्याता अपरावनयवानीचत्वार्थ्यविशेषेणेतिकश्चि

रा॰मु॰
९४

तद्वयोर्द्वे एवेति सुभूतिः। मूलेति पौष्करे मूल इत्यन्वयः पुष्करमुक्तं। पुष्करवर्णा वर्णिका स्मात सुगंधि
द्रव्यं पद्मगंधिद्रव्यत्वात् पुष्करमिव पुष्करं॥ कश्मीरे भवं काश्मीरं। पद्मपत्रमिव पत्रमस्य पद्मपत्रं स्या
मीदुपद्मवर्णामित्येव पठति। पौष्कर इत्युक्तेस्तद्द्वयविन्यपि पुष्कराख्यः। त्रीणि पुष्करमूलस्य॥ अ
व्येति अव्यथोक्ता। अत्यर्थं वरति आप्नोति दुर्गाभूजा तत्वेन दुष्प्रापत्वात्वरान्प्राणिनो ऽतिक्रांता
वाऽतिवरा। पथ्याभा पद्यते भेषजत्वेन ज्ञायते वा पथ्या। वरति भन्नयति रोगं वारयति गमयति निराक
रोति वा हलकात शकादिभ्यो ऽटन् हद्धिः वारदी। पद्ममिव वरति प्रचरति उपमाने णिनिः वाचकत्वेन पद्म
शद्वं चरितुं आप्तुं शीलमस्या वा पद्मचारिणी। पंचवत्तरापथ्य भवायाः पद्मचारिणीति ख्यातायाः। केतिकं
पिल्लदेशे भवः कांपिल्लः कंपेरिल्लप्रत्ययेन कंपिल्ल इति तु रुढः कं जलं श्लेष्म मत्वात् पील्यति प्र
तिष्टम्नाति पीलप्रतिष्टंभे कंपूर्वाद्विगुपधकः कंपीलः सांकाश्यकां पिल्यशद्वो णयप्रत्ययांताविति

एम
९४

वामनः वुञ्छण्णेत्यादिना संकाशादिलक्षणे ण्यप्रत्यये कांपिल्यो ध्रुत्यादि त इति न्यासः। रूक्षपत्रत्वा
त्कर्कशः। रोगापनयनेन ह्वारेना वेंद्रः॥ अस्य चूर्णं सिंदूरवद्रक्तमिति रक्तांगः। अत एव रोचते भाति रोच
नी कर्त्तरि ल्युट् स्वामी तु रेचनीति पठति। पंचवर्णाग्वेद्यख्या नायाः सुंडारोचन्याः। प्रेतिप्रकर्षेण पु
मांसं नालयति सुरभयति णल गंधे ण्यंतात् कर्मण्यण् संयोगांत लोपः मकारस्य परसवर्णत्वेन न
कारः डलयोरेकत्वेन प्रपुन्नाडो द्विनकारः प्रपुनाति प्रपुनन्निति वा प्रपुनाड इत्येकनकार इत्यन्ये
एडवत् मेषवत् फलद्वारेण गजति शब्दायते ऽत्र एडगजः मेषाकृतित्वाद्वेडव इज्यते शब्यतेऽस्मा
दिति वा। दर्दुं हंति अमनुष्ये ति टक् दद्रुघ्नः हृत्वभ्रादित्वात् सत्वाभावः। चक्राकारत्वाच्चक्रं दर्दुं मर्द
यति चक्रमर्दकः। पद्मंगज विंङुः तत्रास्योपयोगात् तटति आप्नोति शरद्युग्मात् हिमे च विलया
त् पद्मटमटत्यनुगच्छति वा पद्माटः। उरणस्य मेषस्य याक्षा आख्या नामास्ति तन्नामाय मित्यर्थः उरणा

रा॰मु॰२
९५

न्हितुल्यपुष्पत्वात् उरणान्हाइतिस्वाम्यादिः षट् एलाचीतिख्यातस्य। पेतिपलतिरक्तनिरोगात् पि
पर्त्तिर्यातूनुवावाडुलकात् पलेरांडुः पलांडुः। शोभनंकंदंमूलमस्यकपुस्तुकंदकः। द्वेपलांडोः। ले
तिहरितेभ्यामेतत्रयपलांडौलतयाअर्क्यतेस्तूयतेयन्मलनार्कः। डुडुष्टोडुमोऽपवित्रत्वात् डुडुमः। द्वेह
रितवर्णपलांडोः। अथेतिवहुरोगहरत्वात्महौषधं। अम्नातिरोगं असोर्लश्चेतिउनन् आदेर्लोदेशश्च
लशुनं तालव्यमध्यं कोशाद्वेत्रा विनाञालेशलशुनपश्नांभुशीतांशावइत्सूक्ष्मविवेकात्। गृंजनंतिकु
त्सितंशब्दायते गृंजयति कुत्सितंशब्दंजनयति गृंज्यते कुत्सितंशब्द्यतेवाकर्मणिल्युट् गजगजिगृ
जीत्यादिशब्दार्थः नंद्यादित्वात्ल्युः गृंजनः। अरिष्टउक्तः। महत्कंदंमूलमस्यमहाकंदः। रसेनल
वणेनरसेनैकेनोनः पंचरसत्वात्कनिरसोनकः। षट्रसोनस्य। पुनरितिपुनरभीक्ष्णंनवातस्याश्छे
देपिपुनरुत्पत्तेः सुपसुपेतिसमासः क्षुभ्नादित्वात्णत्वाभावः पुनर्नवा। शोथंहंतिपूर्ववट्ठकाडी

रा॰मु
९५

पोशोथमी। हेमुनर्नवाया॥॥ वीतिविठुन्नमुक्तं। सुष्ठु निषदनं स्वापो ऽस्मात् सुनिषस्सकं। हेसुरुसुनीति ख्याताया॥। स्यादिति निराकर्तुं वातं शीतलउक्तः नामद्वये नैकं नाम यथाह धन्वंतरिः शणपर्णी शीतल वातक इति ह्यर्थेव। अपराजिता शीतलवातको गिरिः कर्णिका चेति स्वामी। अशानपर्णीति सर्वधरः शणपर्णीति स्वामी। नकेनापि पराजिता ऽपराजिता। अशनस्येव पर्णमस्याः पाककर्णेति ङीष् अशानपर्णी वा शानपर्ण्याः। येति पारावतांघ्रिरिव अंघ्रिर्मूलमस्याः पारावतांघ्रिः साहचर्यात् स्त्रीत्वं। कटत्याहणोति कटे वर्षावरणयोः अच् कटो वेष्टः तं भजते ऽन्येभ्योपीति डः गौरादिः कटभी। पण्यारक्तान्या ऽप्याद्दित्वाद्यतइत्वं च पिण्या। अस्माभपुष्पत्वात् ज्योतिष्मती। लतोक्ता। पंच ज्योतिष्मत्याः। वेति वर्षासुभवं ढक् वार्षिकं। रोगात्त्रातुं शक्ता चानश् त्रायमाणा। आत्मनेपदमित्यत्वात् रोगात्त्रायंती। भद्रयति भद्रिका बलेभद्रिका वलभद्रिका। चत्वारि त्रायमाणा रम्यबणिक्ड्कस्य।

रा॰मु॰२
९६

वीति विष्वक्सेनस्य विष्णोः प्रियत्वात् विष्वक्सेनप्रिया। गर्षति हि नस्त्रिरोगं गृष्वहिंसायां क्तिन् गृष्टिः
घृष्टिरिति च पाठः। अथ गृष्टिः सकृत्प्रसूतगवीवदरयोः स्त्रियां। घृष्टिः स्त्री घर्षणस्पर्द्धी विष्णुक्रांता
सुनाक्तिरा वितिमेदिनिः। वराहजंघाकृतिपत्रयोगात् अन्यो क्त्वाध्वणिवाराही वराहरूपविष्णुप्रियत्वा
द्वा। वदति पुनः पुनः वराहजननात् वदस्यैर्घ्ये ऽत्रुवदं मूलं तद्वाति आतइति केवहरा। चत्वारि वराह
क्रांतायाः वामाराक्षुइतिरव्यातस्येति सुभूतिः। मेति मंक्वचते मं छ्रते केशा हिरनेनेति मकिमंडनेष्टषो
हरादिः मार्कवः। इवद्वारेण भृंगवत् केशकृष्णीकरणात् भृंग इव राजते भृंगराजो ऽदंतः। स्यान्मार्क
वो भृंगराजः सुजागर इति रभसात्। घजर्थे के भृंगराजो ऽदंतः। ये मासमेकं प्रपिबंति चूर्णं दिने दिने
भृंगरजः समुत्थमिति वैद्यकात् सांतोपि। द्वे भृंगराजस्य। केतिकाकं मचति फलाशनेकाकध्वा
रणात् सविधारणो छ्रायप्रजनेषु कर्मण्यण्। ङीप् काकमाची काकवन्मचति वर्णेन संष्टबातइ

भृंगराजो

राम
९६

[illegible] वायाः [illegible] सुधुनिः दर्नेखार्योऽस्मात्सुनिष्कण [illegible]
[illegible] याः स्याद्विन्नि [illegible] तिवा। अतएववायसयोगात्स्योत्नाद्यणिवायसी। द्वेका
कमाच्याःकांडञ्चाइतिख्यातायाः। शोतिशतंपुष्पाणिपस्याः सहसृकांडेत्यादिनाऽजादिपाठाद्दापुश
तपुष्पा। छत्राकारत्वात्पुष्पं छत्रंसितंसंवद्धं छत्रमस्यांसितछत्रा। पुष्पैश्छत्रमतिक्रांताऽतिछत्रा।
मधुरामिसी उक्ता। अवाचिपुष्पाणयस्याः पाककर्णेतिङीष्ट्रवाक्पुष्पी। कारोः शिल्पिनइयंका
रवी। सप्रसुप्तेपेतिख्यातायाः। सेभिवातकृतांगसंकोचेसरतिविनिवर्त्तते ऽगमनयावहुत्वमन्यत्रापी
तिप्रसृमरणा। ल्युटिसरणीत्यपिसरणासरणीचार्वीकटंभरामहावलेतिरुद्रः। प्रसार्यतेऽगमन
याप्रसारणी। तस्यांसरणायांकटंकिलिंजाकारंपर्वणिविभर्त्तिसंज्ञायांभृतृवृजीत्यादिनाखच्कटंभ
रा। कघतेसिच्यतेघञर्थेकः कटंरेतस्तद्दृष्यत्वाद्बिभर्त्तिपुष्पातिपूर्ववत्खचिवा। वलावलप्रदा

रा.सु.२
९७

स्नासु सुरखारा जवल्ला पृषोदरादित्वे राजदंतादिः। अतएव भद्रं कल्याणकरं बलमस्या भद्रबला। पंच
गंधभा दालिश्चा इतिख्यातायाः। जनीतिजायते आरोग्यमनया जनिघसिभ्यामिन् जनिवध्योश्चेति
वृद्ध्यभावः कृदिकारादिति ङीषि जनी जनिश्चेति स्वामी। जनेरुलुकादयश्चेत्यूकन्नूतकारश्चांतादेशः
जतूकेति पुरुषोत्तमः जतुशब्दात् संज्ञायां कन् जतुका च। रजनी उक्ता। जतुं करोति जतुकृत् क्विप्। चक्रं
दर्दुं वर्तयति चक्रवर्तिनी ग्रह्यादित्वात् णिनिः पारिमांडल्यात् चक्रमिव वर्तितुं शीलमस्या इति वा।
सुगंधित्वात् सम्यक् स्पृश्यते कर्मणि घञ् संस्पर्शा। षट् जनीत्येव वैद्यकख्यात सुगंधि इमस्य
अथेति शटति व्यवसादयति दोषान् शटति विसरति गंधोस्या अचि गौरादिङीषि शटी रुजा विसरणगत्य
वसादनेषु अच् इ शटी षडित्यस्यानुकरणात् षष्ठी सूर्ड्यादिरिति स्वामी। गंधयति गंधं अच् गंधं
गंधयोगा। ह्यागंधं मूलमस्या गंधमूली। षट् वहवो ग्रंथयोऽस्याः कपि षड्ग्रंथिका। सौरभाधाने

रा.सु
९७

नकंसुखंमवेतिग्राप्नोतिखर्जिपिंजादिभ्यऊरोल्चावित्स्वरःशर्कंध्वादित्वात्पररूपत्वेकर्कंधूरीदीर्घमध्यो।
ऋस्वमध्यस्य।सतुपलाशश्चोक्ताःपंचशाखाः।केतिकारेणनिश्चयेनवेल्लतिवाल्पयतिकारवेल्लःक
स्यसुखस्यारोगमनंतंवेल्लयतिवेल्लचलनेकर्मणिअणिवा।सहितिक्तत्वात्सुखागमंनिरस्यतिक
टिंल्लातिकटिल्लःकटत्याहरणोतिवेतितुष्टपोदरादित्वात्छिलत्वमितिस्वामीकनिकटिल्लकःवाहु
ल्लकात्कटेरिल्लइत्यन्ये।शावंगतौतालव्यादिःअवुसुशवीत्युपाध्यायसर्वस्वमितिसुभूतिःसवति
प्रेरयतिदोषानितिअचिपत्वेङीषिसुषवीतिस्वामी।जीणिकारेल्लाइतिख्यातलतायाः।अयेति
कौलयतिसंस्त्यायतिसंहतीभवतिइगुपधत्वात्केकनिकुलकं।पाटयतिदोषानुपटेरंतराभौवित
एयर्थात्कपिगडिकटिपटिभ्यश्चोलच्पटोलः।तिक्तएवतिक्तकः।पाटयतिदोषान्फलिपाटिन
मिजनामित्युःपटादेशश्चपटुः।चत्वारिपरोल्वाइतिख्यातस्य।कुष्मेतिकोकूष्मणाअनितिप्राणि

तिजमंतात् डः नैरुक्ते ह्रस्वेकनिकूष्मांडकः कुत्सितऊष्मां ऽडेषुबीजेष्वस्य पित्तकारित्वात् कूष्मां
डो दीर्घाकारवानिति लुस्वामी। कर्कवर्णि मियर्त्तिवा हुलकात् हकवापाजिमीत्युणिकर्कारुः। द्वे कू
ष्मांडस्य इर्वेति पूर्ववद्दत्तैरुणः आरुः रलयोरेकत्वस्मृतेरालुश्च इत्यादिरयं। इरुं बीजं प्रवन्तात
इरोबीजस्यारुश्चीपकइत्यर्थाइति शावरस्वामी। तुर्यस्वरादिरीर्वारुः कर्कघांपछते वुधैरिति
शाद्विकाः। इर्वारुकेत्यादिः स्त्रियांपुंसिवगन्मतोधुरस्कारिर्वारुः कर्कटिः स्यादिति पुंस्कांडेरत्न
कोषात् नैरुक्ते इकारस्योत्वे उर्वारुरिति च। एकं कर्कवर्णमटति प्राप्नोति शकंध्वादिः डीषि कर्कटी। द्वे कर्क
ट्याः। इक्ष्वेति इन्धुमकति प्राप्नोति मित्रघ्वादित्वात् कुः अत आत्वं वक्तवापाजिमीत्युणि वा इक्ष्वाकुः
अयं हि इन्धुत्त्वेत्रे प्रायेण भवति इन्धुं चवेष्टयति स्त्री लिंगोयं इक्ष्वाकुः कटुतुंबी स्त्री सूर्यवंशे नृपे पुमा
निति मेदिन्यादेः। तुंवन्यर्दयति रु विंतु बिअर्दने इः हृदिकारादिति डीष् कटुतुंबी चेति कटुतुंबी। द्वे ति

तीरणा वामो॰

क्तालाम्बूः। त्विति तुंबेरवुङीषू तुंबी। अलाबुस्कपिंडफला तुविस्कंवी महाफला तुंवा तुवर्तुलाला वूर्निम्ब वूर्णा
तुल्ला वुकेतिवाचस्पतिः अला वूस्कंवकः प्रोक्तइति वंड्ः। शिवा विषाणतुंवेस्त्विति सुश्रुतोक्तेः तुंवोपि जलेपिन
र्लवतेनमज्जति अलाबूः नञिलंवेर्नलोपश्चेति उप्रत्ययोणित्व नलोपश्च णित्वात् वृद्धिः अलाबूः। द्वे अलाब्वाः
।चित्रेति चित्रोक्ता वहुरेखायुक्तत्वाच्चित्रा। गवाक्षतुल्याकारत्वात् गां भुवमक्ष्णोति व्याप्नोति वा अक्षूव्याप्तौ
कर्मण्यण् गवाक्षी। गां भुवं डुंवयति अर्दयति तुवि अर्दने अण् गोडुंवा॥ त्रीणि वांगीतिख्यातककटीविशेष
स्य। वीति विशालाग्रुणमहत्वात्। इंद्रवरुणप्रियत्वात्तयोरियं तौ देवते अस्या वा अण् उत्तरपदस्य चेत्युत्तरप
दवृद्धिः इंद्रवारुणी। द्वे गोरक्षकाकडीतिख्याताया॥ अर्शोघ्न इति अर्शांसि हंति पूर्ववट्टक् अर्शोघ्नः। सूर
ति हिनस्ति अर्शांसि सूरी हिंसायां बहुलमन्यत्रापीति युच् सूरणास्तालव्यादिः श्योनाकः सूरणः श्रो
णः श्रिन्नाश्यामावशेवधिरिति शभेदात्। स्रूयते प्रेर्यते स्रूरण इति स्वामी वाहुलकात् रजः क्युन् रूक्ष्म।

गमः सूरणः कंद्यते॰ न्विष्यतेकंदयतिरोदयतिवाकदिकदिभ्यां क्वानेरोदनेव घञिभ्र विचकंदः। त्रीणिश्रोलइति
ख्यातस्य॥ गंडीतिगंडीनिग्रंथियुक्तान्यंगानीरयतिगंडं रोगविशेषं वा॰ एरगंडीरः। सम्यगस्थिवीजंल्लाति
समष्ठिला पृषोदरादिः॥ ढेसमठ इतिख्यातस्यानूपजशाकस्य॥ केतिकडतिमदयतिकडमदे क्वकदिकडि
कटिभ्यो॰ वद्रुडीषु डलयोरेकत्वस्मृतेः कलंवीकेनलेलंवतेप चाद्यच्। कलंवीतुशतपर्वीकलंवूर्वासुवील
धइतिवाचस्पतिः। उपशब्दोधिकार्थः उपाधिकमुदकमस्यां उत्तरपदस्योदादेशः शेषादितिकप् टाप् इत्वं
च उपोदिका। मूलतिप्रकर्षेणतिष्ठतिमूलप्रतिष्ठायांकन्नादिभ्यो वुन् मूलकं मूलरोहणेवुरादिः प
चाद्यच् ततस्थूलादिभ्यः प्रकारवचनेकन्निति सर्वधरः। हिल्लहावकरणेघञर्थेकः हिल्लरतिंश्रतिति
कत्वात् हिलात् वीर्याद्वामोचयति हिलमोचिका ण्वुल्। वासयतीतिउलूकादयश्चेतिवस्तेरूकं वतुइव वा
स्तूकंवास्तकभवत्वाद्वादीर्घमध्यं ह्रस्वमध्यं च। रम्यावास्तववास्तुकस्तव किनाइतिप्रयोगात्। कलंव्यादि

वास्तूकांता॥ शाकभेदाः स्युरिति संबंधः। दूर्वेति दूर्व्यते हिंस्यते पशुभिरिति दूर्वति हिनस्ति दुर्निमित्तं वा दुर्वी हिं
सायां कर्मणि घञ् अच् वा उपधायां चेति दीर्घः टाप् दूर्वा। शतं बहूनि पर्वाण्यस्याः डाप् कन् सपूर्वत्वं च श
तपर्विका। वीर्यप्रभावः बहुप्रभावत्वात् सहस्रवीर्या। भृगोरियं भार्गवी। पादाघातादिना च्छेदेपि पुनरु
त्पद्यते इगुपधेति केरुहा। अत एव दूरक्षाप नाद्या अनंता। षट् दूर्वायाः। श्येति सा दूर्वा सिता शुक्ला।
गोः पृथिव्या लोमानीव गोलोमाकारत्वात् गोलोमप्रभवत्वाद्वा गोलोमी। शतं बहूनि वीर्याण्यस्याः श
तवीर्या। गंडं व्रणभेदं अलति वारयतीति कर्मण्यण् णिङीप् गंडाली। शकुलान्हीव ग्रंथिरस्य शकुलस्येव वा
न्होव्यवहारोस्येति वा शकुलान्हकः। चत्वारि शुक्लदूर्वायाः। पूर्वे द्वे सितदूर्वायामपरे द्वे दूर्वाभेदस्य यो
वा इति रमानाथस्येत्यन्ये। क्षितिकुरुदेशं विंदतीति प्रायेणालभ्यते तत्र प्रायभवत्वात् अनुपसर्गात् क्षिप विंदे
ति श शः कुरुविंदः। मेघनामा मेघपर्यायनामक इत्यर्थः। मुस्यति खंडयति रोगं मुस्यते खंड्यते वा कर्मणि

१००

क्तः आगनित्यत्वादिडभावेवा कुलकान्तः मुस्तास्त्वार्गेक निके ऽण् इति कखत्वेच मुस्तकः मुस्तकं। वत्वारिमु
स्तकस्य। स्यादितिभद्रयतिभद्रः ततः कर्मधारयसमासः। भद्रमपिनामास्यभद्रं स्यान्मंगलेहेम्निमुस्तकेक
रणांतरेइतिरुद्रः। गांजलं ड्ठातिगच्छतिगुदक्रीडायांवा कुलकात्स्फायीतिरक्तनुम्रचगुंद्रोक्तःव। हेनागर
मुथाइतिख्यातस्य। चूडेतिचूडाकारमंतरीयोगात्तांलातिवाघन्तेघ्राणिस्यादितिलत्वचूडाला। चक्रांग
त्वात्तवक्रमिवफलमस्यावाष्टघोहरादिभ्वक्रला। उद्घाटयतिरोगान्अद्वदापुउद्घटा। त्रीणिउद्घटमूलस्य
छातिआमुथाइतिख्यातस्य। वंशइतिवमत्युद्गिरतिकरी रंद्व्हम्इवमिकुम्भ्यःशाक्वंशः। त्वगेवसारोस्य
त्वक्सारः। कर्मव्यापारमियर्त्तिप्राप्नोतिकर्मारः कर्मण्यण्। त्वचिसारउत्कृष्टोद्दढत्वात्स्थिरइति
घञ्हलंतादित्यलुक्त्वचिसारः। तृणानांध्वजोमुख्यः तृणध्वजः। शतपर्वोक्ता। यवइवफलमस्ययव
फलः। रणतिशब्दायतेमृगघादित्वात्कुः एत्वंवोपधायाःरेणाजिग्रक्षातिकामंजमयतिवेणगतिज्ञा

रामः
१००

नयहणेषुवा हुलकादुर्वावेणुः वयंतिशोभंतेस्वनेनवीधातोर्बेन्वादयश्चेतिणुः णत्वंव वेणुरितिसुभूतिः। मा
क्रियतेवायितेनेनपुंसीतिघः मस्करमस्करिणाविन्यनेनसाधुत्वंमस्करः। तेजयतिशानयतिदात्रादिकंतेज
यत्यग्निंवातेजनः नंघादित्वात्ल्युः दृश वंशस्य। वेणोतिये वेणवः कीलद्विभिः कृतरंध्रापंक्तयोऽनिलेनोद्ध
ताश्चालिता अतिदीर्घतया आपूर्यमाणावास्वनंतः शब्दं कुर्वंतितेकीचकाः स्युः अस्वनंतोपियोग्यतया।
कीचकाउच्यंतेयथा अपवंतोपिपाचकाइति चीक्यंतेसमीरणेनस्पृश्यंतेशीकचीकआमर्शनेकृञा
दिभ्योवुन्‌ आद्यंतविपर्ययः पृषोदरादित्वात्कीचकाः। एकं। ग्रेतिवंशप्रस्तावात्ग्रंथ्युक्तेरवः। ग्रंथते
कुटिलीभवतियथिकौटिल्येग्रंथेरिः ग्रंथिः। पर्वतिपूरयतिपर्वपूरणेवाहुलकान्नहषितन्नीतिकनिन्‌
पर्व। पिपर्त्तीतिपरुः अर्तिपृवसीतिउस्तिः वाहुलकादुप्रत्ययेपरुरुदंतश्च। मन्नासारोग्रंथिः परुःपरा
गः कुसुमरेणुरितिपुंस्कांडेरत्नकोषात्ग्रीणिग्रंथेः। गुंडइतिगुदक्रीडायांवाहुलकात्स्फायीति

रकृत्तुम्युंडः। तेजनउक्तः। शृणातिहिनस्तिशरः हंत्यसश्चेसरः। सास्कमुंजोवाणाख्योगुंडस्तेजनकः शर
इतिवाचस्पतिः। त्रीणिशरमुञ्छस्य। नेतिनडतिगहनंकरोतिनडगहने ऽच्। नडः। धमत्यंतः सुषिरंधमेः
सौत्रधातोर्नंद्यादित्वात् ल्युः धमत्यनेनाग्निंवाध्मोधमश्चेतिनप्रत्ययोधमादेशश्च धमनः। पोटेनवायुसं
श्लेषेणगलतिनश्रोभवतिअच्पोटगलः। त्रीणिनलस्य। अथेतिकाशतेदीप्यतेकाशृदीप्तौतालव्यांतः।
अच्काशंकाशीकाशश्चतृणवाचकइतिशब्देदः गौरादित्वात्काशीच। इन्द्वगंधोक्ता। पोटगलश्चोक्त
त्रीणिकाशस्य। पुमितिवलतेभुवंवेष्टयतिवलसंवरणेउल्वादित्वात् द्वप्रत्ययेवल्वः पर्वतः तत्रजाता
वल्वजाः वलतेइतिवावल्ना। किप् वजतिवजः कर्मधारयः स्वभावाद्बहुत्वेवल्वजाः एकोवल्वजइतिभा
ष्यकारवचनादेकत्वमपि। एकंवावई इतिख्यातस्य। रेतिरसालउक्तः। इष्यतेऽसाविति इक्षुः इषेः क्सु
ईप्सु नेवाईन्हेरसुनपृषोदरादिः इक्षुः। द्वेइक्षोः। तेतितभेदा इक्षुभेदाः। पुंड्यते खंड्यतेपुडि खंडनेस्फा

यीत्यादिना रक्तपुंड्रः अत्राद्यगिरिपौंड्रः पुंड्रेन्द्रोपुंड्रकः सेन्यः पौंड्रकोऽतिरसो मधुरितिवाचस्पतिः। कांतं रसभिघर्त्ति अणततः कन्नुकांतारकः। हे। आदिना कोषकारादियहः। स्यादिति विशिष्टजनमीरयतिसूर वीरविक्रांतोत्सुः वीरणं। विशिष्टं वीरयति अव्वीरं तनस्तर पृवीरतरं। हेवीरणाद्रितिख्यातस्य। मूलेइति अस्य वीरणस्य मूले उश्यते काम्यते संतप्तैः वशाकांतौ वशेः कि दितीरणं कित्वात् संप्रसारणं उशीरं वा कुत्सकात् षत्वे मूर्द्धन्यमध्यं वेत्यन्ये इति सुभूतिः उणादिहन्नोचुतालव्यशो मूर्द्धन्यषश्चायमुदाहृतं। अ भयं रोगभयहरणात्। नलंध्यति निराकरोति शैत्यातिशयात् नलदं। अत एव सेव्यं सेवार्थहं। मृणाल मिवसाहश्येन जितिम धुमाधवी। मृणालं नलदे क्लीवमिति मेदिनेः मृणालं वा नः अतो मृणालमिति स्वरूपार्थे नञ् अमृपवत् अतो मृणाला मृणालयोः मृपामूयये रिवपर्यायत्वमिति तु वयं। आयेणा जले आशेते जलाशयं। लातिदोषानू मज्जास्य लाते र्विवृस्वार्थे कः लामज्जकं। लघुलीयते ऽवृ

लघुः शोभनोलयः संश्लेषोवास्यलघुलयं। लामज्जकं सुवासं स्यात्स्मृणालं लयं लघुविसुक्रतानु
मस्तमपिनामद्वयं। अवहीनोदाहोस्मात् अवदाहं। अवदीयतेदाहोऽनेनेत्यवदानमिति तु स्वामी। इ
ष्टकापथमगुम्मवत्मोऽस्यइष्टकेवसुदृढः पंथा अस्यवा इष्टकापथं। अवदाहेष्टकापथमिति नामद्व
यमित्यन्ये। लामज्जकं लघुलयमवदाहं। अवदानमिंद्रगुप्तमवदाहेष्टकापथे इति वाचस्पतिः। इश
वीरणमूलस्य। नेति नलादयो येऽन्नोक्तायेवानुक्ता गर्मुत्श्यामाकादयस्ते तृणत्तृणाशब्दवाच्याः तृणप
तेऽद्यते पशुभिरिति तृणं अदनेघजर्थेकः तृणं गीर्यते गर्मुत्स्योमुड्वेति ति प्रत्ययोमुड्चागमश्च ग
र्मुत्स्यण इति ख्यात स्यै तृणधान्यविशेषः। श्यैङ् गतौ पिनाकादयश्चेत्याकोमुट्चश्यामं वर्ण
मकतिवा श्यामाकः सामाइतिख्यातः श्यास्तुधूस्रोम कन् श्यामकोपिवेति हलायुधः। प्रमुखशब्दा
दन्तराः कुशादयो मवहिता अर्कगुकोइवादयो गृहीताः॥ अस्त्रीति कोशते अन्येभ्योपीति डः कु

शं।कुथप्रतिभावेइगुपधज्ञेतिकः कुथः। दृभ्यतेदृभीग्रंथेदर्भः घञ्।पुनात्यनेनपुवः संज्ञायामित्रपवि
त्रं।चत्वारि कुशस्य।अथेति कुत्सितं तृणंकत्तृणं तृणेचज्ञा [illegible] नाविति कदादेशः।पु
रेभवं पौरंशोभनोगंधः प्रयोजनमस्य ठक्सौगंधिकं।ध्यायतेपशुभिर्ध्यामं इषुयुधींधीत्यादिना वा हुल
कान्मक्।देवैर्जग्धमिवजर्जरत्वात्देवेनरामेणजग्धंवादेवजग्धं।रोहतिरुहेर्हि द्विश्चेति टिषत्हर्द्विश्चरो
हिषं मूर्द्धन्यांतं कत्तृणेरौहिषं क्लीवंपुंलिंगोहरिणांतरइति मूर्द्धन्यांतेरभस ॥ षट्रामकर्पूरेतिख्यातसु
गंधिद्रव्यस्य।छत्रेतिछत्राकारमूलपत्रमस्तकत्वात्छत्रा।अतिक्रांतश्छत्रमतिछत्रः।पारुष्यात्छत्रा
तिछत्रइत्येकंनामेतिस्वामी।पालयतिपालंभवनन्हेत्रं तद्धंतिसस्यजननासमर्थंकरोति अमनुष्यति
ठक्पालघ्नः।त्रीणिमूलेपत्रेवचाकृतेः छातियाइतिख्यातजलतृणस्य।मालेति।मालारूपं तृणं
मालातृणं स्वार्थेकन् मालातृणकं।भुवस्तृणं स्तृलग्नंवातृणंभूस्तृणंशाकपार्थिवादिः पौस्करादि

१०३

त्वात्सु इत्स्वामीनुकच्चातिकच्चादिभिः सह भूस्तृणं तत्पर्यायमाह। रामकर्पूरं वकुपत्रकां उंकर्पूरगंधसुगं
धि इदं च शतपुष्पिकावडतत्कटगंधं भूलग्नं च भवतीत्यनयोर्भेदः। शोतिशास्पतेशसुहिंसायांनीपादयइति
यः शस्यमितिटिप्पनी सुष्पतिसुषेर्वाष्पाहित्वात्पः उकारस्यात्वं चेति शाष्पमितिसुभूतिः। वालपति
अवृत बनत त्तृणं चेति विग्रहे वाल्तृणं। हेनवत्तृणास्य। घेतिघस्यतेः घतेपशुभिः घासः। योतिमिश्री
भवतिदं तेः पशुभिश्चर्णेवेनसवदसत्र अतएवयवसः। यवसमंतस्यादिपुंलिंगोपीतिमधुमाधवी। हेय
वाघदनीयात्तृणविशोषस्य। तृणमितित्तृणपत्ते घतेपशुभिः तृणं पूर्ववत्। शुल्कवर्णात्वात् अर्जुनं
हे तृणमात्रस्य। तृणेतित्तृणानां संहतिः समूहः तृणपापाशादित्वाद्यः एकं तृणासमूहस्य। नड्वेतिपू
वे वद्यः नड्या। एकं न डसंहतेः। तृणेति तृणराजाक्यइति तृणराजपर्यायनामेत्यर्थः। तल्पतेप्र
कर्षेणस्थीयतेनेनघञ् तालः तलप्रतिष्ठायां भौवादिकात्पचाद्यचितलस्य। हेतालहन्तृस्य। ने

राम
१०३

२३

तिनारिकान्नालयुक्तान्पुष्पादीनर्ईरयतिकर्मण्यण्नारिकेलःकपिरिकादिःनारिकेलीमहावीरैरि
वनारिकेलीवनैरितिवासवदत्ताश्लेषःनारिकेलीफलंभइतिपूर्वकविप्रयोगःलांगलाकारवल्लित्वात्।
लांगलीङीषंतालांगलीनांतइतिसर्वधरोध्रांतः। ट्वेनारिकेलस्य। घोंटेतिघोंटाउक्ता। पवतेछ्वापूरवडि
ग्योगकृपूगः पूज्यनेमान्यतेसेचनादिनाफलद्वारेणानेनवाघजिकुत्वेपूगः। क्रामतिन्द्वितपतिदुषव
शोकौहूरमूर्द्देक्रामतिवावाहूलकात्भ्हन्टइन्त्यादिनाडः स्वार्थेकनक्रमुकः। पूमुरीषोत्सर्गेगुवंत्यने
नस्त्रंसकत्वात्पिनादयश्चेत्याकावाहुलकाद्गुणाभावः उवङ्गुवाकः अन्येषामपीतिदीर्घेत्वेगुवा
कोपिचगुवाकइतितारपालः। खानीडियाणिपूरयत्याप्यायपतिपरीआप्यायनेइगुपधत्वात्कः
ट्टपालनपूरणयोरित्यतोऽस्विउदोष्ठ्यपूर्वस्येत्युत्वेरवपुरः। पंचगुवाकस्य। अस्येतिअस्यपूगस्यफ
लंउद्दिशंतेचलंत्यनेनतत्त्वद्विकारजननात्घञ्कुत्वंच उद्वेगं। एकंपूगफलस्य। एतइतिएतेवताल

नारिकेलपूगास्त्रयो हिं तालचतुर्थाः खर्जूराद्याश्चत्वारः अष्टावेतेतृणद्रुमाः तृणजातीयाद्रुमा इत्यर्थः तृ
णत्वप्रधानाद्रुमा वा। हीनोऽल्पपरिमाणस्तालो वृनैरुक्तो दीर्घेकारस्य ह्रस्वेकारः नकारांत्याकारस्य च
नाशः हिंतालः। खर्जमार्जने खर्जिपिंजादिभ्यऊरोलचौ विन्ररः खर्जूरः गौरादित्वात् ङीष् खर्जूरीवन खर्जू
रीति ख्याता। केतयति निवासयति कितनिवासे रोगापनयने च कृञादिभ्यो वुन् गौरादिः। केतकी। तालयु
तितल प्रतिष्ठाघाते चुरादिण्यंताद् इ अल्पत्वविवक्षायां ङीष् ताली॥ ॥इति वनौषधिवर्गविवरणं समाप्तं
॥ ॥सिंह इति हिनस्ति मृगान् गजांश्चेति हिसि हिंसायामित्यतः पचाद्यच् पृषोदरादित्वाद् घं न
वर्णविपर्ययः सिंहः। वन्याः पशवो मृगास्तेषामिंद्रो राजा तेष्विंद्र इव वा मृगेंद्रः। पचति विस्तार्यत इ
दं पचि विस्तारे कर्मणि घञर्थे कः भावे घञि अर्शआद्यच् विपंचं विस्तारयुक्तमित्यर्थो वा पंचं विस्तृतमा
स्यं मुखमस्य पंचास्यः। मुखं ततपादाश्चत्वार एते पंच करिकुंभदारणक्षमत्वात् पंचास्यानीव यस्य

पंचास्य इति तु सुभूतिः। हरिणी पिंगले अक्षिणी अस्य बहुव्रीहाविन्यादिना षच् समासांतः हर्यक्षः। केशिरसि
सरंति केसरः स्कंधदेशस्थशटाः सवित्ककिसलयकेसरसभा इति सभेदात् केसरो दंत्य सः तद्योगादिनि केस
री केशे लातिरलयोरेकत्वस्मृतेः तालव्यश्चायमिति त्वन्ये केशरी। हरतिमृगान् अचरः हरिः। कंठीरवभीमवि
क्रांतकरिमाचलमरुत्पत्रपंचशिखशैलाटपारीन्द्रश्वेतपिंगलाहृयोप्यत्रबोध्याः। षट् सिंहस्य। शेतिष्ठ
त्याति हिनस्ति प्राणिनः मूह हिंसायां खर्जपिंजादिभ्य करोलचौ वा हुलका डुगागमो णित्वं च बह्वृचो शार्दूलः
। द्वीपं चर्मेत द्योगात् द्वीपी द्वीपं जलमध्यस्थलमाश्रयत्वेनास्त्यस्य वा। आजिघ्रति व्याघ्रः न संज्ञाया
मिति निषेधात् पाघ्राध्मादिश प्रत्यया भावे घ्रात श्चोपसर्गे इति कः व्याघ्रः। कश्चित्तु चित्राल्पत्वानल्पत्वकृ
तं द्वीपि व्याघ्रयोर्भेदमाह तत्राल्प चित्रको व्याघ्रभेदो द्वीपी स्यात् तथा महाभारतं द्वीपी व्याघ्रत्वमागत
इति त्रीणि व्याघ्रस्य। नेतितरं मार्गं न्तिणोति रुरा छ्विनरेणोत्फालेन न्क्षुणत्ति वा क्षुदिर संपेषणे पूर्ववद्

रा॰मु॰२
१०५

टिलोपश्च तरन्प्लवमानः प्लिणोतिप्लोतिवा मृगप्वादित्वाडुः तरन्क्षुः। मृगमत्तीतिक्षुः मृगादनः। द्वेहस्त कुक्कुरप्रमाणस्यकुक्कुराकृतेः कृष्णरेखाविचित्रितस्यगोमनुष्यहननक्षमस्यमृगघ्नस्यलाकडाइति ख्यातस्य। वेति वरं श्रेष्ठमाहंतिवराहः अन्येभ्योपीतिडः। अचुवंकरोति अपृषोदरादित्वाद्दृग्लोपेऽन्ये षामपीतिदीर्घत्वे शूकरस्तालव्यादिः सूदितिशद्बंकरोति पृषोदरादिः सूकरोदंत्यादिः तालव्या अपि दंत्याश्चशंवसूकरपांशवइतिशभेदात्। घर्षतिघोणांहंतेवा घृषसंघर्षणेकर्तरि क्तिच्कृतौवेति घृष्टिःवा दुलकात् क्तिन्प्रत्ययेघृष्टिरित्यन्येसाहचर्यात्पुंलिंगोयं। कोलतिसंस्त्यायतिपीनत्वात् कुलसंस्त्यायकरणेपचाद्यच्कोलः। मुखायमस्यपोत्रंतद्योगात्पोत्री। किरतिभुवंइगुपधेति कः किरः किरिरितिपाठेवा दुलकात् इगुपधत्वात्किः किरिः स्त्री कियाणीइंद्राणीप्रस्तावेपूर्वमु क्ता। किटतिउत्रासयतिकिटउत्रासनेकिटिः। दंष्ट्राघोणायोगात्व्रीह्यादित्वादिनिः दंष्ट्रीघोणी।

रा॰मु
१०५

स्तब्धरोमत्वात्स्तब्धरोमा। क्रुड घनत्वे। अव्क्रोडः केन जलेन नरो ऽत्युन्मादयति रोऽइ उन्मादने ऽ विपूर्वो दरा हिवि
भुवं दारयति अण् भूदारः। द्वादश शूकरस्य। केति कंपते हन्त्वात् हन्त्वांतरं वलति अहि कंप्यो नलोपश्चेती
नूकपिः। प्लवेन प्लवेन गच्छति गमः खच् डिद्वेति खच् डित्वात् टिलोपः प्लवंगः। एवं प्लवंगश्च। अन्येष्वपी
ति डः प्लवगः एवं प्लवगश्च। गमश्चेति खचि प्लवंगमश्च एवं पंचरूपाण्यत्र। शाखासंचारी मृगः पशुः शा
खामृगः हस्तोगतार्थत्वात् संचारिशब्दाप्रयोगः। वली स्त्रथं चर्म तद्योगान्मुखमपि वली। वलीमुख
मस्य वलीमुखः वली स्त्रथं चर्म मुखेऽस्येति वा। मर्क्कः सौत्रो ऽत्यर्थो चुरादित्वाद्विकल्पितणिचः शाका
दिभ्यो ऽटन् मर्कटः। म्रियते ऽटमर्कटाविति मृडो ऽटन् ककारश्चांतादेशः गुणः मर्कट इत्यन्ये। वने रम
ते वनरः डः तस्यापत्यं वानरः वा इवार्थे नर इव वानर इति वा वानं वनभवं फलं लाति रलयोरेकत्वस्मृतेः
वानर इत्यन्ये। बाहुल्यात् कीधातोः शः कीशः। को वातस्तस्यापत्यं कि हनूमान् स एव ईशो ऽस्येति तुसु

मूतिः।वनमोकोगृहमस्यवनौकाः।गोलांगूलकृष्णमुखावप्यत्र।नववानरस्य।अथेतिभल्लतिहिनस्ति
भल्लभल्लपरिभाषणहिंसा दानेषुऊकादयश्चेतिकन्धातोर्भल्लुरादेशः भल्लुकः ऊल्लूकादयश्चेत्यू
कन्भल्लूकोदीर्घमध्यश्चदधातिकुहरभाजंयत्रभल्लूकपूनामितिप्रयोगात्।भालयतितिर्य्यक्प्रेन्त
तेभालूकः भाल्लूकोभल्लूकोभ ल्लइत्युलूकादयश्चसइतिपुरुषोत्तमः प्रज्ञाद्यणिभाल्लुकोभाल्लूक
श्च॥अच्छणोतिअत्वअच्छन्तः अच्छतिअच्छीगतौअच्छेर्वाहुलकात्शकइतिवाअच्छन्तः।अच्छेत्याभिमुख्ये
ऽव्ययंअच्छआभिमुख्येनभल्लतिहिनस्तिअविःअच्छभल्लःसंघातविगृहीतश्चायंअच्छइतिभल्लइ
तिच।अच्छस्फटिकभल्लूकनिर्मलेष्वच्छमव्ययं।आभिमुख्येऽध्यकच्छःस्यादितिमेदिनिः।अच्छभल्लप
रिषद्विहरंतीत्यभिनंदः।चत्वारिभल्लूकस्य।गेतिगच्छतिगंडःगमेर्डमंतात्डःस्वार्थिकःगंडकः
गंडिधातोःकृज्जादिभ्योवुनिवा।अस्यशृंगंखड्गइतिभिनत्तीतिखडखडिनेदेछापूखडिभ्योगक्

प्रत्ययेखङ्गः तद्योगादविखङ्गः। इनोखङ्गी। व्रीहिगंडकस्य। लुलेति। अप्सु लुलति लुल विलोलने इगुपध
त्वात्कः। आकृष्टरेत्यादिना। स्वराजदंतादित्वात्परनिपातः पृषोदरादित्वाद्वा लुलापः। लुलाय इत्यंतस्थांतोपि
। लुलिकलिकक्षिप्य आयः। तथा च प्रयोगो दृश्यते। खुरविधुनधरित्री विन्नकायो लुलाय इति। महतिपूजयं
त्यनेन मह्यते वा मह पूजायां अरिमखोष्टिषच् महिषः टित्वात् ङीपि महिषी। वाहानां द्विषन् वा ह द्विषन् वा
हेऽश्वो द्विषन् शत्रुः वाहद्विषन् सप्तमी तियोगविभागात्समास इत्यन्ये। के जले सरति अच् अन्येषामपी
ति दीर्घः केजले आसरति वा कासरः। सीरोल्लांगलं तद्योगात् सीरी गृहस्थः तं वहूप कारकरणा इज
तिसेवतेभजेरन्येभ्योपीति डे टिलोपे च सीरिभः प्रज्ञाद्यणि सैरिभः सीरिणो भाशोभा सीरिभा सा अस्ति
न्योत्त्वाद्यणि वा। सरटाश्च सैरिभः समि ति रितिदंत्या गौरभसः। सीरिभः कुर्डुवीतस्यायमणि सै
रिभः। वर्णदेशनायां दंत्यादौ सैरिभः उक्तः। पंचमहिषस्य। स्त्रीति च तुष्पादानां द्विलिंगना वन्हमते

तदपवादोयं शिवेति स्त्रियामिति पुंस्यक्तौ वशिवा नित्यस्त्रीलिंगेयमित्यर्थः। शिवोक्ताशिवा दुर्गा
तत्प्रियत्वाद्वा शिवा। भूरयोमाया अस्य भूरिमायः। गां विक्रतां वार्वं मिनोतिप्रक्षिपति क्वापाजि
मीत्युणगोमायुः। मृगेषु वन्यपशुषु धूर्तत्वात् कनि मृगधूर्तकः। सृज निमायांसृजविसर्गे तमि
तिडीतिवा हुलकात्वकाल नुन्यंक्वादित्वात् कुत्वं असृगालातिषृषोदरादित्वाद्दलोपेवा सृगालः दंत्या
दिः शृंगं न लातिशृगालः शृगालो वंचके दैत्ये सृगाली डमरे विदुरिति विश्वः तालव्या अपि दंत्या अश
वशोवलसूकराः। रसना पिच जिह्वायां शृगालः कलशो पिवेति शभेदात्। वंचयति वनू वुप्रलंभ
ने वुन् वंचकः। क्रोशति क्रुशेः सितनीत्यादिना तुन् ष्टुत्वं क्रोष्टा तृज्वत्क्रोष्टुरिति तृजंतरूपाति
देशः स्त्रियां चेति तृज्वत्क्रोष्ट्री। फेइति अव्यक्तानुकरणं रौति मित्रघादित्वात् डुः फेरुः। फेइति
रवोस्य फेरवः। गुहारूपं हपभेरुः फेरवस्तारवः शिवा। सूकरोति रुजः फेरः अभीरुर्मंडलाहित

एम
१०७

इति साहसांकः। जमत्यत्ति मांसादिकमिति जंबुकः मित्रघादित्वात् डुः। बुकं च कन् जंबुकः। उलूकादित्वा
त् ऊकन् इति जंबूकश्च। खरोष्ट्रकपि जंबूकवायसाजगोपम इति वाचस्पतिः। द्वे शृगालस्य। ओतुरिति अ
वति विष्टोऽसितनीत्यादिना तुन् ज्वरत्वरेत्यूठ् गुणः ओतुः स्त्रियामप्योतुः। विडति शब्दायते विड शब्दे त
मिविडिभ्यां कालन् विडालः। भुत्का मार्ष्टि मुखं आखुबिलं वा मृजू शुद्धौ कंसिमृजिभ्यामित्यारन् मृ
जेर्वृद्धिः मार्जारः। वृषान् मूषिकान् दशति अण् वृषदंशः स्वार्थे कन् वृषदंशकः। आखून् भुंक्ते क्विप्
आखुभुक्। पंच विडालस्य। त्रय इति गोधायाः। अपत्यं गोधाया ढ्रक् गौधेरः आरगुदीचां गोधारः शु
भ्रादित्वात् गौधेयः। त्रीणि स्थलजगोधात्मजस्य। श्वाविदिति श्वानं विध्यति क्विप् नहिवृतीति दीर्घः
नशल्य वर्ह्मस्याविद्। शलस्य शल आशुगतौ जायादिहृषादित्वाद् घप्रत्ययः शल्यस्त्वालकः अ द्वा
शीलित शार्दूलश्येनशशकशल्यानीन्यूष्मभेदात्। द्वे शेजाकांग इति ख्यातस्य॥ तद्दितितस्यश्रा

षिधोऽनोग्निशलति दूरंगच्छतीति पचादित्वात्कलच्। गौरादिः शलली स्त्रीत्वाविवक्षायां शल्लं। यवा
द्यविशल्लं। शल्लस्कतृशंढयोरित्यमरमालोक्तेः शल्लस्य। त्रीणि षष्णाविज्ञोऽमि।। वेतिवातशब्दउ
पपदेमाङ्माने इत्यतो वातं प्रमिमीते वाताभिमुखं धावति वातवत्प्रयाति प्राप्नोति पतति वा वातेन प्र
मीयते प्राप्नोति प्लवने वा निपातनादीकारः वातमृगसाहचर्यात् वातप्रमी वातमृग इति पुंस्कांडे ऽमरमा
लोक्तेश्च वातप्रमीः पुंलिंगः वातप्रम्यौ वातप्रम्यः वातप्रमीं वातप्रम्यौ वातप्रमीन् ङेौ तु वातप्रमी
तिशेषं ग्रामणीशब्दवद्रूपं। योषिति वातप्रमी समीरमृग इति वोपालितात् स्त्रीत्वमप्यस्य अतएव
वाच्यंतत्वात्सुलोपाभावः कृदिकारादिति ङीषि तु वातप्रमीयमिति मैत्रेयः तत्तु ...
... नद्यास्तु शसि वातप्रमीरिति ङेौ तु नदीत्वाद्दामि वातप्रम्यामिति स्त्रियां तु लक्ष्मी
शब्दवदिति पुरुषोत्तमदेवेनोणादिवृत्तावुदाहृतं। वातवद्वेगी मृगो वातमृग इति मध्यमपदलोपी।

समासः। द्वेवायटइतिख्यातस्य। कोकइतिकोकतेमेषादीनादत्तेगृह्णातिकुकवृकआदानेपचाद्यच्कोकः
ईहां चेष्टांमृगयतिकर्मण्यण्ईहामृगः। मृगानीहतेण्याजदंतादित्वात्परनिपातः। अन्येषामपीतिदीर्घ
इतिवाहं तुमीहामृगेष्वस्यवामृगस्येवेहास्येतिपृषोदरादित्वादीहामृगइतितुस्वामी। वर्कतेगृह्णातिइगु
पधत्वात्कः वृकः वृणातिगृह्णातिवृकवृश्चुषिमुषिभ्यःककिदृकइत्युणादौ। त्रीणिवृकस्य। मृगइति॥
मृग्यतेव्याधैःमृगअन्वेषणेघञर्थेकः मृगः। कुंभुवंरंजयतिकर्मण्यणिन्संज्ञादित्वात्कुत्वेकुरंगः
लगि ४ कौरंगातिअगिरगिगत्यर्थाअच्कौभुविरंगोविशिष्टागतिरस्येतिवा। वातमयतेवाहुलकात्क्वा
पाजिमीत्युणवातायुः हरतिमनःश्यारुत्याद्दुन्नविभ्यइनच्हरिणः गीतेनेहरंत्येनमितिवा। अजिन
स्योपयुज्यमानस्ययोनिरुत्पत्तिस्थानमजिनयोनिः। विश्वावीवारुल्लोचनइतिरभसः। पंचहरिण
स्य। एणोयमितिएण्याहरिण्याश्चर्मा द्वैणेयंविकारावयवार्थएण्याढञ्। एणस्यहरिणस्यचर्म

रा.मु.२
१०८

घं ऐणं पूर्ववीर्थे प्राणिर जनादिभ्यो ऽण् एते उक्के द्वे ऐणेयैणे त्रिषु वर्तेते चर्माद्य मित्याद्य शब्देन मांसा
स्थिनय नादियद्गः। केति एतेषट् हरिणभेदाः कंबोजानामुत्तराय थेस्वस्वनामप्रसिद्धाः। अजिन।
स्यरल्लक्ष्मतविचित्रवर्मणा आश्रयत्वात्योनयः स्युः। कंजलंदलतिकदली। कंदेनेर्लोपश्चेत्यरः कादरः
रलयोरैक्यात्कदली त्युणादौ। कंदेसस्यमूलेल्लीयते ऽन्येष्वपीति डे कंदली इत्त्रं तावेतावितिस्वामीक
दैः सौत्रात्। कदिक्रदि आह्वान इत्यतो वा हृषादित्वात् कलन् गौरादिङी षिकदली कंदल्यो स्त्रिया मे
व स्त्रंतावितितुनयुक्तं। रंभा हन्त्येव कदलीपताकामृगभेदयोः। कलध्वनौ कंदली तु मृगगुल्मप्रभे
दयोरिति लांतवर्गे मेदिन्यादेः कदलं त्रिष्वित्यमरमालादेश्च। ध्विनोतिसौंदर्य्यं विजोवा हुलकान्न कु
दीर्घौ चीनः। च मतिखादति ढणादिकमितिखर्जूरादित्वाद्रुः चमूरुः। प्रीणातिप्रीयतेवाप्रियः इगु
पधेतिकः ततः कनिप्रियकः कुनिवा। सम्यक् हते सम्यक् शोभना द्रूरू अस्येतिवा समूरुः। अत्र हरि

राम
१०८

ति२

णाजिनयोनिशब्दौसामान्यवृत्तीअपिविशेषेवर्त्तेनेयथामृगशब्दःपशुमात्रवृत्तिरपिहरिणइति।कृ
ष्णेतिकृष्णेनवर्णेनसारःश्रेष्ठःकृष्णसारोऽत्यमध्यःकृष्णेनवर्णेनशारःशबलःशारःशबलवात
योरितितालव्यादौरभसःकृष्णःसारोवर्णोऽस्येतिवाकृष्णाशारस्तालव्यमध्यश्चमृगाणातेर्वायुव
र्णनिवृत्तेषुघञ्शारः।रौतिरुःशब्दे जंघादयश्चेतिरुः रुरुःनियतमंवतिनावरुन्धेरितिकुः न्यंका
दित्वात्कुत्वंन्यंकुः।रमेर्वाहुलकाडुःरंकतिगच्छतिकवाषाज्जिमीत्युणिवारंकुः।शंवरउक्तः।रौ
हिषंतृणभेदमत्तीतिशेषिकोऽणरौहिषःरोहिदहल्लंतोपिसएवरौहिषांमध्येचरतीतिभवभूतिः
रुणाद्धिकश्चित्कमसुप्तरोहिषीत्यभिनंदः।गोरिवकर्णावस्यगोकर्णः।पृषतोविंदुःपृषंश्चेव
पृषतश्चप्रकीर्त्तितइतिव्याडिः।पृशमेऽएणोऽञुत्पन्नइत्यन्येवारुनयनोऽल्पजंघश्चायं।ऋ
श्यंपृषोदरादिस्तालव्यांतःऋषीगतावित्यतऋष्योमूर्द्धन्यांतोपीतिस्वाम्यादयःअंजनादि

विंदुविज्ञःमत्वर्थीयोऽञ्पृषतीतिपृषुसेचनेपृषिरंजिल्यां किदित्यतविकित्वेचपृषतःपृषदृलंतश्चमृगो २

श्च हरिणः कुरंगमो रिष्यः स्यादृश्यश्चारुलोचन इति त्रिकांडशेषः अयं च चारुनेत्रो नीलवर्णो ऽद्विशृंगो ऽश्रु
प्रमाणो ऽल्पजंघश्च । रक्तवर्णत्वात् रोहितः घोटकाकृतिः । चमतीति चमु अदने वा हुलकात् अर्तिक मिश्रमि
चमिदेविवासिभ्यश्च अत्यरप्रत्ययः चमरः चमरोमहिषाकृतिः तत्पुच्छं चामरं । द्वादशैते मृगभेदाः स्वनाम
प्रसिद्धाः पृथक् पृथक् । गंधेति अर्वति अर्वः पवाद्यच् गत्यर्थानां ज्ञानार्थत्वात् गांधो ऽर्वो बोधको स्य
गंधर्वः । शृणाति हिनस्ति कृ शृ शलि कलि गर्दिभ्यो ऽभजित्यच् शरभः अष्टापदो ऽयं अष्टापदे च करभे
शरभः स्यान्मृगांतर इति नालमाहौ रभसः । रमंते ना ऽत्रेत्यनेन वा हलश्चेत्याधिकरणे घञ् रामः रम
यतीत्यंतर्भावितण्यर्थाद्रमे ह्वी ल्वीत्यादिना णो वा । अतिगतिशीलत्वात् सत्त्वैः स्पृयस्पृदः कारवुस्टमरः
ण गतौ एरच् अयः गोरिवायो गमनमस्य ज्ञानमत्र वा अवङ् स्फोटायनस्येत्यवङि शकंध्वादित्वात्
पररूपत्वे गवयः गवाकृतिश्चायं । शशति प्लुतेन गच्छति शश प्लुतगतौ अच् शशः इत्यादयो ये ऽ

नोक्तायेचानुक्तायेचपूर्वोक्ताः सिंहाद्याश्चमरांतायेचवर्गांतरेवक्ष्यमाणाहस्त्यश्वगोमेषादयःसर्वेतेपश्व
जातयः पशुश्चद्वाभ्यामित्यर्थः पश्यंतिपाशादंडाभ्यांहिताहितमितिपशवः पशेः सौत्रधातोरपच्छादय
इतिकुरितिनुसृधृतिः। उंद्वितिउनत्तिउंदीक्लेदनेवाहुलकात् इरुः जत्रुादयश्चेतिउन्नत्यये उडागमेचउंदु
रुरित्यन्येकुंदुरुंदुरुरुंदुरइतिशद्धार्णवे। मुष्णातिमुषस्तेयेमुष्णातेर्दीर्घश्चेतिकिकन्दीर्घश्चमूषिकः
पतभेदेनमूषस्तेयेदीर्घोपधः एवुलिमूषकोपीत्येके। भइमूषिकआसंदीकुंदुरुंदुरुरुंदरः। मूषको
वज्रदशनः क्रमः कांडोविलेशायइतिवाचस्पतिः मूषीतिच। हंतिकीटविषंसर्वंतयामूषीविषंचयंदि
निशालिहोत्रे। आखनतिभूमिमाडिःखनिवंस्योर्नलोपश्चेतिकुर्नलोपश्चवाहुलकाद्लोपः आखुः
गीणिउंदुरोः। गीतिगिरतितंडुलादिकंक्रमष्टष्टभ्यइरितिइः किवक्रमनइत्यादिनाइत्वंकनटाप्गि
रिका। न्हुइत्वात्वालेववाल्लाततः कर्मधारयः कनटाप्वालमूषिका। द्वेवातियाइतिख्यातायाः

रा.मु.२
१११

सरेतिसरन्तूर्ध्वंशकादिभ्योऽटन्सरटोदंत्यादिः सविसर्गोरणासिक्थकसेनामरटाश्चसैरिभः सरितामि
तिसभेदात्। ककंशीरोग्रीवंकंठंवालासयतिकंपयति कर्मण्यण् ककलासः ककेनकंठेनलासश्चलन
मस्येतिवापरिसरककलासस्वेदसाल्लूरसंपदइतिसभेदाद्दंत्यसः। ककलासउकारमध्यइतिभट्टः।
हकेकाकलासइतिख्यातस्य। मुसलीतिमुस्यतिसंशायंखंडयतिस्तुभामुभस्तूवकत्वात्मुसलीहषादि
त्वात्कलच्जानौङीष्मुसलीदंत्यमध्यामुषलीमूर्द्धन्यमध्याचेतिवर्णदेशना। अल्पागोधागो
धिकाइवार्थेकन्गृहस्यगोधिकागृहगोधिका। ज्येष्ठास्त्रीकुड्यमत्स्याचगृहगोधाद्दालिकेति
साहसांकः। हेजेठीतिख्यातायाः। लूतेतिलूत्वाहत्वातंतुजालंलुनातिलूनावालूलकात्तनुगुण
भावश्चलूतालूतकेत्यमरदत्तः। तंतून्वयतीतिकावामश्चेत्यण्तंतुवायः तंत्रंवयतितंत्रवायइति
स्वामी। ऊर्णामेषलोमतदाकारस्तंतुरूर्णासान्ताभौमछ्छे स्येतिअजितियोगविभा गाद्दच्छ

राम.
१११

मोरित्यादिनाह्रस्वत्वं ऊर्णनाभः मर्कटइवारोहणात् मर्कटः सर्वोक्तः स्वार्थे कनि मर्कटकः। चत्वारि माकड
शाइति ख्यातस्य। नीतिनियतं लंगतीति निपूर्वाल्लगिधातोः खरुशंकुपीयुनीलंगुहिंग्वित्यनेन दीर्घमध्यो
नीलंगुर्निपातितः दीर्घमध्योप्ययं नीलंगुरपि नीलांगुरीश्चरी वेश्वरापि चेति द्विरूपकोषः। शाकादि
कं क्रामति क्रमेः क्रमितमिशतिस्तंभामनइ इति कीप्रत्यये उपधाया इत्वं वक्तिमिः रेफमध्यः वा दु
ककात् संप्रसारणे क्रमिरित्यपीति डुमामयोभवेत् पुंसि किटे चक्रिमिवत् क्रमिरितिरभसः। द्वे इति
खुइजंतुमात्रस्य। कर्णेति जलौकाशब्देन टाबंतेन समासः सांतस्य वप्रागे कत्वे पिदृन्निर्दर्शिता॥ श
तं वहवः पादा अस्याः शतपदी कुंभपदीषु चेति निपातिता सांतत्वे पिस्त्रीत्वबोधनाय उभे इत्युक्तं॥
द्वे कानजलुकीति ख्यातायाः। वृश्चीति वृश्चति ममित्र वृश्चिक थाः किकन् संप्रसारणं वृश्चिकः। शूका
कारं लोमशूकं तद्युक्तः कीटः शूककीटः तालव्यादिः। द्वे सुया इति ख्यातस्य। अलीति अलं वृश्चिक

लांगुलं तद्योगादिति॥ अलीनांतः अलतिदंशे समर्थो भवति अलेर्वा दृलकादिः अलि रिकारांतोपि अलि
लांगूलत्वा न लिनांगूलत्वभेदात् पृथगुक्तिः भृंगवृश्चिकयोरलिरितिरभसाद्रुस्वादिरिकारांतश्च वृ
श्चिको द्रुण आलिः स्यादिति वोपालितात् दीर्घादिश्च द्रुणाति हिनस्ति कुटिलं गच्छति वा द्रुण हिंसा कौ
टिल्ये इगुपधत्वात् कः द्रुणः अचिद्रोण इत्येक इति स्वामी द्वे वृश्चिकीतिख्यातस्य॥ पारे तिपार्यते कर्म
कर्तुमनेन घञि पारो बलं पारेण बलेनापतती तिपारावतः पृषोदरादिः पारापतोपि पारावतश्च
छेघश्च कपोतो रक्तलोचनः। पारापतः कलरवः पत्रीश्येनः शशादन इति रभसः॥ कलो रवोस्येति
क लरवः। [illegible]
[illegible]॥ कस्य मयूरस्य चित्रवर्णत्वात् पोत इव कपोतः कस्य वायोः पोत इवेत्यागम इ
तिनु स्वामी पारावतः कपोतः स्यात् कपोतो विहगांतर इति विश्वः॥ त्रीणि कपोतस्य। श्येति श्येना

वहुविधास्तन्मध्येकश्चित्शशादनस्तत्साहचर्यात्सर्वएवशशादनाउच्यंतेशशमत्तिअदेर्ल्युः शशादनः क्रत्यल्युटइतिकर्त्तरि ल्युट्वाश्येनोपविशशादनावित्यमरमाला। पत्रंपन्नत्नयोगात्प्रशंसायामिनिः पत्री। श्यायतेघन्विघातायात्यर्थंगच्छतिश्येङ्गतौ। श्यास्त्याह्वञविभ्यइनवश्येनः। त्रीणिश्येनस्य। उलूकइतिउन्नमय्यवन्द्युषीलोकतेउलूकः पृषोदरादिरितिस्वामीऊर्द्ध्वकर्णावस्यउलूकः पृषोदरादिरितिसुभूतिः। उवतिसमवैतिकोटरइलूकादयइतिनिपातितः। वायसस्यकाकस्यारातिः शत्रुः वायसारातिः। पचतिसंतपतिदुःखेनपचेः क्रुनादिभ्यः क्वुन्पृषोदरादित्वादतएवंपेचकः। पारावतोऽथशक्रारव्योदिवांधोवक्रनासिकः। हरिनेत्रोदिवाभीतोनखाशीपीलघर्घैवो। काकभीरुर्नक्तचारीतित्रिकांडशेषः। त्रीणिपेचकस्य। व्येतिव्याजिघ्रन्तटतिअवभ्राघ्राटः व्याघ्रमटतिकर्मण्यणव्याघ्राटइतिव्याघ्रइवाटतिपवाघ्यविवा। भरतन्पुत्रकोवाजः पन्होस्यभरद्वाजः। द्वेभारद्वाजः। तिरव्या

तस्य। करटका इत्यन्ये। खंजेति खजि गतिवैकल्ये खंजन्नटति खंजरीटः पृषोदरादिः। खंजनो नंद्यादिः।
द्वे खंजनस्य। लोहेति दृढत्वाल्लोहवर्णत्वाद्वा लोहपृष्टमिव पृष्ठमस्य लोहपृष्ठः। कंकंते ककि लौल्ये क
किवकीत्यादिर्दंडके गत्यर्थो वा अचि कंकः। द्वे कंकस्य। अथेति वृषभन्तृणो मूर्द्धन्यांतः चाषयति च खे
गर्य्यन्तात् पचाद्यच् चाषः तद्दर्शनेन वृत्रघ्नस्तभर्तृणलाभात् उक्तं च यत्र तत्र कुरुश्रेष्ठ चाषं दृष्ट्वा न
मस्कुरु। नहि वैडूर्य्यवर्णस्य दर्शनं निष्फलं भवेदिति चासः इति त्यांतश्च इत्युपध्यादिभिदोष्मास इति दं
त्यांतेषु रभसः। किकीतिशब्देन दीव्यति क्रीडति क्विप् दिवु इत्यस्य वि किकीदिविरिति किकीदिविर्नि
पातितः अयं च दीर्घद्वितीयेकारः दीर्घतृतीयेकारश्चायं किकीदिविश्च चाषः। स्यात्कृष्णाश्छेकामृगा
डजा इति रत्नकोषात्। चन्द्रकैस्त्वश्चायमिति शादिकः चाषो दिविः किकिः स्मृत इति व्याडिः द्वे नाम्नी
इति स्वामी। द्वे स्वर्णचातकस्य। कलीति केमूर्द्धि लिंगं चूडारूपं चिह्नमस्य कलिलं गहनं गच्छति क

लिंगः पृषोदरादित्वात्कलिंकलहंगच्छतिवा। सहिगच्छतांकेशानुलुंचतिभृंगइवकार्ष्ण्यात्भृंगः विभक्तिक
लंभृंगः भृंजोगन्नलुक्कवेतिवा। धूम्याधूमसमूहः पाशादिभ्योयः तामटतिकर्मण्यण् धूम्याटः। त्रीणि
फिंजेतिख्यातस्य। अर्थेतिशार्तवहू निपत्राणिपन्ना अस्यशतपत्रकः। दारुआहंतिहंतेराङ् पूर्वाद्दारु
पपदेदार्वाहनोऽणंत्यस्यचटः। पृषोदरादित्वाद्दार्वाघाटः। वामार्थेदारुआघट्टयतिअण्उपधाया
श्चवृद्धिः दार्वाघाटइतिसुभूतिः। भद्रनामारत्ननिधिः काष्ठकुट्टः शतच्छदइति त्रिकांडशेषः। हेकाठखो
डराइतिख्यातस्य। अर्थेतिशारयतिहिंसयति। आतपादिनात्मानं शॄ हिंसायामित्यस्मादण्यंतात्शारे रं
गजित्यंगच्छ शारंगस्तालव्यादिः शारंगश्चातकेख्यातः। शबलेहरिणेपिवेतितालव्यादावजयः सरन्तु
दुमितिस्वगतौणिच्पूर्ववदण्हस्वश्चसारंगोदंत्यादिरितिस्वामीचातकेहरिणेपुंसिसारंगः शब
लेत्रिष्वितिदंत्यादौरभसात्। शार्ङ्ग इतिचेतिपारायणः। स्तो कमल्पंकंजलमपेन्हत्वेनयस्यास्ति

धारयते

स्य वृक्णो कं कायतिकइ तिवास्तो ककः। चततेयाचतेजल्लार्थेमैयाचनेण्वुल्चातकः। त्रीणिहापालि आइ ति ख्यातस्य। क्रकेतिक्रकेणशिरोग्रीवेणवक्रिरोतिक्रकेवचःकश्चेत्युणएक्रौंवाकुः। ताम्राचूडास्येतिताम्रचूडः। को कनं कुक्कुकइकअआदानेक्विप्कुटतीतिइगुपधत्वात्कः कुटः कुकाकुटः। कर्तृकरणेकृतेतिसमासेपादैः कुंपृथिवींकुटतीतिइगुपधत्वात्कः पृषोदरादित्वात्कुक्कुटः। पादयोधित्वात्चरणायुधः त्रीणिकुक्कुटस्य। चेतिचटतिभिनत्तिधान्यादिकंचटभेदनेकृज्ञादिभ्योवुन् अनादिपाठाद्घटकाक्षिपकादित्वान्नेत्वं। इन्वतिप्रीणयतिइविप्रीणनेकृदाधागविकलिभ्यः कइतिवा कुलकादन्तोपिकेपृषोदरादित्वाद्दाघ्र्यंतवर्णविपर्ययेनुभिविंकः कलेनाव्यक्तमधुरध्वनिनाविंकः पूर्ववत्समासेकलविंकः। द्वेचटकस्य। तेतिचटकस्याल्पादिपाठद्दापिक्षिपकादित्वादित्वनिषेधः चटका। तेतितयोश्चटकाचटकयोः पुमपत्येचटकायाएरक्चाटकैरः। स्त्री

वतत अपत्यंवेतिस्त्र अपत्यंततःस्त्रियामपत्येलुग्वक्तव्यइतिएरकोलुकिलुक्तद्धितलुकीतिटापोनि
वृत्तौस्त्रीत्वात्पुनष्टाप्वटका।एकं।केतिककेशंरेटतिमृगय्वादित्वात्क्कुःनिपातनात्शलोपः
कर्केतिशद्वंवारेटनिरेहपरिभाषणे॰वृअपष्टादयश्चेतिनिपातनात्कर्करेडुः।केवायोजलेवारेट
तिकुत्सितंवारेटतिनिपातनात्कोःकःपूर्ववत्क्कुःकरेडुः।कर्करेडुःस्यात्करडुःकर्कराडुकइ
तिरभसाङ्रूपवत्तुष्कंद्विवतुःषट्पदोरगाइतिद्विपदजातित्वादेषांस्त्रीपुंस्त्वं।द्वेकांकरेडुइतिख्या
तस्य।क्वकणेतिक्वकेणकंठेनअणतिशद्वायतेपचाद्यच्शाकंध्वादित्वात्पररूपत्वेक्वककणः।क्के
इतिशद्वंकरोतिपचाद्यच्क्ककारः।द्वेकयेरइतिख्यातस्य।वनेतिवनंप्रियमस्यवनप्रियः।परेण
काकेनभृतःपुष्टःपरभृतः।कोकतेमनोग्रह्णातिक्कुकहकआदाने अजिरादयश्चेतिकिरःवा
हुलकाडुणःकपिरिकादित्वाल्लत्वंशलिकलीत्यादिनेलवविवाकोकिलः।अपिरंतर्द्धौअपिहितः

कायतिआतइतिकः वष्टिभागुरिरित्यादिना अकारलोपेपिकः। ताम्रान्तकुहुस्वरकामतारादयो
ष्यस्यपर्यायाः चत्वारिकोकिलस्य। केतिकाइतिशब्दंकायतिआतइतिकः काकयतिलौल्यंजनय
तिककलौल्येण्यन्तात्पचिवाकाकः। करोतिवलिदानुहिंनमितिशकादिभ्योऽटन्कमात्मानंरटय
तिकिरतिभन्हाइर्लंवाकरटः। अविद्यमानंरिष्टमकालमरणरूपमस्यअरिष्टः। बलिनापुष्टोब
लिपुष्टः। प्रकृतमिभिश्चस्त्रीभिश्चतस्मैबलेरुपहरणात्। सकृदेकवारंप्रजाप्रसूतिरस्यसकृत्
प्रजः। ध्वाङ्क्षतिघोरंशब्दायतेध्वांक्षिघोरवाशिनेचपचाद्यच्ध्वाङ्क्षः। काकाइतिशब्देनात्मा
नंघोषयतिआत्मघोषः घुषेःकर्मण्यण्। परान् पिकान्विभर्तिपुष्णातिक्विप्परभृत्। ब
लिंभुंक्तेक्विप्बलिभुक्। वयतिप्रतिगृह्णमितिवयगतौवयइत्यस्यसब्धुणिबवायसःप्रज्ञाद्यणि
वावयएववायसः। द्वराकाकस्य। द्रोणेतिदुणगतिविशेषेणहिनस्तिदुणहिंसायामविद्रोणः

द्रोणनामा काको द्रोणकाकः। काकयति कपिपिंडिभ्यामोलच्चिति वा हुलकात् काकयतेरपि काको-
लः। दग्धकाकोऽप्यत्र द्रोणो नाम दग्धकाके स्यादग्नत्यामात्रो गुरावपीति रुद्रः। ढेढोडकाक इति ख्या-
तस्य। दैतिदात्पुलवने क्विचदातिं छेदं जहाति अत्यभ्यस्यति कर्मण्यण् दात्यूहः अस्य हि ध्वनावंतरांत-
राविच्छेदरूपखंडनाद्या इति शब्दं अत्यूहते अभ्यत्यस्यतीति वा दात्यूहः दित्यवाहोऽप्यत्यमणि दे वि-
कादिनात्वेवा हलुठिएत्येधत्यूहश्चिविनिदद्दौदात्यौ हइ इति स्वामी। काले [illegible] वर्षाकाले कं-
ठध्वनिरस्य कालकंठः। कंठः स्वरेंतिके गल इति रुद्रः कालएव कालः स्वार्थे ठण् कालोऽव्यक्तम-
धुरध्वनिः कंठेऽस्य वा दात्यौहमाग्नुउऐंट्रिकालमुक्ताभकंठज लेरक्कादयश्चात्र। ढेडाउक इ-
ति ख्यातस्य। आतेति आतायनेसंतनोति पालयति वा पन्वप्रसारणेनात्मानमिति नापृ सं-
तानपालनयोः आवश्यके णिनिः आतायनमातापः घञ् ऋरुपरत्वा तद्योगादिनिर्वा आतायी।

आतपत्यवश्यमित्यावश्यके णिनिः आतापी ति स्वामीपठति। विल्लतिभृंगारजाक्रियाभेदं करोतिविल्ल
शैथिल्येहावकरणेचपचाद्यच् विल्लः। द्वे विल्लस्य। दैति दन्तते विशेषेणवर्द्धते शीघ्रो भवतिवा दन्त
हन्दौ शीघ्रार्थेच स्रु दन्तिस्पृहिभ्य आय्य इत्यायः दन्ताय्यः तन्नोऽपत्याणि दान्ताय्यः। गर्धतेग्र
भिकांक्षतिमांसादिकमिति गृधुग्रभिकांक्षायां सुधाजुगृधिभ्यः क्रन्निति क्रन् गृध्रः स्फायी
त्यादिनारमित्यन्ये। द्वे गृध्रस्य। कीतिकीतिशब्दं नीरयतिइगुपधत्वात्कः कीरः। शोकनि
शुकगतौ इगुपधत्वात्कः शुकः शोभन इति शुभ रीत्नो शुकवल्कोल्का इति क प्रत्यये भ
लोपेवारणादौ शुक इतिनिपातनाद्वा। द्वे शुकस्य। कुडि ति कुं वतिकुटिलं गच्छति क्रुन् वुकौटि
ल्यात्यी भावयोः कुंच्चित्येके तत क्विगादिना क्विन् स्त्रुपधान्नलोपाभावः क्रुङ्। प्रज्ञाद्यणि क्रौं
वः। स्त्रियामजादित्वाट्टाप् क्रौञ्चा। द्वे क्रौंचवकस्येति आतस्य। अघेतिककतिककलोल्पेप

स्न्ट

बाधव्पृषोदरादित्वात्कस्यवः। बकः। कइतिशब्दंकेजलेवाक्यतेशब्दायते। के न्नस्यद्दीयांशब्देचेति

धातोः केञ्ञाकारलोपे बकङ्कः। दीर्घजंघोनिशेडुः स्याद्दकोटः शुल्कवायसः। कंकेरुहारुबलिधुक्

शिखीवंद्दविहंगमाइत्यादयोप्यत्रैव। द्वैवकस्य। पुष्केतिपुष्कराह्वः पद्मपर्यायनामा। सरसिभवः

अण्सारसोद्विदंत्यः। द्वेसारसपक्षिणः। कोकइतिकवतेवाशब्देवा हुलकात्कः कोकतेविक्षेद

मादत्ते कुकवृककआदाने। विवाचकात्प्रौ। स्फायीतिरक्कुक्रि। यतेनिशयावियोगीति। घञर्थेक।

केऽकजादीनांवेतिह्रस्वेचक्रः चक्रेणचक्रशब्देनोच्यते। कर्मणिघञ्। चक्रवाकः रथांगस्यचक्र।

स्ययाआह्वा नामानितन्नामकः तत्पर्यायनामकइत्यर्थः रथांगनामारथचरणादिनामा।

चत्वारिचकोआइतिख्यातस्य। केतिकदंबः समूहस्तद्योगात्। ज्योत्स्नाघ्राणकादंबः। कलो

मधुरवाक्सचासौहंसश्चेतिकलहंसः। द्वेकणरइतिख्यातस्य। उ क्रोशतिउत्क्रुंष्टः। उद्वे

वांक्रोशतीत्यच्युतक्रोशः। कुरेतिशब्दं रातिकः कुरतिकरुणध्वनिमाधैर्यं छिनत्ति कुरः छेदनेवा
हुलकादरकिवा कुररः। स्त्रियां कुररी। द्वे कुरर इति ख्यातस्य। हमिति घ्नंतिगच्छंतिमदं घ्नंतिवर्षा
वर्षासुमानसं गच्छंतिवा हन्त वदिहनिकमीत्यादिना सः हंसः। श्वेतागरुतः पक्षा अस्य श्वेतगरु
त् पूर्वनिरयोरर्थप्रधानत्वात् सितग रुत् शुक्लपक्षादयोप्यत्र। वक्रस्येवांगानि वृत्तत्वात्
हिनास्य वक्रांग इति स्वामी। मानसं सरओकः स्थानमस्य मानसौकाः। सर्वत्र बहुवचनेन निर्देशः
सरःकाकजालपद्मपुरुदंशकमरालादयश्चात्र। चत्वारि सामान्येन हंसस्य। चेतियेहंसादेहेन
सिताः शुक्लाः लोहितचंचुचरणैर्लक्षिताः ते जातिश्रेष्ठत्वात् हंसानां राजानः राजदंतादित्वात्
परनिपातः राजहंसाः चंचुसहितैश्चरणैरितिसमासः। एकं। मेचितैः सितामलिनैः किंचिद्धूम्र
वर्णैरालोहितैश्चंचुचरणैर्लक्षिता मल्लिकाख्या मल्लिकनामानः मलमल्लधारणे अच इः

5

स्वार्थे कः मल्लिकोहंसभेदे स्यात् तटस्य शून्येपि मल्लिकेति रुद्रः मल्लिका कारने त्रत्वान्मल्लिकाख्याः
षट्। शुक्लाः पांगत्वादिति तु स्वामी एकं हंसभेदस्य। धेतिन एवसिते तरैः क्रमेलल्लिन्तिताहंसा धृत
राष्ट्रस्य पक्षिभेदस्यापत्यानि तत्त्वोभवावाधार्त्तराष्ट्रः धृतराष्ट्रः सुराज्ञिस्यात् पक्षिजन्तुवि
यभेदयोरितिरभसः। एकं। शेतिशरं नीरमिपर्त्ति अचः भृणातेर्वाहलक आरिर्वाशरा
रिः शरमततिअतसातत्यगमने इ वृयज्ञादित्य इतीन्शरातिः श्वतालव्यादिः गुंडेष्वो र्नीशा
रं तीर इति तालव्यादौ रभसः। पन्हेकपिरिकादित्वान्नत्वेशरालिः। आसमेताद्दटतिड्
आटिः। जलादड उत्पुद्यकृतिअड उद्यमे अन्तांडिभ्यामिण् आडिः। एते त्रयः शद्वाः स्त्री लिं
गाः। आडिः शरालिर्वरटी गंधोलीवानरीकथीति स्त्रीलिंगकांडे रत्नकोषात्। त्रयः शद्वा आवि
ष्टलिंगा इति मधुमाधवी। बीणाशरालीतिख्यातायाः। बेतिवले न शक्त्या इरम्हर्द्धमकनि व

रा॰मु॰२

११८

लवल्लसंवरणेवलाकाद्य श्चेत्याकन्वलाका। विसंमृणालंतद्वत्कंठोस्याः विसकंठिकाद्य
साआविष्टलिंगत्वात्पुंसिस्त्रियांववलाकाद्वेवकजातेः। हंसेतिहंसस्यस्त्रीवरटाहंसीतेसरः
सिवतेट्टङ् संभक्तौशकादिभ्योऽट्नन्टाप्वरटागौरादीजयादित्येनवरटाशब्दः पठितःततो
ङीष्वरटीवेतिमधुमाधवी। एकं। सारेति। सारसस्त्रीलक्ष्मीरवाक्षिलक्ष्मणापामादिगणेल
क्ष्मसुङ्वेतिनप्रत्ययोऽकारश्चांनादेशः णत्वंवल क्ष्मणामकारमध्या। सारस्यांलक्ष्मणा
मातुसौमित्रौश्रीमतित्रिकांडेतिरुद्रः। निर्मकारोपिलक्षणश्चैवसारस इत्यमरमालोक्तः। महा
पुरुषमि …. वस्रकटमीनशंखलक्षणमितिकादंवरीश्लेषश्च। पुंयोगलक्षणोङीष्लक्ष्म
णीतिस्वाम्याद्यः। एकं। जेति आश्रयेद्दृढश्लेषात्कृष्णपिंगलत्वा जजत्विवइवेप्रतिकृ
नाविति कनिजतुकारामठेजतुकंचर्मेपत्राजतुकृतोः स्त्रियामितिववर्गेततीयादौरभसाश्च

राम

११८

वर्गत्वनीयादिः। जलूकादीर्घमध्याच निशाशयस्थाधिस्थितघनजलूकापटलकमितिपूर्वक विप्र
योगदर्शनात्। अजिनं पत्रं पत्नोस्या अजिनपत्रा द्वे चर्म व टिकायाः। पेतिरूमं च स्त्रीत्वाविष्टाज्ञा
तिः परः शत्रुरुल्लस्य शीस्यास्ततो विड इवात् जातेरितिङीष्परोष्णी। तैलं पिबतितैलपायिकाएवु
ल्संज्ञा शब्दानां यथाकथंचिद्व्युत्पत्तिः। न तु क्रमिस्तिं इगोपः परोष्णी तैलपायिका। तैलाभ्यक्ते
खला धारा हीरा पिप्पलिका स्त्रियामिति रभसात्। द्वे तैलां बु सहृशकीटजातेर्नामा छिल्लिकायाः॥
वितिवरितिवरणाति अरणारणावणा भणा शब्दार्था अड्टाप् हणीति पूर्ति द्वयंभजतेल्हजो विश्वविवरवर्ण
जरत्वर्णा ततः कर्मधारये वा वर्वणा। प्रत्नसंघाते इत्य नमन्त्रमपि केवित्पठंति ततः क्रजादिभ्यो
वुन्टाप् मल्लिका। नीलाकाचवर्णा नीलेतिमल्लिकाविशेषणं अत एव नीलात्प्राण्योषध्योरिति
नित्यं ङीष्प्राप्ते नीलेति टावंतपाठो लेखकप्रमादज इति सुभूत्यादयः। नील्या रक्तेव नील्या अ

रा॰मु॰२
११९

नित्यत्र्नीला अतएवकुवलयदलनीलाकोकिलाइतिप्रयोगः अतोनङीषितिसमाधेयं। कावन
गिमक्षिकायाएकं। यदातुनामत्रयंतदावासंज्ञायामितिङीषंतात्प्रपन्नेमुक्तएवटाविनितुवयं। मे
तिसरंतीसरंतंवाघातयतिएषंताडुंतेडः सुपसुपेतिसमासेपृषोदरादिः सरघादंत्यसा। मधुकारिणी
मधुवर्णावामक्षिकामधुमक्षिकाशाकपार्थिवादिः मधुवपोतिकंधामरेन्हौ। इंमाक्षिकंचवतुर्वि
धमितिवैद्यकंपुत्तिकादेश्चतत्रैवलक्षणमुक्तंपिंगलामहत्योमक्षिकाःस्वल्पाःक्षुद्राःक्षुद्रइतरा
श्चेतिपुत्तिकारुक्षायोहक्षकोटरेमधुकुर्वंति। हेमधुमक्षिकायाः। पततिइत्यार्थेऽल्पार्थेकुत्सि
तार्थेवाकनिकेवापतंगिकापुत्तिरितिशब्दंतनोतिटुःपुत्ताः कःटापपुत्तिकापुनायवाइतिवत्पुत्रो
विनाशार्थेपुनातिवधनेनविनाशयतिअन्येप्योपीतिड्विःप्रहशिग्रहणाद्बुस्वत्वेनुकिपुत्पुतम
नीतंतेकतेयातिकाकिवकिमकीत्यादिनादंडकेपठितात्गत्यर्थादिगुपधेतिकःसुपसुपेतिकमिधा

रा॰प
११९

रयेवा पुत्तिका। द्वे पुत्तिकेति ख्याता स्यमधुमक्षिकाविशेषस्य। दंशइति दशत्यनुदंशः। दंशवंशमश्व
केशपाशकाइति शभेदात्तालव्यांतः। वनस्यमक्षिका वनमक्षिका। द्वे वनमक्षिकायाः। दंशीति स्व
ल्पदंशजातिः अपचयविवक्षायां जाते रिति ङीष् दंशी स्यात् एकं। गेति गंधयत्यर्दयति गंध अर्दने वा
हुलकात् पटोलवद्दोलवृगोरादिः गंधोली गंधमालातिकः इवेवत् ङीष् गंधोलीत्येक इति स्वामी।
वरटोक्तात तोङीषि वरघ पिवरटावरटी हंस्योस्तत्पतौ वरटः स्मृत इति तारपालः। द्वे वरलीतिख्या
तायाः। भृंगेति रूपेण भृंगमियर्ति अनुकरोति अण् हद्धिः ङीष् भृंगारी। झीइति रौति मित्रप्याद्दित्वा
त् क्रुः ततः कन् टाप् झीरुका। चीति रौति कनि चीरुके ति स्वामी। चिनोति क डुशब्दं चिञ्चयने अस्य षि
चिञ्भ्यां रक् दीर्घत्वं पूर्ववत् ङीष् चीरी। झिल्ली वाद्यभेदः तत्तुल्यशब्दात् झिल्लीव कन् केऽणइति
ह्रस्वः टाप् झिल्लिका। चत्वारि झिल्लीति ख्यातायाः। सेति पतति पतत्ते रंगच् पतंगः। शालतिशमी

रा.मु.२
१२०

त्वयातिक्रम्य शालिकलिगर्दिभ्योऽभ्रचूशलभः। इफडिंगइ इति रमातस्य। खेतिखेद्योनते ऽत्र खंद्योत
यति अणिवा खद्योतः। ज्योतिस्तारकातद्दिंगति वलति ज्योतिर्युक्तमिंगतीति वा वलनशब्दार्थो दि
तिपुत्र्योतिरिंगणः। इजोनीतिरमातस्य। मेतिमधुव्रतयतिभुंक्ते मुंडयमिश्रेत्यादौ व्रताङ्गोजन
इतिणिवृत्त्रणमधुव्रतः। मधुकरोतिमुखे धारयतितान्छील्ये टः मधुकरः। अमधुकरेपिभ्रमरेरूढो
यमितिसुभूतिः। मधुलेढि क्विप् मधुलिट्। एवंपुष्पलिडपि। मधुपिवतिमधुपः कः। अलतिभूष
यतिपुष्पं अलभूषणादौवा हुलकात्पथिमाथिभ्यामिनिः अलीक्रस्वादिः अलिनारमत्तालिनीशि
लीध्र इतिमाघात्। भ्रमरइतिनाम्नि द्वौरेकावस्यद्विरेफः। विभर्त्तिमधुभृंगंगं गभृंगाइतिष्ट्नोगन्
डुः ह्रस्वभृंगः। षट्पदान्यस्यषट्पदः। प्रतिपुष्पंभ्रमतिवासरवहन्भ्रमरः। इयर्त्तिक्वणतो अर्त्तेरिः
लत्वे अलिः कस्त्वादिः अलममलेरिवगंधरसावमूइतिमाघात्। रोलंवेंदिंदिरवंवरीकपुष्पंधयम

राम
१२०

धुस्तूरनरोलंबादयश्चात्रैवर्द्दशश्रमरस्य। मेतिमीनातिहिंनस्तिमयतेवाऽहीनुमीञ्हिंसायांमयगतोरव
र्जिपिंजादिभ्यकरोजवैामघ्यांरोतीतिष्टखोदादिर्वामयूरः वर्हंपुंछंतद्योगात्फलवर्हीभ्यामिनन्नुवर्हिंणः
पन्होदनिःवर्ही। नीलःकंठोऽस्यनीलकंठः। भुजंगंभुंक्तेभुजंगभुक्। शिखायोगान्दंतशिखातसंज्ञा
यामितिवलच्शिखावलः। व्रीह्यादित्वादिनिःशिखी। एवंकेकायोगात्केकी। मेघनादेनानुल्लसितुं
नर्दितुंशीलमस्यणिनिःमेघनादानुल्लासी। नवमयूरस्य। केकेतिकेइतिशब्दंकायतिमनक्तिमूल
विभुजादित्वात्कः टाप्केका। एकंमयूरतस्य। सेनिचंद्राकृतित्वात्कनिचंद्रकः। ह्रस्वावर्णा। धि
क्यात्मेचकःसचोक्तः। द्वेपिछस्यचंद्राकृतेः। शिखेतिशिखोक्ताशिखेवशिखा। चोद्यतेसमुछ्रि
ताक्रियतेचुडसमुछ्राये एयंतात्भिदादिपाठादङ्‌दीर्घत्वेचूडा। द्वेमयूरशिखायाः। शीतिशिखिनंम
यूरममतिञ्मगत्यादिषुअमंताडुःशकंध्वादित्वात्पररूपत्वेशिखंडस्तालव्यादिः शक्तःशकुशि

खंडौ शम्याश्रमणइत्स्तूष्मभेदात्। अपिछ्यतिछिनत्तिकेवष्टीत्यकारलोपेपिछः। वर्हतेउघछतिव
र्द्धितेवाऽवृह ह्रूउद्यमेह्वहद्दौवाऽवृवर्ह। कंहरेर्देषवर्हइतिकालिदासोक्तेः पुंलिंगोपि। त्रीणिपिछ
स्य। खेतिखेनगछतिखगः अन्येषामपीतिडः। विहायसागछतिविहायसो
विहयडखच्चडिद्वेतिवार्तिकात्गमश्चेतिखश्विन्तुमिविहंगमविहंगो। डेतुविहगइतिविवेकः
। विशेषेणभुवंजहातिविहायाःसाधनंप्रागुक्तं। शक्नोत्तूईग छतिशक्कःशक्नोश्यकेरुंत्युंतोन्युनाइ
तिउंतिप्रत्ययेशकुंतिः। उंतप्रत्ययेशकुंतः। उनिप्रत्ययेशकुनिः। उनप्रत्ययेशकुनः। पत्त्रयोगात्
पत्त्री। अथममंडरूपेणपुत्तःशावकरूपेणेतिद्वाभ्यांजातोद्विजः अन्येष्वपीतिडः। पतत्रयोगाद्विनिः
पतत्रीएवंपत्त्री। पतंत्यनेनपुंसीतिघःपतःपन्हास्तेनगछतिपतगः। प्रायेणगछतिशतरिपतन्।
पत्त्राणिपन्हास्तत एव गतिसाधनत्वात्रथइवास्यपत्त्ररथः। अंडाज्जातःपंचम्यामितिडः अंडजः

एम
१२१

नगोवृक्षःओकआश्रयोऽस्यनगौकाः।जलौकावददंतोपि।वजंत्येभिर्घञ्वाजाःपक्षास्तद्योगादिनिः
वाजीवाजयंतिगमयंतिवाजाःपक्षास्तद्योगाद्वा।विकिरतिविक्षिपतिपक्षान्भक्ष्यंवाविकिरःकीटा
दिभक्षणार्थंभुवंविकिरतिवाइगुपधेतिकः।विकिरइतितुसुभूतिः।वयतिपक्षौविस्तारयतिवेञो
डिदितिइन्डित्वात्टिलोपःविःस्त्रियांवीतिसुभूतिः।विष्किरःशकुनिर्विकिरोवेतिसुट्परिनि
विभ्यइतिषत्वंविष्किरः।पततिउणादयोबहुलमितिपतेरत्रिःपतत्रिःपतेर्वक्त्यादयश्चेतिविस्क
डागमोघात्वंतरेश्चकारश्चेतिनिपातनाद्वा।नीडउद्भवउत्पत्तिस्थानमेषांनीडोद्भवाः।गरुत्मानुक्तः
पतितुमिच्छंतःपतेःसन्नंताच्छन्दवित्संतः।नभसंखंमेघवर्त्मविहायसमितिनिगमात्नभसम
दंतंचअत्यविचमितमिनमिलतिनमितपिपतिपनिपणिमहिभ्योऽसजित्युणादिसूत्रेणनभ
संखमितिपुरुषोत्तमः।नभसेनगच्छंतिगमश्चेतिखच्नभसंगमाः।सप्तविंशतिनामानि

रुषि२

पक्षिणः। तेषामितितेषांपक्षिणामेतेविशेषा इत्यन्वयः हारिमनोहरमितंगमनमस्यहरिहृणियो
गात्ज्योत्स्नाद्यणि अन्येषामपीतिदीर्घत्वेहारीतइतिवाहरितालइतिख्यातः।मन्जातिमस्त्वेअष्ट
म्रशीन्हवरित्सरित्यादिनाउःजश्त्वेनसकारस्यदत्वंन्यंक्वादित्वात्कुत्वंमद्गुः।पानीयकाकि
कायांमद्गुःस्यादितिरभसः।पानिकाडडीतिख्यातः।कारंडेभवंकारंडंजलंतत्रवासिकारंडवः आ
रमणमारंडः आरमेर्निमंतात्डःकेजलेआरंडःकारंडइतिकत्तिकारणेहलनाबहुलमितिसमासः
सोस्यास्तीत्यन्येभ्योपिदृश्यतइतिवप्रत्ययेवा॥अयंचरवनामप्रसिद्धः।जलोपरिप्लवतेयाति
पचाद्यचिप्लवःपीलवदेशांतरेख्यातः। उणादयोबहुलमितितरतेःसन्वत्तुकुचाभ्यासस्येतीत्
द्विर्वचनमभ्यासस्यचत्कुक्रृतइत्धातोरितीत्वं रपरत्वंचतित्तिरिःसवरवनामख्यातः।चित्र
पन्हकछत्रकः अईपारावतध्वनिश्चात्रकपिंजलोगोरतित्तिरिःतित्तिरोऽदृंतोपिकपोतान्लावति

न्निरा इतिवा वस्यतिः। कुकआदानेकोकते। क्विप् कुकुस कुन्नातिरगुपधकेद्वयोः कर्मधारये कुक्कुभः कु
गिन्यव्यक्तानुकरणंतत्कौतिरणः किदितिवा हुलकात्कौतेरपिभनि कुत्वे च कुक्कुभो वन कुक्कुटः ते
न कुक्कुह इतिख्यातः। लूयंतेदोषा अनेनलावः घञ् लावो आइ तिख्यातः। जीविनसहचरेण सहजी
वतिवा हुलकान्जीवेः खवुजीवंजीवः तद्दर्शनेनविषनाशात्जीवं प्राणिनंजीवयतेकर्मण्यणतत्
पुरुषे कृतीति द्वितीयाया अलुक्विवाजीवंजीवो जीवजीव इतिसुर्भकः सव मयूरवर्माणविचपन्हो
हं द्वचरः स्वनाम्नाख्यातो दक्षिणापथादौजायत इति। चकातिर्चन्द्रामृतपत्वात् विषंप्रतिहंतिव क
तश्रोत्रतिघाते वेत्यत भ्वकिकठिम्यामोरन् चकोरः कनिचकोरकः। कंजलमालंवनत्वातय ष्टि
रिवास्येतिसमासेकपिपूर्वपदाकारस्य नैरुक्तत्वेकोयष्टिकः घोंटा इतिख्यातः। टिट्टीतिशब्देनभाति
अन्येभ्योपीतिडः सुप्सुपेतिसमासः स्वार्थेकन् टिट्टिभकः टिट्टीहीतिख्यातः। वर्त्मनिवर्त्तते ऽ

रा.मु.२
१२३

स्वार्थिकः वर्त्तकोभाववद् इतिख्यातः वर्त्तकाशकुनौस्त्रावामिति इत्वनिषेधपक्षे वर्त्तका इत्वपक्षे वर्त्ति
शब्देनैवस्त्रीविवक्षायांवर्त्तिकेतिसिद्धे वर्त्तिकाग्रहणंवर्त्तिकावर्त्तकेतिद्वैरूप्यप्रदर्शनार्थनामहृद्य
मिदमित्यन्ये अयंचवाटभारद इतिख्यातः। आदिना शारिकादयो याल्याः स्वनामप्रसिद्धाएते पृथ
क्पृथक्। गेतिगृणातिशब्दायते गृशब्दे पृयोरुतिरित्युतिप्रत्ययः। गरुत्। पक्ष्यते परिगृह्यते
पक्षपरिग्रहे घञिपक्षः अस्त्रुनिसांतंचपक्षसीचस्मृतौपक्षाविनिस्तुभौकः॥ छदं क्लीवमपिग
रुत्पक्षौनरौछदमितिक्लीवकांडेचोपालितः। पतंत्यनेनदाम्नीत्यादिनाष्ट्रन्पत्त्रं। वाहुल्लकात्त्र
मिनन्तिकमिभ्यो ऽत्रन्निति अत्रनिपतत्रं। तत्वांरोहतिजायत इतिकः तनूरुहं। षट्पक्षस्य। स्त्री
तिपक्षस्यमूलेपक्षतिः पक्षातिः। द्वे पक्षमूलस्य। चेतिचंचतिभक्षइव्यंयातिप्राप्नोतिवंचुः मित्र
घादेनिपातितः अपष्ठ्वा दित्वादित्यन्ये। चंचूश्चंचुस्तथात्रोटिरितिहलायुधः त्रोटयंत्यनया।

राम
१२३

त्रुटच्छेदनेवा हलकात्दह्र–शारुहिम्यद्रन्त्रोटिः स्त्रियांङीषित्रोटीच। द्वेठौंठ इतिख्यातस्य। खगानांग
तौस्थानांतरसंचारेएताः क्रियाव्यापाराः कास्ताइत्याहद्वेतिप्रथमंडीनंभावेक्तः उड्डयनाय क्रमर्व
धः। ऊर्द्धं डीनमुड्डीनंवियद्गमनं। संगतंडीनंसंडीनं हन्त्वाद्दोपतनमितिसुभूत्यादयः। प्रडीनंति
र्य्यग्गमनं उड्डीनमूर्द्धगमनंसंडीनंसंगतगमनमितित्वन्ये। शेषंसुबोधंपक्षिणांगतिक्रियाणांपृ
थक्पृथक्। पेशीतिपेशीनांमांसखंडानांकोषः संघातः पेषीकोषः पिशअवयवेतालव्यांतः इःपिशि
रुहीतिइतीन्कृदिकारादितिङीषिपेशी। कुष्यतिनिष्क्रामतिशावकोऽस्मादितित्रकर्त्तरिचेतिघञि
कोषः। संघातविगृहीतत्र्यायंतेनपेशीकोषश्च। पेशीसुपक्वाकणिकेमांस्यांखङ्गपिधानके। मांस
पिंड्यामंडभेदइतिमेदिनी। कोषोस्त्रीकुड्मलेपात्रेपेश्याशद्वादिसंग्रहइतिच। द्विहीनेस्त्रीपुंसही
नेक्लीवमित्यर्थः। भ्रमतिनिस्सरतिशावकोस्मादितिजमंता ... डः अंडं। त्रीणिडिंबइतिख्यातस्य।

कुल्येति कुल्यान्यथंतेनिस्सरंत्यतः हलश्चेतिघञ् कुल्यायः कुलस्यसंततेरायोहद्विरत्रवा। निली
यंतेत्रेति डः टिलोपः अन्येषामपीतिदीर्घः डलयोरेकत्वस्मरणात् नीडं। द्वेपन्निवासाइतिख्यातस्य
पोतइति पुनातेर्गर्त्तवत्तन्पोतः स्त्रियांपोतीवयसिप्रथमइति ङीष्। पिबतिस्तन्यादिरसं इरणभी
कापाशल्यर्चिभ्यः कनिपाकः पच्यतेपरिणम्यतेऽनेन हलश्चेतिघञि वास्त्रियांपाका वा हुलका
त्केऽण इतिनह्रस्वत्वं। सदैवइयर्त्तिचलति हृद्विंगच्छतिवा अर्त्तिस्तुभ्यांभः ततः स्वार्थेकन् अर्भ
कः डयनंडीः छिपृडियाडयनेनभाति अन्येभ्योपीति डः पृषोदरादित्वान्मकारेकस्यत्वे वडिंसः।
पृथुप्रथुरंकायतिशब्दायतेपृथुकः। शाम्यतेसततंभ्रम्यतेऽनेनशावगतौ हलश्चेतिघञ् शावः स्वा
र्थेकन् शावकः स्तालम्बादिः शावशावशीभुशोरवरशाकुंतइतिशभेदात्। शश्नातिप्लुतेनगच्छतिशश्
प्लुतगतौ शशिरयोरत इति कुः शिशुर्द्वितालव्यः। सप्तशिशोः॥ स्त्रीतिस्त्रीपुंसयोर्युग्मंमिथुनंम

यतेसंगतीभवतिमिथुमेथुसंगमेअरुणवडुनवाहुलकाद्रुणभावःमिथुनं।द्वेमिथुनस्य।द्वौद्वौद्वंद्वं।द्वं
द्वंरहस्यमर्यादावचनइतिनिपातनात्साधुः।स्वामीतुमिथुनद्वंद्वयोःपर्यायमाह।युजिरयोगेयुजि
रुहीतिमकुयुजेश्रुत्वंवयुग्मं।हषादित्वात्कलचन्यंक्वादित्वात्कुत्वंयुगलं।युजेरिगुपधत्वात्कः
कुत्वंचयुगं।अत्रद्वंद्वादिचतुष्कंयुगमात्रइतिसुभूत्यादयः।युग्मंयमलयामलेइतिरभसः।सम्यग्वि
शेषेणोह्यतेवहुत्वात्पुंजीभूतत्वेनहल्लश्चेतिघञ्समूहः।निःशेषेणोह्यतेनेननिवहः।पुंसीतिघः
विशेषेणोह्यतइतिपूर्ववत्व्यूहः।सम्यगुह्यतेप्रपूर्य्यतेनेनघञ्संदोहः।विशेषेणस्त्रियतेगम्यते
नेनेतिविसरः।एवंव्रजः।गोचरसंचरेत्यादिनानिपातितः।स्तूयतेश्लाघ्यतेसोमवत्स्तोमः।उचस
मवायेघञ्न्यंक्वादित्वात्कुत्वेनचोघत्वंओघः।आउह्यतेघजिन्यंक्वादिकुत्वेनहस्यघत्वेनवा।
निकीर्यतेविस्तीर्णंक्रियतेकिरतेःऋदोरपिनिकरः।व्रात्यतेनियम्यतेनेनव्रातेर्एर्पत्वात्घञ्व्रातः

अन्नवा। व्रियते आच्छाद्यतेनेन वारः वारयतीति एरंतात्प चा घ विवा। संहन्यतेनि विडीक्रियतेनेन संघातः। संचीयते चीयते च एरविसंचयः चयश्च। सम्यगुद्यंत्यनेन वा कुलकात्घञ्समुदायः। एवमेते रच्समुदयः। समवयंत्यनेन वा कुलकात्घञ् समवेताभवंत्यत्र वाऽधिकरणे घञ् समवायः आङ्पूर्वो दृश्यते समवाय इति मधुमाधवी। गणयनेघञर्थेकः कर्मणि घञि वा गणः। संपूर्वी हंतेः क्तिन् संहतिः। हणोत्याहरणोति अद्दादयश्चेतिदः तुमवहंदं। कुरच्छेदने कुरति विच्छिन्नं भवति वा कुलकात्स्यस्तो वजबकावितिस्त्रे वव्अकारस्योत्वं व निकुरुंवं। कदेः सौत्रात्कदेर्णिद्वेन्यं वव्रस्वार्थे कनि कदंवकं। द्वाविंशतिः समूहस्य। हंदेति वन्नंत इतिशेषः। जात्यासंस्थानादिना वा प्राणिभिरप्राणिभिर्वा समैस्तुल्यैरुपलन्नितं हंदं वर्गः हज्यते टथक्क्रियते विजातीयेभ्यः कर्मणि घञि कुत्वे वर्गः। सजातीयानां विजातीयानां वजंतूनां हंदे संघसार्थौ स्यातां यथा भिन्नुसंघः वणिक्सार्थः संहन्यते परिच्छिद्यतेनेनसं

घोघावित्यादिनाऽच्‌ घत्वं संघः यूथादयश्चेति सन्नैस्थक्त आत्वेर परत्वेव सार्थः। भागुरिस्त्वविशेषेणैवा
हसङ्घसङ्घातपुञ्जौघसार्थयूथकदम्बका इति। सजातीयैरेव जंतुभिः कुलं अन्यत्र तूपचारात् कु
लसंस्त्याने इगुपधत्वात् कः कुलं। तिरश्चामेव सजातीयानामेव वृंदं यूथं उपचारादन्येषां वयुभिश्राणे
यूथश्चोथा विनिति पातितः। पशूनामेव संघः समजः समुदोरजः पशुष्वित्यपि अन्येषामपि पशूनां संघः
समाजः घञ्। अयेति सधर्मिणां समानधर्मवतां संघो निकायः संघेवानौत्तराधर्य्ये इति निचिनोतेर्घञ्
आदेशश्च कः निकायः। यथायथं हंदमे दानां पुंजेति पिंज निवलने तुजिपिजि हिंसाबलदाननिकेत
नेषु पचाद्यच् नैरुक्त मिकारस्योत्वं पुंजः उत्कत्या पुमांसं जपति अन्येभ्योपीति डे वा। अस्तुते मा म्नो ति अ
मूव्याम्नो अशिपणाय्योरुडायलुकावितीन् प्रत्ययेरुडागमश्च राशिः। उत्कर ईर्यते क्त दोरप् उत्करः।
कूटमुक्तं। चत्वारि धान्यादि राशेः। के ति तेषां कपोतस्त्वकमयूरति नि रीणां गणे कपोत मयूरति नि रि

रा॰मु॰२
१२६

भ्योऽनुदात्तादेरञ्। शौकं तस्य समूह इत्यण्। आदिशब्दात्काकवर्त्तकउलूककादंबादियहः। स्वनामप्र
ख्यातानां कपोतादीनां पक्षिणां पृथक्पृथग्गणस्य। गृहेति क्रीडार्थं पोषणादिना ये मृगपक्षिणो
गृहासक्ता गृहमाश्रितास्ते छेकाः छ्यंति वैमनस्यं छेछे दने अलीकादयश्चेति कन्। तो निपातनात् छेका
ः छेकस्त्रिषु विदग्धेषु गृहासक्तमृगांडजइति च वर्गाद्यैरभसः। गृह्यंतेऽस्वतंत्री क्रियंत इति गृहेः पदा
स्वैरिव्याश्चापन्तोषु चेति कश्च पृततोऽनुकंपायां कनुगृह्यकाः॥ ॥इति सिंहादिवर्गविवरणं समाप्तं॥
॥ ॥मेति मनोरपत्यानि मनोर्जातावञ्यतोषुक्चेति षुगागमः मनुष्याः पूर्ववद्रञिषुकि च मा
नुषाः स्त्रियां तु हयगवयेत्यादिना ङीषि हलस्तद्धितस्येति यल्लोपे मानुषी अञिति टिड्ढा ।नेतित्यादिना
ङीपि मानुषी। मर्त्या अमर्त्या इत्यत्रोक्तः मर्त्तो भूर्लोकस्तद्भवा दिगादित्वादिति मर्त्या इति वा। मनोर्जाताः
मनुजाः। मनोरपत्यानि मानवाः औपसंख्यानिकोऽण्। मानवस्तूपसंख्यानादिति भाषावृत्तिः। न

एम
१२६

रंति नयेन व्यवहरंति न्हनये ऽत्र नराः नयंति पूर्वं पुरुषाणां तु वा तसमां गतिं नयते र्डित्रिति का नृ हित्वात् टिलोपः न
रा इति वा। पुरुषमानुषजातिमात्रस्य। स्पुरिति पुनंति पांति वा कुल्वादीतिपाने ईमसुन् पुनातेर्मगसुन् क्रस्च
त्वं चेति पुमांसः। पंचभिः पृथिव्यादिभिर्महाभूतैर्जन्यंते जनजननेघञ्जिकत्वे षष्ठ्यंतेन क्रियायोगा चेति समासः
पंचभिर्जायंते ऽत्र कर्त्तृकरणे क्तेति समासे वा पंचजनाः। पिपर्ति पालयंति पुरं त्यग्रे गच्छंति वा पृ पालनपू
रणयोः पुरः अग्रगमने वा पुरः कुसन् उरोष्ठ्यत्यादिनोत्वे नृपरत्वेव पुरुषाः। अन्येषामपीति दीर्घत्वे पूरु
षाः। नयंति भारादिकं नयंत्युन्नतिमात्मानं वा नयते र्क्तान् डित्वे टिलोपः नरः पंच मनुष्यजातौ पुरुषस्य
। स्त्रीति स्त्यायति संहतः कठिनो भवत्यस्यां गर्भ इति स्त्यायते र्ड्रट् टिलोपे वलियलोपे च स्त्री। योषति
युष्यते वा पुंभिः युषेः सौत्रधातोः सेवार्थात् तस्मात् हियुषिभ्य इति योषिदं तस्यादिः अजादिपाठाड्डाग्
रिमनेटा पियोषितापि। स्त्री वधूर्योषिता वामे ति त्रिकांडशेषः। अल्पं वलमस्या अल्पार्थे नञ् अब

रा.मु.२
१२६

ला। योतिमिश्रीभवति युमाभ्यांसः ततस्ता प्रयोषाजोषयति जुषपरितर्कणे जुषति श्रीणातिवा जुषेः
स्नौदादिकाद्विटापि ववगीतनीयादिरपीति वर्णदेशनेति सुभूतिः। नुर्नरस्य वा धर्मिश्चाचारोऽस्याः
न्टनराभ्यां चेत्यजहद्भिः टिड्ढाणञ्जीतिङीप् नारी नुर्नरस्य वेयं तस्येदमणिहद्धो नारीति वा। केशवेश
स्यसीन्नोंऽतः समाम्निरवसीमंतः शकंध्वादिः नद्योगादिनिसीमंतिनी। वभ्रात्यविद्यया च मितनिवधे
म्यइस्मूः वधूः उह्यते भर्त्रेति वहोधश्चेतिलुः धश्चांतादेशः वधूः। प्रतीपं तिर्यक्कइष्टुं शीलमस्याः प्रतीपद
र्शिनी। वमत्स्युङ्गिरनिघ्राति कृल्प्यंस्तेहं वा वमेर्हल्लादित्वाणः टापि वामा। वनति सम्भजते वन्यते
वा रोहितवदितत्व्वनिता। मस्यते भूषणादिभिरियमिति सलिकल्यनीत्यादिना कलिवदिलच्टाप महिला
महस्योत्सवस्य इला भूमिरिति महेलापि प्रसभमिवांगदविह्वला महेला इति काष्क्रिणाभ्युदयादेः
एकादश स्त्रीमात्रस्य। वीति वन्द्यमानाः स्त्रीणां विशेषाभेदावाच्याः विशिष्टाः स्त्रिय इत्यर्थः। प्र

रा.म
१२७

रा.मु.२
१२८

सतिलड्विलासेनंद्यादित्वात्ल्युः डलयोरभ्यन्य इति लत्वे ललई प्सायां एयंताद्यु विललना ईप्साश्र
शस्ततद्योगादविचाल्ललना। पृथुत्वात्प्रशस्तनितंबयुक्ता नितंबिनी। सुष्ठु उनत्ति आर्द्रीयति मन इति
उंदीक्लेदने सुपूर्वस्ततोवासरवद्दा हल्कादरन्यशकंध्वादित्वात् ह्वयोरुकारयोः पररूपत्वं रूपला
वण्यादिसंपन्नासुंदरी गौरादिः। यावपुर्गुणोपचारेण कांतं रमयति नंद्यादित्वाल्ल्युः गौरादिः र
मणी। यागीतकला भीरमते रमयतिवा ह्लादित्वा दिनाणः वामा। उत्कृष्टस्त्री विशेषाणां पृथक् पृथक्।
कोपेति कोपशीला कोपना क्रुधमंडार्थेभ्यश्चेति युच्। भाम क्रोधे आवश्यके णिनिः अनितकोपनाभा
मिनी। द्वेकोपनस्त्रियाः। वरेतिगौरवातिशयाद्वरः श्रेष्ठ आरोहः श्रोणिरस्या वरारोहा। मंथरगमनामत्त
त्तइव न्हीवद्वक सतिकसगतौ कर्तर्युपमाने णिनिः मत्तकासिनी दंत्यसाम त्तेव काशते भातिमत्त
काशिनी। ता लक्ष्मभ्यापि। उत्कृष्टादुत्कर्षवचनात्तमप् उत्तमा। वरवर्णयोगात् इन्निः वरवर्णिनी शीते

राम
१२८

शस्तानि लक्षणोपेतानि हस्तपादादीन्यंगान्यस्याः संति अंगात् कल्याणाइति [illegible] पामादेपाठान्नः टाप्
अंगना। भयप्रकृतित्वात् भीरुः भियः क्रुक्लुकनाविति कुः। भीरुः स्यात् कातरे नार्य्यामित्यजयः। भीरुरार्त्तेजि
ने स्त्रियामिति रभसः। भीरुशब्दस्य सुरासुरकिन्नरादि स्त्रीष्वपि ह्रन्तिरिति ऊङ्। तरति मनुष्यजाति विहित
ऊङ्कास्ति भीरुशब्दस्ताच्छीलिकः संज्ञाप्रकाराश्च ताच्छीलिका इति भाष्योक्तेः मनुजातिविवक्षयाऊङि
भीरूरित्यपि स्त्रियां भवतीति ऊङ्। तद्दत्यत्र भीरूरिति भाष्याहृत्तावुदाहृतं कुतस्त्वं भीरुमत्तेभ्य इत्युपपद्य
ते भीरुरित्यत्र मनुष्यजातेर्विवक्षा चाविवक्षा बलक्षानुसारादिति काव्यादर्शे वामनः। कामः शृंगाररू
पो मन्मथोऽतिशायितो स्यामस्तीति निः कामिनी। वामे चारुणी लोचने अस्याः वामलोचना॥ रू
पसौभाग्यजनितः प्रकृ[illegible]ष्टो मदो गर्वोऽस्याः प्रमदा। भावः शृंगारचेष्टाविशेषस्तद्युक्ता भाविनी। क
मनीयमूर्त्तिः कांता कमे मेति बुद्धीत्यादिना क्तः कांतिः सर्वांगसौंदर्यं [illegible]द्योगादज्वा लङ इति विल

सीरुइतिसंबुद्धावुपपद्यते ८

सुखोष्णसर्वांगीग्रीष्मेयासुखशीतला।भर्तृभक्ताचयानारीसाभवेद्वरवर्णिनीतिरुद्रः।वरारोहादिव
गुष्कमत्यंतोत्कृष्टस्त्रियाःपूर्ववबत्वार्थनान्यपिस्त्रीविशेषाणांपृथक्पृथगित्यन्ये।कृतेतिमहादे
वीत्वेनकृताभिषेकाबद्धपट्टा।नृपस्त्रीमह्यतेपूज्यतेऽसावितिमहपूजायां।अविमह्योष्टिषच्इतिटित्त्वा
न्ङीप्महिषी।एकंपट्टमहादेव्याः।भोगीतिमहिषीतोन्या।अकृताभिषेकाभोगातिशययोगाद्भिनिः
नृपस्त्रियोभोगयोगाद्भोगिन्यः।एकं।पतिपत्न्योरूद्वाहविहितयज्ञयोगात्पत्नीपत्युर्नोयज्ञसंयो
गइतिइकारस्यनत्वंपत्नी।गृहीतःपाणिरस्याइतिपाणिगृहीतीवाहिताग्न्यादित्वात्परनिपातः
बहुव्रीहेश्चांतोदात्तादित्यत्रपाणिगृहीतीभार्यायामितिङीष्।द्वेयज्ञसंयोगपूर्वकपरिणीतास्त्रि
याः।अन्येत्वभेदेनसप्तभिःपर्यायमाहुः।द्वयोःपूरणीद्वितीयाद्वेस्तीयः।पत्यासहयज्ञादिधर्माच
रणाधिकारात्धर्मशीलवर्णादिभिःसहधर्मिणीसभावपत्नेसधर्मिणीतिवा।भरणाद्भार्या।

अर्हैत्यत्वस्खेतिएषस्त्र।जायतेपतिरस्यांआत्मावैजायतेपुत्रइतिस्मृतेः।जायायास्तद्धिजायात्वं
यदस्यांजायतेपुमानितिच।अथेतिपुंस्त्वेवहुत्वेचदारादारयंतिभ्रातृभ्यःपतिंपृथक्कारयंतिअथि
दाराःदाराटावंतापिहड्डचंद्रःकोडाह्वारानथादारात्रयएतेयथाक्रमं।कोडेह्वाप्येवदारेषुशब्दाः
प्रोक्तामनीषिभिरितिबाडिस्त्रुभांकौपल्यादीनामुपचाराद्वृत्तिः।स्येतिकुटुंवंपोष्यवर्गःतद्योगा
दिनिःकुटुंविनी।पुरंगृहंधरतिहलंतादिगुपधात्किःएषोदरादित्वा लुम्पुरंध्रिःवाङीपिपु
रंध्रीः।कुटुंवंपोष्यवर्गेचेत्यमरमालातोस्नातकैर्वधुमतावराङ्गापुरंध्रिभिश्चक्रमशःप्रयुक्तमि
तिरघुः।पुरंनपुंसकंगेहइतिमेदिनिः।द्वेपुत्रदुहित्रादिमत्याःपतिसहितनार्य्याः।सुवेतिशो
भनंचरित्रमस्याःसुचरित्रा।सतीनियतैकपतित्वात्प्रशस्ता।अतएवसाध्वीशोभना।पतिर्व्रत
मिवसदैवोपास्योस्याःपतिव्रता।चत्वारिपतिव्रतायाः।क्तेतिसपत्नीभावःसापत्न्यंस्त्रियांष्यञि

पित्वात् ङीष् हल्ङ्यादिलोपः संयोगान्तस्येति यलोपः सापत्नी ततः कनि ह्रस्वत्वे च सापत्निका कृतो नोत्पादिता सापत्निका यस्याः सा तथा सपत्न्या आगतं इदं सापत्नं तत आगत इत्यण् ततः स्वार्थे कन् कृतं सापत्नकं यस्याः कृतसापत्निकेति तु हस्वं दुः। अधि प्रथम मूढा अध्यूढा। अधिविन्ना प्रागूढा अधिशब्दस्य प्राधान्यार्थत्वादिति सुभूतिः केचित्तु अधिपूर्वो विंदतिराधेन्तिक प्राग्विवहनेवर्ततइत्याहुः तन्मतेअधिविविदुरमात्यैराहृतास्तस्य यूनः प्रथमपरिगृहीते श्रीभुवौ राजकन्या इति रघुः॥ त्रीणि कृतप्रथमद्वितीयविवाहस्य प्रथमोढायाः। अथे तिस्वयंवृणीते पतिमिति विश्वंभरावत् खच् स्वयंवरा॥ एवं पतिंवरा। पतिवरणे ऽनिरुद्धा वर्या ऽवद्यपण्येति यत् वर्या। त्रीणि स्वेच्छाकृतपतिवरणायाः॥ कुलेति कुलस्य रक्षिका स्त्री कुलस्त्री शाकपार्थिवादिः। कुलं पालयति कर्मण्यण् तातत् कन् कुलपालिका। द्वे अव्यभिचारेण कुलरक्षिकायाः। केति कन्यते काम्यते कनी दीप्तिकान्तिगतिषु

रा॰मु॰२
१३०

अम्पादित्वान्यत्कमुकोनाविन्यतोऽम्पादयश्चेतियतिमकारस्यनकारेवाकन्याकन्यायाःकनीनचे
तिनिपातनात्नवयसिप्रथमइतिङीप्।कुमारयतिक्रीडयतिचुरादौकुमारक्रीडायांजर्त्ववयसीति
ङीप्कमेरुश्चोपधायाइत्यारन्प्रत्ययेउपधायाउत्वंङीपिका।कुमारी।अष्टवर्षाभवेद्गौरीदशवर्षा
तुकन्यका।संप्राप्तेद्वादशेवर्षेकुमारीत्यभिधीयतइतिस्मार्त्तोभेदः इहत्वभेदोपचारात्पर्यायता।
पुंयोगेनकन्यात्वंनिवर्त्ततइत्यन्ये।द्वेकन्यायाः।गाविति।अष्टवर्षाभवेद्गौरीदशमेनग्निकाभवेदि
तीहस्मार्त्तोभेदोनादृतः।लज्जतेश्रोलज्जीव्रीडेक्ता।श्रोदितश्चेतिनिष्ठानत्वंकुत्वंपृषोदरादित्वाद्दा
देर्नत्वंकनिइत्वेचनग्निकाकेचित्तुश्रोलज्जीतितवर्गपंचमादिंपठंति।अनागतमप्राप्तमार्तवमृतुभ
वंरजोयस्याःसाऽनागतार्त्तवा।त्रीणिअनागतार्तवायाःस्येतिवाल्ययौवनयोर्मध्येभवावर्त्तमाना
मध्यान्मःतयोर्मध्येमाल्लक्ष्मीर्यस्यावामध्यमा।दृष्टमनुस्मृतंरजोययायस्यावासादृष्टरजाः प्र

रम
१३०

यमग्राम्भरजा इत्यर्थः ।२। अयमग्राम्भरजो योगायाः । नेनित्त रति प्लवते युवानमिति कृष्टदारिड्युटन्नर इ
त्यनुवर्त्तमाने चौरस्थलोवेति सूत्रेण तत्र इ तेरुननरस्थवालत्वं वसीति ङीपु तरुणी तरुणी वयोतिपति
देहे न मिश्री भवत्येकी भवति कनिन्युवृषीति कनिवयूनस्तिः युवतिः । स्त्रीसामान्यवाची वयुवति
शब्दः प्रमदावेति विज्ञेया युवतिस्तु तथा स्मृतेति भागुरिः । प्राग्यौवना युवतिरिति वात्स्यायनः ॥ यो
नेः कतिरिति कतिप्रत्ययं तात्पान्तिके ङीपि युवती । समे तुल्यार्थे लिंगे । ह्वे युवत्याः ॥ सेतिस्तोतिप्रा
ये एणपश्चात्प्रसूते स्नुषु प्रसवे नषिद्गुषिहषिस्नुभ्यः सकुषत्वं स्नुषा । जायते लग्नार्संततिर्वा ऽ
स्यां जनिघसिभ्यामिण्हस्वभावो जनिवध्योश्चेति जनिः ङीष् जनी भार्यामात्रेपि जनी । जनी सीमं
तिनी वध्वोरिति मेदिनिः । वधूरुक्तैव । त्रीणि पुत्रादिभार्यायाः । वीतिपितृकुलस्नेहाच्छिरमिटतिगच्छ
ति विरमित्युपपदे इट गताविन्यत इगुपधात्के षोदरादित्वात्चिराकार । नाशो इकारस्य विपर्य

येमकारस्यपरसवर्णत्वेवयसिप्रथमेङीपिविरिंटीऊढाऽप्यनूढावापितृगृहस्थिताप्राप्तान्ययौवनाविरिंटीचरं
टीत्येके। स्वाशातयस्तेषुवस्त्रंकंशीलमस्याणिनिः स्ववासिनी। सुखेनवसतिसुवासिनीतिद्राविडाः। स्ववासि
न्यांविरिंटीस्या द्वितीयवयसिस्त्रियामितिरुद्रः। द्वेपितृगृहस्थायाः परिणीतायाः। इच्छेतिधतगीतनृत्यादा
विच्छायुक्ताइच्छावती। कामयतेऽभिलषतिकामुकः कमुकांतोलषपतपदेत्यादिनोकञ्। नोदात्तोपदेशस्ये
त्यादावनाचमेरित्यनचमिकमिवमीनामितिनिषेधान्नवृद्धौकामुका। द्वेधनादीच्छायुक्तायाः। हषेतिमैथु
नेच्छावतीतुहषोनरोहषः कालइत्यनेकार्थमञ्जरी। हषंनरंप्रमांसंरत्यर्थमिच्छतिक्यच्। अस्मद्दषयो
मैथुनेच्छायांसुक्लटः शत्रंनातङीपिहषस्यंती। कामुकीतिकामुकशब्दाज्जानपदेत्यादिनाङीष्। का
मुकीद्वेमैथुनेच्छावत्याः। केतिभर्त्रर्थिनीसंकेतंसंकेतस्थानंयागच्छतिसाऽभि सरतिसंकेतस्था
नमभिसर्तेर्ण्वुल्। अभिसारिका। हित्वालज्जांसमाकृष्टमदेनमदनेनवाऽभिसारयतेकांतंसाभवेदभि

राम
१३१

सारिकेतिभरतः॥ एकं। पुमितिपत्युरन्यपुमांसंहन्त्राच्चलयति आवयतिकर्मण्यंतात् ङीष्पुंश्चली। कर्ष
तिमनोयूनांकर्षेरादेश्चधइत्यनिः आदेश्चधः धर्षिणीतिवहुसंमतः पाठः आवश्यकेणिनोधर्षिणीत्येके।
पुरुषांतरेमनोवध्नातिगवुल्बंधकीगौरादिः। असतीअसाध्वी। कुलान्यटतिअविकुलटांशकंध्वादिः। स्वे
च्छयासर्वत्रएतिभ्रमतिताच्छील्यइण्णशजीतिक्करपिङ्ङीमिइत्वरी। स्वेनलक्षणयास्वेछयाईरितंगंतुंशीलम
स्याईरगतौणिनिः स्वाहिरेरिणोरितिहद्धिः स्वैरिणी। मालिन्यहेतुत्वात्पांसुरत्रपापंतद्योगात्खसुखकुंज
नगपांडुपांसुभ्यश्चेतिरः कपिरिकादित्वाल्लत्वंपांसुलातालव्यांतादंत्यांतावशंवशूकरपांशवइतिश
भेदात्। अष्टावसत्याः। अशीतिशिशुनापुत्रदुहितृरूपापत्येनरहितास्त्री अशिश्वीसरमशिश्वीनिभा
षायांङीप्॥ एकं। अवीतिवीरयतिविक्रामयतिवीरयतेःपचाद्यच्वीरापतिःपुत्रवतीवीरेतिनाममाला
तद्विपरीताअवीरा। एकं। वीतिश्वसप्राणानेतालव्यादिःभावेक्तःआदितश्चेतिवकारादिङभावःश्वस्तं।

रा.मु.२
१३२

जीवन्नं तद्धि फलं विरुद्धं वा ऽस्या विश्वस्ता। विगतो धवो भर्त्तास्याः विधवा। विश्वस्ता विधवे तुल्ये विश्रास्ता घतिनी
वसेति वाचस्पतिः। हेमृतभर्तृकायाः। आलिरिति अलभूषणे आङ् पूर्वः आलयति भूषयति वा हुल
काज्जनि घसिभ्यामिण् आलीयते विश्वासो ऽस्यां आङ् पूर्वो लीङ् श्लेषण इत्यतो ली ङ्गो डिरिति वा हुल
का ङ्रिः टिलोपो वा आलिः पन्ते ङीषु निवार्यतामालिकिमप्ययं वटुरिति कुमारः। समानाख्यायते
जनैः समानेख्य इति डिन् टिलोपः सख्य शिश्वी ति ङीष्सखी। वयसा तुल्या नो वयो धर्मेत्यादि नाय
त्वयस्या। त्रीणिसरमाः ।पेतिपतिरस्या अस्तीति मतुप् अन्तर्वत्पतिवतो र्नुगिति ङीप् नुकौ अस्मादेव
निपातना हत्वं पतिवत्नी। भर्त्ता सह वर्त्तते सभर्तृकान घृतश्चेति कप्। हे जीवद्भर्तृकायाः। हद्धेति वर्द्धते
स्म हधेरकर्मकत्वात् कर्तरि क्तः हद्धा पक्वकेशी। जरसा केशादेः शौक्ल्यं पलितं तद्योगादर्श आद्यचि पलिता असित
पलितयोः प्रतिषेधः क्त इत्येक इति क्त आदेशो पलिक्नी पलिता च। हे हद्धायाः। प्रेतिप्रकर्षेण जानाति आ

राम
१३२

तस्योपसर्ग इति कः। टाप् प्रज्ञा। ततः स्वार्थे प्रज्ञाद्यणि ङीषि प्राज्ञी। द्वे स्वयंज्ञायाः। प्रेति प्रज्ञा। श्रद्धार्चेत्यादिना
णो बाहा। प्रशस्तबुद्धियुक्ता धीमती। द्वे प्रशस्तबुद्धेः। शूद्रीति शूद्रस्य भार्या भिन्नजातीयापि शूद्री पुंयोगा
दिति ङीषि। शूद्रजातिविवक्षायां तु शूद्रा। चामहत्पूर्वा जातिरित्यजादिपाठात् टापि शूद्रा। एकं। आभी
ति। आभीरो गोपविशेषः स एव महाशूद्रः स्त्रियां अमहत्पूर्वेति निषेधान्न टाप् ततश्च जातौ जाति
लक्षणो ङीष् पुंयोगे पुंयोगादिति ङीषित्याह ज्ञोति जातिपुंयोगरूपार्थभेदेपि रूपस्वरसाम्यात्।
समेत्युक्तं। द्वे गोपालिकायाः। अर्येति अर्यो वैश्यः तद्भार्या पुंयोगाविवक्षायां स्वयं पुंयोगं विना जा
तिमात्रे एवं अपुंयोगे अर्यी क्षत्रियी अर्यक्षत्रियाभ्यां वेति ङीषानुकावत्र न स्तः तयोरपुंयोगविष
यत्वात् तथेत्यनेन समुच्चयार्थेन पुंयोग इत्यनुकृष्यते अयोपधादिति निषेधान्न जातेरिति ङीष्
न ततश्च टाप् अर्या। एवं क्षत्रिया पक्षे अर्यक्षत्रियाभ्यां वा ङीषानुकौ अर्याणी क्षत्रियाणी। द्वे वैश्यक्ष

रा.सु.२
१३३

त्रियस्त्री जातेः। उपेति स्वयं या विद्योपदेशिनी उपेत्याधीयतेस्याः इङश्चेत्यपादाने स्त्रियामुपसंख्यानं
तदंताच्च वा ङीषिति कात्यायनवचनादपादाने घञंतात् स्त्रियां वा ङीष् सा उपाध्याया उपाध्यायी। द्वे स्व
यं विद्योपदेशिन्याः। स्यादिति स्वतो मंत्रआख्याकृदाचार्य्या आचर्यते उपास्यते ऋहलोर्ण्यत् आचार्या।
एकं स्वयं मंत्रव्याख्यात्र्याः। आचेति आचार्यस्य स्त्री पुंयोगे इंद्रेत्यादिना ङीषानुकौ आचार्यादणत्वं चेति ण
त्वाभावः आचार्यानी। एवमुपाध्यायस्य स्त्री पुंयोगे उपाध्यायमातुलाभ्यां वेति ङीषानुकौ उपाध्या
यी। पोटेति स्त्रीपुंसयोर्लक्षणं विक्रमस्यां स्त्रीपुंसलक्षणा पोटा पुटति स्त्रीपुंसलक्षणेन श्लिष्यति पु
ट संश्लेषणे अच् पोटा स्तनश्मश्र्वादियुक्तेत्यर्थः। द्वे स्तनश्मश्र्वादियुक्तायाः। स्त्रियाः। वीति वीरः पतिर
स्याः नित्यं सपत्न्यादिष्विति नकारादेशे वीरपत्नी। वीरस्य भार्या वीरभार्या। द्वे वीरपत्न्याः। वीति वीरं
सूतवती सत्सूद्विषेति क्विप् वीरसूः। द्वे वीरमातुः। जेति जातमपत्यमस्या जातपत्या। प्रपूर्वो जनि

नी नुपाध्यायी ४

२५५
१३३

गर्भमोचनेवर्त्ततेगर्भस्यकर्मणोधात्वर्थएवप्रदेशादकर्मकत्वेगत्यर्थेत्यादिनाकर्त्तरिक्तः प्रजाता। एवंप्र
सूताऽपि। स्वार्थेकनिप्रसूतिका। चत्वारिप्रसूतिकायाः। स्त्रीतिनग्निकोक्ता। कुट कौटिल्ये कुटनंकोटः
कोटेनकुटिलतयामुखादिनमनेनलज्जावशाद्वेतियातिवीगतिप्रजनकांत्यसनखादनेषुक्विप्गौ
रादिः कौटिल्ययोगादन्येभ्योपीतिवप्रत्ययेगौरादिङीष्वाकोटवी। कुट छेदने कुट्टनंकोट्टः वाहुल
काज्जुणः लज्जाभावात्कोट्टंछेदंवेतिकामयतेक्विप्गौरादित्वात्ङीष्कोट्टवीतिरूपरत्नाकरः सच
मुखस्थः पाठः। द्वेनग्नायाः। दूतीतिदुउतनिम्पांदीर्घश्चेतिक्तादीर्घोदूतःगौरादिङीषिदूतीतिसर्वधरः
सकामयोः स्त्रीपुंसयोः संदेश हरणाद्दूयते दु दु परितापेवा हुलकाद्दुसेक्तिः दूतिः वाङीषिदूती
तिगोवर्द्धनपुरुषोत्तमौ। संचारयतिप्रापयतिकामिनोः संदेशं ण्वुल् संचारिका। समेइत्यनेन
दूतीवत्संचारिकायामपियोगरूढित्वमुक्तं। द्वेदूत्याः। केतिधर्मप्राधान्याद्र्द्धेतद्धत्वंयस्याः सा

ऽर्द्धवृद्धार्द्धेनासम्यग्वृद्धावायाऽर्द्धवृद्धाकाषायवस्त्राविधवाचेतिविशेषणत्रयोपेतासाकात्याय
नीवकात्यायनीतस्यास्तपस्यावस्थायामृषिपत्न्याकारत्वात् व्युत्पत्तिस्तुप्रागुक्ताएकं।सैरीतिपरगृह
स्थास्वतंत्राप्रसाधनालेपनादिशिल्पकारिणीतिविशेषणत्रयोपेतासासैरिंध्रीस्वैरंस्त्वाकंधंधर
तिमूलविभुजादित्वात्केटषोहरादित्वाद्धलोपेइकारनकारौगोराहिडीषिसैरिंध्रीइत्यादिःसैरिंध्रीप
रवेश्मस्थाशिल्पकृत्स्ववशास्त्रियामितिदंत्यादौरभसः।एकं।असीतियाऽवृद्धायुवतीमहादेवीभिः
प्रेष्यतेऽतःपुरेवपुनःपुनश्चरतिसाऽसिक्नीषिन्त्वंधनेयुसिहृङ्भ्यःक्नःसितासुक्लकेशादिमती
नजिटापिततोऽन्याऽसिताकृष्णकेशादिमतीअसितपलितयोःप्रतिषेधइतिङीष्नकारप्रतिषे
धात् क्न इत्येकइतिङीप्क्रस्थानादेशः।।एकं।वेतिध्रियतेसंभज्यतेवेश्याजनोतेनवाकृत्यादकर्त्तरि
वेत्यादिनाघञिवारोवेश्याधंत्तःततप्रतिवृद्धास्त्रीवारस्त्रीतिसाधारणस्त्रीत्वात्वारस्यहंदस्य।

स्त्रीवारस्त्रीतिवावारयति हृणीतेवुरादिएयंतात् विवाराततः कर्मधारयेवावारस्त्रीगणिकावेश्यावा
रोवेश्यागणः स्मृतइतिनैगम्माभिधानमितिसुभूतिः। चतुःषष्टिकलाकुशलतयारूपशीलादिमत्
यावगण्यतेआड्रियतेगणसंख्यानेक्तःजादिभ्योवुन्‌गणिकागणः कामुकसमूहः। तद्योगादृतइनि
ठनगविनिठनिवा। वेशोनेपथ्यंतेनशोभतइतिकर्मवेशाद्यत्वेश्यातात्मांतावेवेष्ट्यात्मानमनेन
वेषोनेपथ्यंतेनशोभतेपूर्ववत्वेष्ट्यामूर्द्धन्यांताच। कामिमनसिवेशोनिवेशोस्याअस्तीतिवा॥ रू
पंसौंदर्य्यमाजीवोजीविकास्याःरूपाजीवा। चत्वारिवेश्यायाः। अथेतिसावेश्यागुणाधिकयाज्ञनैः स
त्कृतापुरस्कृतासतीवाराणांवेश्यानांमुख्यावारमुख्या। एकं। कुट्टेतिकुट्टयतिछिनत्तिस्त्रीपुंस
वेमनस्यंकुट्टछेदनेण्यंतात्ल्युटोवहुलमितिकर्त्तरिल्युट् कुट्टनी। शंभेयोभजयत्याभंडयतिप्रवंधेनव
क्तिभलआसंडनेपचाद्यचिगौरादिङीषिशंभलीशंरतिसुखंभलतिपरिभाषतेभलभल्लभपरिभा

मतेभलमल्लमपरिभाषणे पूर्ववत् शंभली तालव्यादिः शालूकं शंभली शललमुष्के तिशाभेदात्। सम्य
मलति परिभाषत इति संभली दंत्यादिरित्यन्ये। द्वे परनारीपुंसायोजयित्र्याः कुटनीतिख्यातायाः। वीनि
वोषितस्वजनानां शुभाशुभज्ञानाय विविधः प्रश्नोस्यामस्तीति ठनि विप्रश्निका। शुभाशुभनिरूपण
मीक्षणं तदत्रास्तीति पूर्ववट्ठनि ईक्षणिका। दैवं शुभाशुभे जानाति आतइति कः दैवज्ञा। त्रीणि लक्ष
णादिना शुभाशुभज्ञानवत्याः। अथेति रजोस्यास्तीति रजः कृष्णादित्वाद्वलच् रजस्वला। रजः स्त्रीधर्म
स्तद्योगात् स्त्रीधर्मिणी। अवतिरक्षति लज्जया गोपायति रजः अवरक्षणे अवितृस्तृ तंत्रिभ्य ईः अवीर्ल
क्ष्मीवत् अवि स्त्रीधर्मिणी विद्यादिति कात्यदर्शनात् कृस्वेकारांतापि। अत्रेरपत्यं स्त्री इतश्चानि
ञ इति ढकि आत्रेयी वश्आत्रेयी च आपति दुहितृत्वात् यथा त्रिदुहिताऽगम्या तथा ऋतुवस्थायां

मियमपीत्यर्थः अमुत्पन्नशब्दोयमिति शाब्दिकः। मलमस्पृश्यत्वजनकपापमस्या अस्तीति निः

अन्नेभ्य इति ङीप् मलिनी। पुष्पं रजस्तद्योगान्मतुप् ङीपि पुष्पवती। ऋतुः स्त्री कुसुमेऽपि चेति वक्ष्यमाणेन त
द्योगान्मतुपि ङीपि च ऋतुमती। चतुर्थेऽह्नि स्नानार्थमुदकमर्हतीति उदकात् संज्ञायां यत् उदक्या। अ
ष्टो रजःस्वलायाः। स्येति रजः पुष्पे उक्तं। पुष्पमिव पुष्पं गर्भरूपफलजनकत्वात्। ऋतुः स्त्रीपुष्पं
नतः प्रज्ञाद्यणि आर्तवं। त्रीणि स्त्रीपुष्पस्य। श्रद्धेति श्रद्धा स्पृहा तच्छीला स्पृहीत्यादिना लुच् उक्तरू
पां श्रद्धामालाति मृगयादिर्वा श्रद्धालुः। दोहदं गर्भिण्यभिलाषस्तद्योगान्मतुप् दोहदवती। द्वे अन्न
पानादि इच्छाविशेषेऽभिलाषवत्या गर्भिण्याः। नीति कलं शुक्रे त्रिषु जीर्णे इति मेदिनिः। निर्गतं
कलमस्या निष्कला निष्कली गौरादित्वात् ङीषिति वृउपाध्यायसर्वस्वधातुप्रदीपादिरिति सु
भूतिः। विगतार्तवा रजोहीना। द्वे पंचपंचाशद्वर्षेभ्य ऊर्ध्वं गतरजस्कायाः। आपन्नेति आपन्नः प्राप्तो ग
र्भरूपः सत्त्वो जन्तुरनया आपन्नसत्त्वा। गर्वेरत उच्चेति किनिः अत उत्वं च गुर्विणीत्युणादिष्वन्नोपुस

षोन्नमः। गुरुं गर्भस्यसत्वं इन्वति प्रीणयति इविः प्रीणार्थः। विच्छांदसोवलोपः अन्तेभ्योङीपूर्वपदा
त्संज्ञायामिति णत्वे गुर्विणीति दुर्घटहत्तिः वयंतु गुरुर्गर्भस्यसत्वोस्यामस्तीति व्रीह्यादित्वादिनिः संज्ञा
पूर्वकत्वादोर्गुणइति गुणाभावः ङीपि गुर्विणीत्यावन्हमहे। लन्हणया अंतरंतर्वर्तिगर्भोस्त्यस्याइति
अंतर्वत्पतिवतोर्नुगिति ङीप्नुकौ अंतर्वत्नी। गर्भयोगादिनिः गर्भिणी। वत्वारिगर्भवत्याः। गेतिग
णिकादेः क्रमेणसमूहेगणिकायाश्चेति ष्यञिगाणिक्यं। भिन्नादिभ्योऽण् गार्भिणं। युवतिशब्दान्न
स्यसमूहइत्यणिसिद्धे भिन्नादिषु अञ्बाधनार्थं युवतिशद्वपाठसामर्थ्यात् भस्याढेतद्धितइति पुंव
द्भावाभावे यौवतीनां समूहो यौवतमिति जयादित्यः प्रत्ययोत्पत्तेः प्रागेव पुंवद्भा वेनति प्रत्यय
निवृत्तौ नाल्प तुदात्तादित्वमित्यञोबाधकस्याभावेन तस्यसमूहइत्येवसिद्धोऽणितिनार्थो भिन्ना
दिषु पाठेन तदुक्तं भिन्नादिषु युवतिशद्वपाठोऽनर्थकः पुंवद्भावस्यसिद्धत्वात् पुंवद्भावश्च भस्याढे

तद्धितइति विषयसप्तमीत्वादितियुवतिशब्दाद्दणायौवनमिति। अतएव कलाकुशलयौवनमितिप्रयो
गइतिभागवृत्तिः एवंचैतन्मतेभिन्नादिषुपाठोनास्त्येव कुतः पाठसामर्थ्यात्पुंवद्भावाभावकल्पनाअतः
पुंवत्वेऽणियौवनमेवएवंयुवतिशब्दस्यभिन्नादिषुपाठांगीकारह्कतोमतभेदः। एकेकं। पुनेति अन्ह्य
तयोनित्वाद्विधवापुनरुह्यतेइत्यसावन्यस्यभूत्वान्यस्यभवतीतिक्विप्द्विरूढापुनर्भूः। दधातिपा
पंअंद्रूहन्भूइत्यादिनादधातेरूप्रत्ययेसुटिधात्वंतस्येत्वेद्वित्वेषत्वेचदिधिषूः। धिषशब्देधिष्यते
निंदिततयाशब्द्यतेपूर्ववदूप्रत्ययेद्वित्वेचवादिधिषूः। दीधीङ् दीप्तिदेवनयोः दीधनं क्विप् दीधी दीप्तिः
शोभातांस्यतिनाशयतिपूर्ववदूप्रत्ययेईकारस्योर्ह्रस्वत्वेच दिधिषूरित्यन्ये। द्विरिति द्विस्त्रिचतुरिति
सुच्। द्वेद्विरूढायाः। तेतितस्या दिधिषाः पतिर्नैरुक्ते ह्रस्वत्वेपतिशब्दलोपेच दिधिषुः। एकं।
सितिसैवद्विरूढेवयस्यकुटुंबिनीकुटुंबंपुत्रदारादिपोष्यवर्गः तच्चुक्तासतुद्विजोऽग्रेप्रधानं

दिधिषुर्यस्यसोयेदिधिषुः। द्विजस्यैवषाधान्यात्द्विजइत्युक्तं अधिवेदनेसामान्येनोक्तेः वर्णेषुसामा
न्येनासौन्तत्रियादिष्वप्यपंवर्त्ततेदिधिषुः परपूर्वायेदिधिषुस्तत्पुरंध्रि कइतिसामान्येननाममाला
दर्शनात्। एकं। केतिकन्यायाअनूढायाअपत्यंकन्यायाः कनीनचेत्यण्कनीनादेशश्चकानीनःक
न्यकाजातःसुतः। द्वेकन्योत्पन्नपुत्रस्य। अथेतिसुभगायाः पुमपत्यंकल्याण्यादीनामिनङितिढ
कइनङंतादेशः हृद्भगेत्यादिनोभयपदवृद्धौसौभागिनेयः। परस्त्रियाः पुत्रः पूर्ववत्ढगिनङोऽनुशतिका
दित्वादुभयपदवृद्धिः पारस्त्रैणेयः। एकैकं। पैत्रितिपितृष्वसुः सुतः पितृष्वसुश्छण्ढकिलोपइ
तिढक्यंतलोपेमातृपितृभ्यांस्वसेतिषत्वेचपैतृष्वसेयः पक्षेछण्षत्वंचपैतृष्वस्त्रीयः। द्वेपितृष्वसुः
पुत्रस्य। मेतिएवमितिमातृष्वसेयः मातृष्वस्त्रीयः इत्यर्थः। मातृष्वसुश्चेतिढक्लोपछण्णं विधा
नात्। द्वेमातृष्वसुः पुत्रस्य। वैमेतिविरुद्धामाताघादिसमासे विमातामातुः सपत्नीतस्याजातःसु

[illegible] पुत्रस्य [illegible] येति सुभगायाः पुमपत्यं कल्याण्यादीनामिनङ् इति ढक् [illegible] ङंतादे
[illegible] मलह दौ [illegible] पितृष्वसुः [illegible] दिनङैः [illegible] शतिकादि [illegible]
[illegible] पारस्त्रैणेयः एकैकं [illegible] पितृष्वसुः [illegible] लोप इति ढक्यं
[illegible] लोपे मातृपितृभ्यां स्वसेति [illegible] पैतृष्वसेयः [illegible] मातृष्वस्रीयः [illegible] पितृष्वसुः पुत्र-
स्य [illegible] इति [illegible] मातृष्वसुरप्येवं [illegible] लोप [illegible] विधानात्
द्वैमातृष्वसुः पुत्रस्य [illegible] शुभ्रादि
त्वात् ढक् वैमात्रेयः विमातुर्जातः विमातृजः। द्वैमातृसपत्नीपुत्रस्य। बंधक्याः पुत्रः क-
ल्याण्यादीनामिनङ् इति ढकि इनङ् बांधकिनेयः। बंधूनुः स्वजनो ज्ञातिर्बंधुलः। असत्याः सुतः
असतीसुतः। कुलटाया अपत्यं कुलटाया वेति ढक् कौलटेयः। पूर्ववड्ढकि पाक्षिके चेनीन

ङिःकौलटिनेयः। पन्तेन्तुड्राभ्योवेतिढक्। इयलोपेकौलटेरश्च। पंचासतीपुत्रस्य। भीतिसतीयाभि
हार्थंकुलानिगृहानटतिनतुजारार्थंसापिकुलटा तत्पुत्रोपिपूर्ववत्कौलटिनेयः। कुलंजन
परेगृहइतिविश्वः। ढेभिन्तुकीपुत्रस्य। आत्मेतिआत्मनोजातः आत्मजः पंचम्यामितिडः। तनोतिमुदं
कुलंवातनेरयन्तनयः। अघ्यादयश्चेतियक्प्रत्यये। ऽडागमश्चनिपात्यतइति तयनेइत्यन्ये। सू
यतइतिसूविशिभ्यांकिमिदितिनुःसूनुः। सुप्रसवेसूयतेस्मकर्मणिक्तःसुतः। पुनातिमातापित
रौपुरोक्रस्वश्चेतिक्रुपुत्रः। सुतोनरकभेदात्त्रायतइतिवा। पुन्नाम्नोनरकाद्यस्मात्पितरंत्रायते
सुतः। तस्मात्पुत्रइतिख्यातः स्वयमेवस्वयंभुवेतिस्मृतेः। पंचपुत्रस्य। स्त्रीतिअमीआत्मजाद्याः
स्त्रियांवर्तमानादुहितरमाहुःतत्राद्योरजाद्यतष्टाप्पुत्रशब्दात्शार्ङ्गरवाद्यञोङीन्पुत्रीसुता
चदुहितापुत्रीतित्रिकांडशेषोऽमरमालाचततःकप्रत्ययेकेऽणइतिह्रस्वत्वेचस्त्रियांसुतका

पुत्रकापुत्रहंहारकाणांवोपसंख्यानमितिपक्षेइकारस्यात्वंपुत्रकापुत्रिकेतिकन्जटः सूनोरस्मालन्तृणा
भावात्स्त्रियामपिसूनुरेव। दोग्धिपितरावितिदुहिता। न प्तृनेष्ट्रादौनिपातितास्त्वस्त्रादिपाठान्नङी
प। अपेतिपुल्लात्रिपतनंपतत्संपदादिः नपत्अपतत्नत्वसाधुरितियतअपत्यं। तनोतिकुलंतनोतेर्वाहु
लकात्इणभीकेतिकनृष्टवोदरादित्वाहोत्वंतोकं। समेइतिद्वे अजहल्लिंगेइत्यर्थः। तयोःपुत्रदुहि
त्रोः। द्वे। स्वेतिस्वजातइत्यनेनकुंडगोलकादिनिरासः। उरोवन्तासिचश्रेष्ठइतिमेदिनिः उरसाश्रेष्ठेन
धर्मप्रधानत्वाद्दशपुत्रेभ्यः श्रेष्ठतयानिर्मितार्थेउरसोऽणचेत्यण्चकाद्यञ्औरसः उरस्यः। द्वेसव
र्णायामूढायांजनितस्य। तेतितनोतिविस्तारयत्यपत्यंतातपलितजस्तुसूरत्नाइतितनोतेःक्तः न
लोप दीर्घौचतातः। जनयतिजनेर्णिचुछ्जनिवध्योश्चेतिहद्ध्यभावः। पात्यपत्यंपातेर्नप्तनेष्ट्रेत्वष्टृ
त्र्यादिनातृच्त्विड्त्वेपितानिपातितः पित्रादयइतितृड्त्वंचपितेतिसुभूतिः। त्रीणिपितुः। जे

निर्मितो जनितः ४

तिजनयतीतिजनेर्णिजन्तात् तृच् ऋन्नेभ्यो ङीप् जनयित्री अंतर्भावितण्यर्थाज्जनेस्तृचि जनित्री
वश्चान्त्याज्जनित्री त्रिलोकया इति शाब्दिकः। प्रसूयते क्विप् प्रसूः। पातीति पित्रादित्वात् तृच् पस्य
वमः माता मान्यते पूज्यते मान पूजायां न प्तृ नेष्टृ इत्यादिना तृच् विनलोपेव निपातनात् स्वस्रादि
त्वान्न ङीप्। जनयति कर्तरि ल्युट् जननी। चत्वारि मातुः। मेति भगं यत्नः पित्रादितोऽभ्यग्रहणे
स्त्यस्याः अइनिः पूर्ववत् ङीप् भगिनी सुष्ठु विवाहानंतरं पितृगोत्रकुलादिकमस्यतीत्यज
ति असु क्षेपणे ऋन्निति ऋन् स्वस्रादित्वान्न ङीप् स्वसा। द्वे भगिन्याः। नेति नंदति तुष्यति ननंदय
ति भ्रातृजायामिति वा न ञ्जिवनंदेर्दीर्घश्च इति ऋन् अकारस्य च दीर्घः स्वस्रादिनिपातनान्नलोपाभावः स्वस्रा
दित्वादेव न ङीप् ननांदा केचित्तु दीर्घत्वं नेष्यते अत एव ननंदा तु स्वसा पत्युर्ननंदा नंदिनी च सेति रभसः।
एकं भर्तृभगिन्याः। नेति न पतं सनयान ञ्चित्यादिना पतेस्तृचि नञः प्रकृतिवद्भावे ऽच्छन्द लोपे च स्वस्रादि

पाठाभावात्ङीप्नङ्गीतिपाठः पत्न्येनप्ता अतएवनप्तानप्त्रीवपौत्रिकेतिरभसः। पुत्रस्यपुत्र्याश्चापत्यंपौत्री
विदादित्वादञ् अतएवपौत्रोपिनप्ता। सुतश्च सुतावसुतौतयोरात्मजा दुहिता सुतात्मजा। त्रीणिसुता
त्मजायाः। भेतिपरस्परमन्योन्येपतंते ऽन्योन्यभेदाययतीप्रयत्नेयतेर्वृद्धिश्चेतिऋन्वृद्धिः यातरः स्व
स्त्रादिः। एकंपरस्परंभ्रातृवर्गस्यभार्याणां। द्वेतिभ्रातुर्जायापत्नीभ्रातृजाया अत्रअन्तोयोनिविद्यासंबं
धेभ्यइत्यलुग्नभवतिअतइत्यत्रजातिपक्षाश्रयणात्जातौहिकामवारादेवलक्षणप्रवृत्तेरित्यन्येअ
लुगित्यल्पार्थेनजित्यन्ये। आत्मावैजायतेपुत्रः जायायांप्रविश्यपुनः पुनर्जायतइत्युपसर्गेसंज्ञाया
मितिडः प्रजः पतिस्तद्योगान्मनुष्यशरादीनां वेतिदीर्घः प्रजावतीइयंचज्येष्ठभ्रातृपत्न्यामेवेत्यन्येद्वे
भ्रातृजायायाः। मेतिमातुलस्यपत्नीइंद्रवरुणेतिङीष् उपाध्यायमातुलाभ्यामानुग्वेत्यानुक्। मातु
लानी। आनुगभावपक्षेमातुली। द्वेमातुलपत्न्याः। पेतिपत्युः प्रसूर्मातापत्न्याः श्वश्रूः पत्न्यामातापि
त्युः श्वश्रूः श्वशुरस्यस्त्रीश्वशुरस्योकाराकारयोर्लोपश्चेत्यूङ् उकाराकारयोर्लोपेचश्वश्रूः। एकंपतिप

रा॰मु॰२

१४०

त्नीमातुः। श्वश्रू इति। तयोः पतिपत्न्योः पिता ऽन्योन्यस्य श्वशुरः। आशुसंबंधानंतरमेवाश्नोभतीति शावशेरा

प्नावित्युरन् श्वश्रूः। आशु इति शु इति च द्विप्रनामनीति निरुक्तत्वात् शुशब्द आश्वर्थः। शुर इति शब्द आश्व

र्थवाचीत्युणादिवृत्तिः। टषोदराद्दित्वादाकारलोप इत्यन्ये। श्वशुरो द्वितालव्यः। श्वश्रूशि शु श्वशुरे तिश

भेदात्। एकं। पीति। पितृव्यमातुलमातामहपितामहा इति पितृव्यमातुलौ निपातितौ। एकैकं। श्येति।

पत्न्या भ्रातरः पत्युः श्यालाः। उच्छिष्टमधुपर्कवाची श्याशब्दः। श्यां लातीत्यात इति कः। श्याल स्याल मा

दिः। स्यालयं तिन र्मवादे वितर्कयं ति स्याल वितर्के इत्यादिः। स्याल ल्लाल्त समसूरसूरय इति सभेदात्

ततो ण्यं नात् पवाद्यजि तिमावायिराजेत्यादि स्वरसूत्रे न्यासः। एकं। स्वेति। स्वामिनः पत्युर्भ्राता ऽत्रक

निष्ठ इति स्वाम्यादयः। स देवृदेवरावित्युक्तं। ते दीव्यतिस्तौति दिवेर्ऋन् देवा देवयति देवृ वर्णनेवाहुल

कात् कमि श्रमि वासिभ्यो ऽरन् देवरः देवृ देवर देवान इति शब्दार्णवः। द्वे पत्युः कनिष्ठभ्रातुः ज्येष्ठ

स्य श्वशुर एवेति सुभूत्यादयः। स्वेति। स्वसुर्भगिन्याः पुमपत्यं स्वसुश्छः स्वस्रीयः। भगिन्याः

राम

१४०

पुमपत्यंस्त्री।म्पोढक्॥भागिनेयः स्त्रपत्येस्वस्त्रीयाभागिनेयी॥द्वे भगिनीपुत्रस्य। मेतिजायांमिनोति
स्ववेश्म निप्रन्निपति डु मिञ्प्रक्षेपणे मामातान च्छनेष्ट्रित्यादिना निपातितः। विभाषास्वसृपत्यो
रितिवाऽलुक् दुहितुःपतिः। एकं। पीतिपितृष्वमातुलेत्यादिना डामहच् निपात्यते टिलोपे पिता
महः स्त्रियांमातरिपितरिचेति पित्वात् गौरादिषु पितामहशब्दपाठाद्वा ङीषि पितामही मातामहीव
। एकं। तेतितस्य पितामहस्य पिता प्रकृष्टः पितामहः प्रपितामहः। एकं। मेतिएवमितिमातुः पि
ता पूर्ववन्निपातना ड्डामहजादिः मातामहः तत्पिताप्रमातामहः। एकं। सेतिसमानंपिंडदा
नमेषांसपिंडाः वान्यस्मिन्सपिंड इति निपातनात् सभावः सपिंडतातु पुरुषे सप्तमे विनिव
र्तत इति स्मृतिः। नाभिः सप्तमपुरुषावधिककुलप्रधानमूलपुरुषः समानोनाभिरेषां ज्यो
तिर्जनपदेत्यादिना सभावः सनाभयः। द्वे सप्तपुरुषावधिकज्ञातीनां। सेतिसमानोदरे शयितइ

तियत्समानोदर्यः। सोदराद्यः विभाषोदरे इति वा सभावः सोदर्यः। एवं समानो गर्भः सगर्भ इति निर्देशात्
समानस्येति योगविभागाद्वा सगर्भः। सगर्भसयूथेत्यादिना यत्। छंदसि सगर्भ्यः छांदसोप्ययं संज्ञा
शब्दत्वाद्विभाषायामपि निबद्धः। सह तुल्य उदरे जातः सहजः अन्येष्वपीति डः सहशब्दस्य तुल्यार्थोप्य
स्ति सहसा कल्पसादृश्ययोगपद्यसमृद्धिषु इति विश्वः सहस्य सोऽन्यतरस्यामिति पाक्षिके सभावे
सोदरसहोदरौ वात्र अपर्यायानं तु गच्छंतं सोदरोपि विमुंचति। तं तु देशं न पश्यामि यत्र भ्राता सहोदर
इति प्रयोगात्। वत्वार्थे कोदरभ्रातुः सेति समानं गोत्रं कुलमस्य सगोत्र इत्यादिना सभावः। बंधुरेव
प्रज्ञाद्यणि बांधवः। जानाति च्छिद्रं कुलस्थितिं च ज्ञातिः कौ चेति क्तिच् ज्ञातिः। स्नेहान्मनो बध्नाति बं
धयति। मृस्तृस्तिहित्रप्यसिवसिहनिक्लिदिबंधिमनिभ्यश्चेत्युः॥ संति ज्ञातेर्भावः कपिज्ञात्योर्ढ
क् ज्ञातेयं। बंधूनां समूहः ग्रामजनबंधुसहायेभ्यस्तल् बंधुता। एकं। धेति धुनोति संतापमत्र धवः
बंधुः। सुवर्वलीष्टे पूज्ञेरणेत्यादय इति व प्रत्यय उकारलोपश्च स्वजातीयश्चासौ जनश्चेति स्वजनः। षट् ज्ञातेः २

दधाति पोषयति उल्वादित्वात् धुः धात्वाकारस्य ऊत्वं धवधव इति वा। प्रीणाति इगुपधज्ञेति कः प्रियः। पाति
रक्षति पातेर्डतिः पतिः। बिभर्ति पुष्णाति तृच् भर्ता। चत्वारि भर्तुः। जेति जीर्यतेनेन जारः करणे घञ् रमयि
तृत्वात् जारयति जीर्णीकरोति तद्भार्याविषयं पत्यनुरागमिति जारेण्यंतात् दारजारौ कर्तरि णिलुक् चे
ति घञि णिलुकि वा जारः। पत्या उपमित उपपतिः अत्रवादयः क्रुष्टाद्यर्थे तृतीययेति समासः। उपश
ब्दोऽप्रधानीभूतः पतिरुपपतिर्वा। द्वे जारभर्तुः। अमृतेति अमृते भर्तरि जाराज्जातः पुत्रः कुं कुत्सितं कु
त्सितमनेन कुण्डि दाहे घञ् कुंडः। मृते भर्तरि जारजो गुडः उच्छेदनायां गुप्यते लज्जाकरत्वात् गोप्यते घञ्
गोलः ततः कन् गोलकः। एकैकं। भ्रेति भ्रातुरपत्यं भ्रातुर्व्येति व्यप्रत्ययः। भ्रातुर्जातो भ्रा
तृजः। द्वे भ्रातृपुत्रस्य। भ्रेति बिभर्ति पित्रादयः इति तृच् भ्रादेशश्च भ्राता भ्रातृद्दीप्तोरस्वस्त्रादय इ
ति अनुजस्य नत्वे भ्रातेति वा भ्राता च भगिनी च सहोक्तावित्युक्ते एकशेषः भ्रातरौ भ्रातृपु वौरस्वस्त्रे

डुहितृभ्यामित्येकशेषः द्वन्द्वयोरेव। मे ति माता च पिता च माता पितरौ आनङ् ऋतो द्वन्द्वे इत्यानङ्। अभ्य
र्हितत्वान्मातृशब्दस्य पूर्वनिपा तः। पक्षे पिता मात्रेत्येकशेषात्पितरौ। पक्षे मातरपितराविति चा
मितिमातुररङ्। तन्निपाते मातरपितराविति विभागवृत्तिः पूर्वोत्तरयोर्ऋकारस्याऽरभावो निपात्यते तेना
दन्तत्वे मातरपितराभ्यामिति प्रयोग इति वृद्धव्यासः मतभेदेन द्वैरूप्यं भाष्यवृत्तौ दर्शितं। श्री। एवं मातापि
त्रोः। श्वेति श्वश्रूश्च श्वशुरश्च श्वशुरः पक्षे श्वशुरः श्वश्र्वेत्येकशेषे श्वशुरौ। एकं। पुत्राविति भ्रातृपुत्रौ स्वसृ
दुहितृभ्यामित्येकशेषे पुत्रौ। एकं। दे ति जाया च पतिश्च जायाया जंभावो दंभावश्च निपात्यते राजदन्ता
दिपरनिपाते जंपती दंपती केचित्तु जस्भावं दस्भावं च सांतं निपातयंति तत्प्रयोगश्चार्ये एवं दृश्य
वहश्यते। द्वित्वप्राधान्यान्नित्यं द्विवचनं। जंदंशब्दौ वध्वर्थौ हारवचनौ तयोः पत्या सह द्वन्द्वे जंपती
दंपती इति चाङ्गाः। दाराः पुंसि बहुत्वे च दंकलत्रेन पुंसकमित्यमरमालापत्म्यां जंमहत्लिंगत्वे इति ना

२१

मव्रपंवः। तावित्यनेन पुंस्त्वमुक्तं पूर्णिर्वंडेण। तुपारायणोजित्वरीपर्यायेशाल्मली मैत्री दंपती जंपती च
सेतिवाचस्पतिः अतः स्त्रीत्वमपिशेषंसुबोधं। चत्वारिजायापत्योः। गेतिगर्भ आशेतेतिष्ठत्यत्रं गर्भा
शयः पुंसीतिघः। जरस्यापरिणत्याकाठिन्येनवहिरेतियातिकिं जरयोः श्रिणइतिजरापूर्वाद्दिणोञ्
ण जरायुः साहचर्यात् पुंसि। उलत्याहणोध्युल्वादयश्चेतिनिपातः आगतोउल्बादयश्चेतिकः उल्वादेश
श्चउल्बमित्यन्येउल्लीयतेगर्भस्योपरिसंवध्यतेउतपूर्वाल्लीङ उल्वादयश्चेतिवन्प्रत्ययेधात्वंतलो
पेवनिपातनाडुल्वमितिवा। कडमहेह्रषादित्वात् कलवृडलयोरेकत्वं कलं शुक्रं लातिकल्पतेगर्भो
परि। क्षिप्यतेकलपिलक्षेपेह्रषादित्वात् कलच् प्रत्ययेवाकललः केजरायोरंतर्वर्त्मिजलेलडतिवि
लसतिवालडविलासेडलयोरेकत्वं कललः शुक्रशोणितसन्निपातः। त्रीणिजरायोः कललस्त
कार्थएकैकंमतिप्रसिद्धत्वादस्यपर्यायेणोक्तइतिस्वाम्यादयः चत्वारियेनवेष्टितोगर्भः कुक्षौ।

तिष्ठतितस्यआ॰अँलइतिरमातस्य। गर्भाशया दिद्वयं चर्मपुटेउल्बो दिद्वयंशुक्रशोणितसन्निपातेव
र्तनइत्यन्ये। सूतीतिसूतेःप्रसवस्यमासः सूतिमासः। नवमेदशमे वापिप्रबलैःसूतिमारुतैः। निस्सार्य
तेबाणइवजंतुश्छिद्रेणसत्वरइतिनवमोदशमोवामासः। विजननंगर्भमोचनमत्रास्तीतिउपोत्कृष्टा
दित्वाहणवैजननः। द्वेप्रसवमासस्य। गेतिगीर्गोऽनरीकृतोऽर्तिग्रहम्यांभन्तुगर्भः। भ्रूणइत्यत्राशं
स्यतइतिभ्रूणआशंसायांचुरादिःएरवभ्रूणः। द्वेकुक्षिगतसत्वस्य। तृतीतितृतीयाप्रकृतिः तृ
तीयप्रकारःसवस्त्रीपुंसावपेक्ष्यप्रथमाप्रकृतिःस्त्री द्वितीयाप्रकृतिःपुमान्तृतीयाप्रकृतिस्त
क्लीवंतृतीयाप्रकृतिरित्यसमासःसमासेतुतृतीयप्रकृतिरितिपुंवत्वेनस्यात्नकोपधायाइति
नेतियोगविभागात्पुंवत्वाभावेसमासएवतृतीयाप्रकृतिरित्येके। तृतीयांप्रकृतिंगतइतिभारतं
चअसमासपक्षे। शाम्यतिलिंगाभावात्शमेर्ढः शण्ढस्तालमादिः क्लीवंशण्ढश्चकंचुकीति

नालव्याहैारभसात्। अस्त्रीनपुंसके क्लीवं वा अलिंगमविक्रम इति रुद्रः क्लीवते संभोगे क्लीवं क्लीवत्वश्रा
धार्ष्ट्ये इगुपधत्वात्कः। पणते अवहरति पंडयति गमयति रागं वा पडि गतौ ण्यंतादेरच् पणेर्जमंता
ड्डः पंडः। नस्त्रीनपुमान्नपुंसकमिति नञाडित्यादिना निपातनात् स्त्रीपुंसयोः पुंसकादेशः पुंस्य
प्यपंसनपुंसको भवेदिति भाष्योक्तेः। पंच नपुंसकस्य। शीनि शिशोर्भावः शिशुत्वं। इगंताच्चेत्यादि
नाऽण् शैशवं। तच्च षोडशवर्षपर्यंतं आषोडशाद्भवेद्बाल इत्युक्तेः। बालस्य भावः बाल्यं ब्राह्मणादित्वा
त्ष्यञ्। त्रीणि बाल्यभावस्य। तेति पूर्ववत् ष्यञ् तारुण्यं। हायनांतेत्यादिना अण् यौवनं अन्त्रिति प्र
कृतिवद्भावान्नटिलोपः। द्वे यौवनस्य। स्यादिति स्थविरस्य भावः युवादित्वादण् स्थाविरं। वृद्ध
स्य भावो वृद्धत्वं। द्वे वृद्धस्य। वृद्धे जिह्मानां समूहः। वृद्धाश्चेति वुञ् वा ईकं भावकर्मणोः स्त्रमनोज्ञा
दित्वाद्वुञ् वृद्धत्वे वा ईकं वृद्धसमूहेपीत्यपिशब्दात् मनोज्ञादित्वाद्वुञि वृद्धत्वेपि वा ईकं वार्द्धक्य

अथसंधिवंधनतयेतिशिष्टप्रयोगेतुप्राणिभृज्जातिवयोवचनेत्यादिनाऽभिरवार्थेकनितततःष्यञि
वाईकंहृद्दसंघातेहृद्ध्रत्येहृद्दकर्मणीतिविग्रहः।द्वेहृद्दसमूहस्य।पेतिकेशेऽत्रादिनालोभ्रिवजरसा
क्रांतंशोक्लंपलितंजरंतानपलितगर्तलोष्टाइतिनिपातःपतेःक्तःलत्वेडागमौवअर्शआद्यच्विनुयु
वपलितइत्यादिप्रयोगः।एकं।वीतिविशेषेणस्रस्यतेऽधःपात्यतेऽनयेतिभिदाद्यङि।विस्रसा।द्विदंत्या
जीर्यत्यनयाऽन्हषकृष्ववयोहानौषित्वादङिऋहशोऽङि।गुणइतिगुणेवजरा।द्वेजरायाः।स्येतिउ
त्तानाशेतेउत्तानादिषुकर्तृष्वित्यचउत्तानशयासर्वत्रावस्त्रीत्वमतंत्रेत्रिषुजरावराइतिवक्ष्यमाण
त्वात्।डिंभः।प्रागुक्तःसिंहादिवर्गेपोतनामपर्यायेपठितस्यापिडिंभशब्दस्यपुनरिहमनुष्यव
र्गेऽभिधानंउत्तानशयस्यमानुषशिशावेवप्रवृत्तिर्नततःप्रौढेंऽडजानांतूत्तानशयेतूत्तानशयेपि
प्रवृत्तिरितिसूचनार्थंयद्यापन्हिप्रक्रमेणोक्तमिदानीतुमानुषप्रक्रमेणेत्यदोषः।पूर्वंपुंस्त्वेतूप

मुक्तं स्त्रियां तु टाप् वा ङीप् वेति संशयमुद्दासाय पुनरिहोक्तमित्यन्ये। स्तनौ पिबतीति सुपीति योगविभागा
त्क इति स्वाम्यादयः। स्तनौ धयति नासिकास्तनयोरिति खश् ध्वेट्‌ष्टित्वात् ङीप् स्तनंधयी केचित् स्त
नंधया स्तनंधयीति तु रूपद्वयमिच्छन्ति धेट्‌ष्टि [illegible] त्वस्य तु पान्तिकङीपेव चरितार्थत्वमाहुः। बल्यार्ये नि
वाल्यायाः। वेति वल्पते संव्रियते अनिष्टयोगादिति कमिति णिश्च बालः बलते नित्यं बुद्धीन्द्रियदेहादिना।
हृद्धिं याति ज्वलादित्वात् णः इति वा। मनोरयमणमानवः। माणवचरकाभ्यामिति निपातनात् त्वं अ
ल्प इति कः माणवकः। हारभेदे माणवको [illegible] बाले कुपुरुषेपि चेति रभसः। द्वे षोडशवर्षपर्यन्तस्य। वेति
वयसि यौवने तिष्ठतीति कः वयस्थः। वयः पक्षिणि बाल्यादौ वयो यौवनमात्रक इति विश्वः। तरति
क्लेशभवं तरतेर्वरुणवदुनन् इति तरुणः। यौति विषयैर्मिश्री भवति स्त्रिया वा यु मिश्रणे युहृषीत्यादि
ना कनिन् युवा। नीणि यूनः। द्वे इति प्रगतं वयो यौवनमस्येति प्रवयाः। तिष्ठति विषयाद्धा हतः स

न् तिष्ठतेः स्थिरादय इति। किरच् कृत्स्वबुवागमोस्य चिरः। वर्द्धते स्म वृधेः क्तः वृद्धः। ज्या वयोहानौ क्तः य
ग्रहिज्यादिसूत्रेण संप्रसारणं संप्रसारणस्येति दीर्घः ल्वादिभ्यश्चेति निष्ठातकारस्य नत्वं जीनः। जीर्यति
स्म जॄष् धातोः क्तः ऋत इद्धातोरिति इत्वं नत्वं च जीर्णः। जीर्यति जीर्यतेरतृन् जरन्। अथ वृद्धस्य। वेति
अतिशब्देन वृद्धो वर्षीयान् वृद्धस्येयसुनि प्रियस्थिरेत्यादिना वर्षादेशः। नवतेरूर्द्धं दशमोवस्था
विशेषस्तद्योगान्मत्वर्थे वयसि पूरणादिति निः दशमी। अतिशयेन वृद्ध इतीयसुनि वृद्धस्येति
वृद्धस्य ज्यादेशः ज्यादादीयस इत्यात्वं ज्यायान्। त्रीण्यति वृद्धस्य। पूर्वेति पूर्वस्मिन् काले जातः
पूर्वजः जनेर्डः। अग्रे काले जातः अग्राद्यदित्यनुवर्त्तमाने पश्चाद्वेति घच्। अग्रियः क्वचिदग्रिम
इति पाठे अग्रपश्चाड्डिमजिति डिमच्। पूर्ववदग्रजः। त्रीणि ज्येष्ठभ्रातुः। जेति जघन्ये पश्चात्का
ले जातः जघन्यजः। अत्यर्थं युवा इष्ठनि युवाल्पयोः कनन्यतरस्यामिति कनादेशः कनिष्ठः। एव

मीयस्तु निकनीयानपि। कनीटे। शामा व पष्ठेरीयसु निस्थूलदूरेत्यादिना यणादिपरभागलोपे पूर्वस्य च
गुणे यवीयान्। अवरस्मिन् पश्चात्कालेनातः अवरजः। एवमनुपश्चाज्जातः अन्येष्वपीति डः अनुजः।
पंच कनिष्ठस्य। अमामिति अल्पमांसोऽमांसः। दुर्निदितं बलमस्य दुर्बलः। छोः छेदने वा कृल्यात् त्वषि
ष्टषिभ्यां तन्नक्तो तो वा। मांसो छेदात् छातः। शात इति क्वचित् पाठः। दुर्बले निशितेस्यातो शितशाता।
विमौ विधिति तालव्यादौ रभसः। त्रीणि दुर्बलस्य। वेति बलंस्थौल्यं तद्योगाद्बलवान्। मांसमुपचितम
स्यास्ति सिध्मादित्वात् लच् मांसलः। अंसः स्कंधः स स्थूलोस्यास्ति वत्सांऽसाभ्यां कामबल इति ल
च् अंसलो दृढ्यमध्यमः। त्रीणि स्थूलस्य। तुंदीति अतिशयित तुंदमुदरमस्य तुंदादित्वादिलच् तुंदि
लः। एवं ब्रीह्यादित्वादिनिठनौ तुंदिकः स्वामी तु तुंदिवलिवटेर्भ इति भप्रत्यये तुंदिभ इत्याह। तुं
दी। दृहत्कुक्षिः। पिचिंडमुदरमतिशयेन पिच्छादि त्वादिलच् पिचिंडिलः। पंच बृहत्कुक्षेः

अवेति अवनतं नासिकाया इत्यर्थे ऽवशब्दात् नतेनासिकाया इत्यादिना टीटच् नाटच् भ्रटचः एतत्त्रयं
नतायां नासिकायां वर्तित्वा तद्योगादविलम्बितलक्षणया वा नतनासिके वर्तते। त्रीणि नतनासिक
स्य। केशेति प्रशस्तकेशयोगात् केशाद्वोऽन्यतरस्यामिति वः। केशवः। पक्षे इनिठनौ। केशिकः केशी
व कुल्लकेशोपि केशव इति सुभूतिः। त्रीणि प्रशस्तकेशस्य। वेति वलिर्जरास्त्रस्तचर्म तद्योगात् पामा
दित्वान्नः वलिनः। एवं तुन्दिवलिवटेर्भः वलिभः। द्वे जरास्रस्तचर्मयुक्तस्य। वीति स्वभावात् हीनांगः
अपकृष्टांग इति गर्भे मंतान्डः पृषोदरादित्वात् हलेत्वे अपोगंडः अपोगंडस्तु शिशुके विकलांगेव
भीरुक इति विश्वः। पवर्गादिरप्ययं पोगंडो विकलांगक इति रत्नकोषात्॥ पोगंडो विकलांगः
स्यादिति हलायुधः। द्वे निसर्गन्यूनाधिकांगस्य। खेति खर्वेति प्रकृतपुरुषप्रमाणान्यूनतांगच्छति
खर्वे गेत्यर्थात् वृ खर्वः। ह्रस्वेति ह्रस्यते साश्चर्यं शद्धान्ते ह्रस शब्दे उल्वादयश्चेति वः ह्रस्वः। वा

मयति धारयंतरप्रमाणात् विपरीतमावृष्टेनत् करोतीति एषं तातर्नं घ्या दित्वात् ल्युः वामनः स्त्रियांगो
रादित्वात् ङीष् वामनी विशेष्यनिघ्नवर्गेङ्कस्य सामान्ये खर्वा दिकं वन्हमते इह तु मनुष्य इति विशेषः
त्रीणि खर्व्वे पुंसः। खेति खरातीन्हणा खरस्य गर्दभस्येव वा नासिकास्य खर खुराभ्यां नस्त्व वक्तव्य
इति नसादेशः पूर्वपदादिति एत्वं खरणाः। पन्तेऽत्र नासिकाया इति अवृं नसादेशश्च पूर्ववस्मात्वे
खरणसः। द्वेती न्हणानासिकस्य। वी ति द्वे हादिना विगता नासिका यस्य वेर्ग्रो वक्तव्य इति ना
सिकायायादेशः विग्र :। वेः खुरग्रयाइति शाकटायनसूत्रेण खुरग्रआदेशो विरखुर्विरग्रो।
विग्र इति रूपत्रयं खरणाः स्यात् खरणसो विग्रो विखुर्विनासिक इति रभसः। विनसा हतवां
ध्वा इति प्रयोगात् विनसः। द्वे द्वे हादिना गतनासिकस्य। खुरेति खुरः पशुशफः तद्वन्नासि
कास्य पूर्ववन्नसादेशः खुरणाः अविखुरणसः। द्वे विपिटनासिकस्य। प्रेति प्रस्यनित्यंका

रा॰मु॰२
१४७

दाधितर्कं वा जानुनोर्मध्ये महदंतरालं सः प्रगते परिणाहे नद्रूरंगते जानुनी अस्य प्रसंभ्यां जानुनोर्ज्ञुः
प्रज्ञुः। व्याकरणांतरे ऽहंतशाहेशेप्रज्ञोपीति सुभूत्यादयः। द्वे। ऊर्ध्वे ति ऊर्ध्वे तिष्ठतो यस्य दूरोत्थायि
नी जानुनी भवतः स ऊर्ध्वज्ञुः। ऊर्ध्वाद्विभाषेति जानुनोर्ज्ञुः। द्वे। समिति नित्यं कदाचिद्वा संहते संल
ग्ने जानुनी अस्य प्रसम्भ्यां जानुनोर्ज्ञुः संज्ञुः। प्रज्ञुः प्रगतजानुः स्यात् प्रज्ञोप्यत्रैव दृश्यते। संज्ञुः
संहतजानो च भवेत् संज्ञोपि तत्र हि। ऊर्ध्वज्ञुरूर्ध्वजानुः स्यादूर्ध्वज्ञोप्यूर्ध्वजानुक इति साहसांकः
द्वे। स्येति एडः श्रुतिशक्तिहीनः एडयति श्रवणाय यांतरात्मानं प्रेरयति इलप्रेरणे चुरादिः पचाद्य
च् डलयोरेकत्वं एडः। वध्यते हितश्रवणाभावात् पीडाभिः वधबंधने वा हुलकात् ति मिरुध्धी
त्यादिना किरच् बधिरः। द्वे कालइ तिख्यातस्य। कुब्ज इति कुईषद् उब्जमार्जवमस्य उब्ज आर्जवे
शकंध्वादिः पृषोदरादिर्वा कुब्जः। गडसेचने वा हुलकात्। भृमृइत्यादिना उः गडुः पृष्ठगडुकः त

राप
१४७

योगात् सिध्मादित्वाल्लच् गडुलः । द्वे कुब्जस्य । कुकेति रोगादित्वं शितत्वात् कुत्सितः करोस्य कुकरः ॥
कुण्यते कुत्सितत्वेन शब्द्यते कुण शब्दे कुण सङ्कोचने वा इगुपधत्वात् कः । कुणिः । निसर्गतः कुणि
पंगु पौगंडा इति नाममालायामार्यापाठाद्दीर्घोकारवांश्च । द्वे कोंपा इति ख्यातस्य । श्विति वाल्लेरप्य
यत्नेन स्पृश्यते स्पृश संस्पर्शे घृणि पृश्नि पार्ष्णि चूर्णि भूर्णय इति नि प्रत्ययो गुणाभावः सलोप
श्च निपात्यते पृश्निः । पृच्छन्त्योषधं च । छेवी निप्रत्यये छ्वोरिति शत्वे च पृश्निर्वा । पृषेः पृश्निरि
त्यन्य इति पुरुषोत्तमः । द्वे खर्वदुर्बलस्याल्पास्थ्नः । श्रविति श्रृणोति रास्नास्य इति नक्प्रत्यया
द्दिः श्रोणाति जंघयोः संहतो भवति श्रोण संघाते पचाद्यच् श्रोणः । पन्नते जीवनार्थं स्तौ तिवल्ले गुक्
चेति वा हुलकात् पनेरुप्रत्ययो गुगागमश्च निपात्यते पंगुः स्त्रियां पंगोश्चेत्यूङ् पंगूः । द्वे
जंघाविकलस्य । म्विति मुंडनं मुंडः केशापनयनं मुडि खंडने भावे घञ् तद्योगान्मुंडः स्त्रियां मुंडा ।

रा॰मु॰२
१४८

मुंडितः कर्मणिक्तः। द्वे मुंडितपुरुषादेः। वेतिवलतेऽतिघर्ननेत्रं संहरणोतीतिति मिरुधीत्यादिना दा
हुलकाद्वलेरपि किरविवलिरः। केमूर्द्धिकरोत्यन्हिणीवलनद्वारेणततं पुरुषेकृतीत्युल्लुकुकेक
रः। टेरेवलिरंकेकरावितिरभसः। द्वे टेरस्य। खवितिखुड तिगतौप्रतिहतोभवतिखुडप्रतीघातेऽ
चखोडः। खजिगतिवैकल्येऽचिखंजः पादस्तघोगाद्वखंजः अथखंजकेखोडखोरावितिरभ
सः। द्वे खोडस्य। त्रीतिजराशद्वाद्वराः पश्चात्पठिनाउन्नानशयायाज्ञिषुलिंगेषुवर्ततइत्यं
र्थः। जेतिजडतिजन्मतआरभ्यसंहतोभवतिजटमटसंघातेकृपेरुल्लवा हुलकाद्दतोऽप्युल्ल
चिज्जुलः। कालएवकालकः इवार्थेकन्यावादित्वाद्वा। अपिक्लूयतेज्ञायतेशुभाशुभमनेनमि
तद्वादित्वात् डुप्रत्ययेवष्टिभागुरीत्यादिनाऽकारलोपेचपिल्लुः। त्रीणिजडुलइतिख्यातस्य॥
नीतितिलस्यप्रतिकृतिस्तिलकइवार्थेकन्। तिलएवकालस्तिलकालः। ततः कन् तिलकाल

राम
१४८

[illegible] कः। द्वेतिलाक्तिक्लवर्णदेहस्थतिलस्य॥ अनेति आमयस्य
रोगस्याभावोऽमर्थविभक्तीत्यादिनाऽर्थाभावे समासः अनामयं। अरोगस्यभावः ष्यञ् आरो
ग्यं। द्वे आरोग्यस्य। चीति किं ते गुप्तिज् किद्भ्य इति सन्नंतात् अकारप्रत्यये चिकित्सा। रुजो रोगस्य
प्रतिक्रिया निराकरणं रुक्प्रतिक्रिया। द्वे रुक्प्रतीकारस्य। भेषेति भिषजो वैद्यस्येदं शेषेऽण् अ
नंतावसथेति हभेषजादिति निर्देशात् गुणः। औषधेर् जाताविति अण् औषधं। भेषजमेव भैषज्यं अ
नंतेत्यादिना ष्यः॥ गदविरोधी अगदः नास्ति गदोऽस्मादिति वा। जयति रोगानिति क्विपा जैत्या
दिना उणाज्ञापुः साहचर्यात् पुंस्त्वमस्य। पंचौषधस्य। स्त्रीति रुजति देहं क्विप् रुक्। रुजाभिदा
दिः। उपतापयति देहमनसी अवृक्करणेघञ्वा उपतापः। एवं घञि रोगः। विविधा आधयो
मनःपीडा अस्माद्व्याधिः। गदतिमनक्तिऽव्यामवृगदः। आसमंतान्मी नातिहिनस्तिदेहंमी

रा॰मु॰२
१४९

अहिंसायामपवाद्य च । आमयः । आमयति अमरोगे ण्यंतात् पवाद्य विकयस्य विभाषेत्यतो विभाषाग्रहण
स्य व्यवस्थितविभाषात्वात् णिलोपः संज्ञापूर्वकानित्यत्वादित्यन्ये । आमयो दीर्घादिः । सच्चरो
गमात्रस्य । व्हेति व्हयति अवव्हीयते ऽस्मात् ह्वापुंसीति घः व्हयः । शोषयति वसादिधातून् अ शो
षः । यक्ष्यते पूज्यते रोगराजत्वात् यक्षपूजायां मनिन् यक्ष्मा राजयक्ष्म शब्दोप्यत्र । जक्ष भक्षहस
नयोरित्यतो मनिनि जक्ष्मेत्येके इति पुरुषोत्तमः । त्रीणि यक्ष्मरोगस्य । प्रति प्रतिमुखं श्यायते स्रव
तीति श्याद्यधेति णः पुंक्लीबत्वं प्रतिश्यायः । आतश्चोपसर्ग इत्यङ् प्रतिश्या च । अपिहिता नासिका
नेन उपसर्गाद्वेत्य न सादेशश्च वष्टी भागुरिरित्यादिना ऽल्लोपः अन्येषामपीति दीर्घः पीनसः । आपीनसो
पि आपीनसः प्रतिश्यायः स्यादिति रभसः । द्वे तु क्षुन्नासाजलस्रुतिजनकरोगस्य । स्त्री ति क्षु शब्दे
संपदादित्वात् क्विप् क्षुत् । भावे क्तः क्षुतं । ऋदोरप् क्षवः स्त्रियां क्षुत् क्षुतं हं छिंके इति रभसः । त्री

राम
१४९

णिहांकी।तिख्यातस्य।केतिकास्यतेकुत्सितशब्दः क्रियतेनेनहलश्चेतिघञ्कासृशब्दकुत्सायांकासयती
तिपचाद्यचिवाकासोदंत्यसकारोलमश्चशाब्दकृकाशशब्दंक्यइतिद्विशकारेशभेदात्वाराणस्यांभवे
त्काशीन्तवथोनातृणोऽस्त्रियामितिनालमांतेषुरभसः।न्बौतेःद्वितोऽथुच्न्हावथुः।द्वेकासरोगस्या
शोफइतिशोष्यतेनेतीन्द्रौणोषधिप्रयोगेणघञ्शोफः शोषंस्फावंयतिकरोतिवाशोफः पृषोदरादि
त्वार्दंत्यस्यफः द्वितीयपक्षेहिलोपः षस्लोपश्च।डुश्वोश्विधातोःद्वितोऽथुच्श्वयथुः।श्रुगतौपृयाद
यश्चेतिक्यन्श्रोत्वंचशोथः।श्रीणिशोथस्य।पेतिस्फुटनंस्फोटःस्फुटभेदेघञ्पादेस्फोटयतीत्य
णिवापादस्यस्फोटःपादस्फोटः।विरुद्धंपद्यतेगम्यतेनयारोगाख्यायांण्वुल्टाप्इत्वंविपादिका।द्वे
फुटइतिख्यातस्य।कीतिकिंकुत्सितंयथास्यात्तथालस्यतेश्लिष्यतेनेनलसश्लेषणेक्रीडनयोःकिला
संपृषोदरादिः।षिधुगतौपामादित्वान्मनिन्सिध्मापादस्फोटोऽथत्वक्पुष्पीकिलासंसिध्मली

तिवेतिरभसः। अदंतं वसिध्मं स्तुष्मं कुट्टिमं युग्मं स्तोममिति मांते धरुणात्। ह्वेसि हल्याः। केतिकाय तिहिनस्ति
शरीरं कषशिषेति हिंसार्थाः कषेश्छ्वेति उप्रत्ययः छस्यांतादेशः कच्छुः। पांत्यस्मादात्मानं मनिन् पामन पुं
सकं पाम पामनी पामानि। स्त्रियां तु मनइति डीप् भावे पामा पामा नौ पामानः। डाबुभाभ्यामिति डापि पा
मा पामे पामाः। विरुद्धं चर्च्यते शत्यते चर्च अध्ययने पूर्ववत् ण्वुलि विचर्चिका। चत्वारि खसुरोगस्य। के
ति कंडूयते क्विप् वलि यल्लोपः कंडूः। खर्जति सुखं खर्ज मार्जने कृषिचमी ति कूः खर्जूः। कंड्वादियङंता द
प्रत्यये कंडूया। क्तिनि कंडूतिरिति न्यासः। त्रीणि कंडूयायाः। वीति विरुद्धः स्फोटो विसरणमस्मात् स्फु
टिरविसरणे घञ् विस्फोटः। पिटति संहतो भवति पिट शब्द संघातयोः क्रमादिभ्यो वुन् त्रौणादिके त्वा
कुणाभावः क्वुनित्येके। स्त्रियां पिटकापि पकादिः पर्वगप्रथमादिः। विस्फोटा पिटिका स्त्रियामित्य
मरमालायां वकारादिरपि। द्वे स्फोटस्य भिरव्यानस्य। व्रणति व्रण गात्र विचूर्णने वा पचादित्वादच् व्रणे

जस्त्रियामित्यन्वयः। ईरयतिस्तुरवं ईरखेरणो दीर्घादिः वा हुलकान्मक् ईर्मं। इयर्तिः अर्त्तेः आदृवसिचन्दिजनिननिधनिभ्यउमित्युसस्त्ररुः। त्रीणिव्रणमात्रस्य। नेतियोव्रणः सर्वदागलतिसनाडीव्रणः नाड्येवव्रणोतायेनसदागलतिनाडीव्रणः एकं। कोठइतिकूयतेशब्द्यतेकोठतिसज्जतिसंगतंप्रतिहंतिवाऽत्रकोठः। मंडलाकृतिः त्वादिवार्थेकन् मंडलकं। कोठश्च। किंचित्कुल्कः द्वेमंडलाकारकुष्ठस्य। कुष्ठमितिकुष्ठमुक्तं। श्वेतत्वेष्वितावर्णेछिद्रवदक्कश्चित्रं। कुष्ठंसामान्यविशेषद्वंति। द्वेसुल्क्कुष्ठस्य। दुर्नेतिदुर्निन्दितंनामास्यदुर्नामकं ऋकुश्चादित्वात्पूर्वपदादितिप्राप्तस्यणत्वस्याभावः। अर्त्तेर्मीधौ अस्कर्वेत्यसुन्सुडागमश्चगुणः अर्शोमध्यनालभ्यं। द्वेअर्शोरोगस्य। आनेतिआनह्यतेनेनघञ्॥ आनाहः। विबध्नाति अत्रविबंधः। द्वेमूत्रपुरीषतिरोधस्य। ग्रेतिगृह्यतेनयागृह्णातेरनिरित्यनिस्तनोङीषुग्रहणी। हन्यप्रसुदोवहुलमितिवाल्युट्। रुक्रोगः प्रवाहिकास्यात्प्रकर्षेणवहतिनद्ध्रस्व

रा·मु·२
१५१

वत्यस्यां गुदमिति वहस्रावे प्रवहणं प्रवाहिका वा रोगाख्यायामिति ण्वुल् ॥ ग्रहणीरोगस्य द्वे इति छर्द
वमने पूर्ववत् ण्वुल् प्रच्छर्दिका । टुवमुउद्गिरणे कृष्यादित्वादिक् वमिः । द्वितोऽथुच् वमथुः । समाइत्ये
कार्थत्वात् । त्रीणि वान्तरोगस्य । द्वे इति विदरं विदरणं दधातीति पृषोदरादिः विद्रधिः स्त्री अयं चोदरांत
र्गतमुखोंतःपाको गंड इति सुश्रुतिः । ज्वरयति ज्वररोगे ऽच् ज्वरः । मेहयति मूत्रयति अच् मेहनं मेहः
घञ् वा मेहो बहुमूत्रतारोगत्वात् प्रमेहश्चात्र सवरक्तमेहः शुक्रमेहो मधुमेहश्चेति बहुविधः । भगं
दारयति भगेच दारेरिति खच् भगंदरो गुह्यप्रदेशे वहल्के दस्फुटितमांसखंडरूपो व्रणभेदः । अश्मा
नं त्यातोनुपसर्गे कः गौरादिः अश्मरी सप्रस्तरगुटिको मूत्रविबंधो ऽश्मरी मूत्रविबंधमात्रं । मूत्रे कृ
च्छ्रमस्मान्मूत्रकृच्छ्रं विबंधाविशेषात्पर्यायपाठः । विद्रध्यादिरोगभेदानां प्रत्येकमेकैकं । अश्मर्यि
स्क द्वे नाम्नी ॥ पूर्वं इति इतः परं सुक्ता वक्षेः पूर्वेशब्दा त्रिषु त्रिलिंगा इत्यर्थः । रोगे तिपापजरोगम

रा३

राम
१५१

वश्पंहरतिणिनिः रोगहारी। अगदमरोगं प्राणिनं करोति अण्कारे सत्या गदस्येति मुम् अगदंकारः। एतत्द्वयं
वैद्ये औषधे सामान्येन वर्त्तते। भिषज्यइति कंड्वादित्वाद्यगंतात्क्विप् अनो लोपः वलियलोपे भिषक्। भिष
ग्विद्यां भिषक् शास्त्रं वेत्ति तदधीते तद्वेदइत्यण् वैद्यः। चिकित्सतिरोगिणं ण्वुल् चिकित्सकः। पंच वैद्य
स्य। वार्तइति हन्ति जीवनमस्यास्ति प्रज्ञाश्रद्धेत्यादिना णः वार्तः स्त्रियां टाप् वार्ता। नास्त्यामयो रोगो स्य
निरामयः। कल्पासुसाधुः तत्र साधुरिति यत् कल्यः। त्रीणि नीरुजस्य। उल्लेति लाघृ सामर्थ्ये उत्पूर्वी ड्रो
गमुक्तौ अनुपसर्गात् फुल्लेत्यादिना क्तान्ते निपातितः उल्लाघः। चतुर्भिरेव पर्याय इत्यन्ये। एकमविरो
गोन्मुक्तस्य। स्नेति स्नायतिस्मक्तः संयोगादे रातो धातो रित्यादिना तस्य नत्वं स्नानिशब्दादर्श आद्य वि
वास्तानः। स्नानिशीलः स्ना जिस्थश्चेति कस्नुः स्नास्नुः। द्वे रोगात् क्षीणदेहस्य। आमेति आमयो रोगो
स्यास्ति आमयस्य दीर्घश्चेति विनि दीर्घौ। आमयावी। विकृतो रोगेण प्राप्तो ऽन्यथात्वं। व्याधिः

संजातोऽस्य तारकादित्वादितच् व्याधितः। पटुर्दक्षे च नीरोग इति मेदिनिः। तद्विपरीतोऽपटुः। आतुरयति आतुरस्यत्वादिति त्वरते तुर त्वरणे अत इगुपधः कः आतुरः। अमरोगे अभिपूर्वात् क्तः रुग्णम त्वरेतिवे त्यिअभ्यमितः। इडभावे अभ्यांतः अनुनासिकस्येति दीर्घः। सप्तरोगिणः। सेति पामास्यास्ति पामादित्वान्नः पामनः। कच्छूरोगात् कच्छ्वाः ह्रस्वश्चेति रः कच्छुरः। द्वे विचर्चिकायुक्तस्य। देति दरिद्राति देहं दुर्गतं करोति दरिद्रातेर्यालोपश्चेत्यूषत्ययः इकाराकारयोर्लोपे दर्द्रू द्विरेफात् ततो योगात् दद्रूणः ह्रस्वश्चेति नप्रत्यये ह्रस्वत्वे च दद्रुणः। दरिद्रातेर्यालोपश्चेति पाठात् रेफे काराकारलोपे दद्रु रेकरेफात् ततो नप्रत्यये दद्रुणः एकरेफ इत्यन्ये। दद्रुरोगयोगात् द्वंद्वोपतापेत्यादिना इनिः दद्रुरोगी। द्वे दद्रुयुक्तस्य। अर्श इति अर्श उक्तं अर्शो नामा रोगोऽर्शोरोगस्तद्योगादर्श आद्यच् अर्शसः। द्वे अर्शोयुक्तस्य। वेति वातातिशययोगात् वातातिसाराभ्यां कुक् चेति इनि कुक् च वातकी। द्वे वातरोगिणः। सेति अतिसारोऽतिपुरीषनिर्गमः सहातिसारे

णावर्त्ततेसातिसारस्तद्योगाद्द्वातकिवत्इनिकुकौअतिसारकी।द्वेअतिसारयुक्तस्य।स्युरितिश्लेष्मादिना
वन्तुगीतः क्लेदः तद्योगाच्चुल्लं चक्षुः तद्योगाच्चुल्लः प्रमानुल्लिन्नाक्षेपि चुल्लत्क्लिन्नचक्षुषि चुल्लाद
यः चक्षुषि च अतएव हक्लिन्नेक्ष्णीति अक्ष्णी तु नपुंसकानि अमी इति तु पुंस्त्वं शब्दापेक्षया क्लिन्न
स्यलप्रत्ययः चुल चिल पिला देशश्च चक्षुषीति लः चुलादयश्चादेशाः।उन्मे तिउन्मादो वायुप्रकृतत्रिचि
त्तविभ्रमः तद्युक्ते उन्मत्तः नध्याख्येति निष्ठानत्वाभावः।द्वे उन्मत्तस्य।श्लेष्मेति श्लेष्मयोगात् वसिध्मादि
भ्यश्चेति लच् श्लेष्मलः।पामादित्वान्नप्रत्ययेन त्वेव श्लेष्मणः।कफयोगात् द्वंद्वेत्यादिनेनिः कफी।त्री
णि श्लेष्मयुक्तस्य।न्युब्जइति रुग्ना भुग्नपृष्ठे पुरुषादौ न्युब्जो वर्त्ततेसच पृष्ठवक्रत्वकारी रोगभेदः
भुजन्युब्जावित्यादिना निपातितः सच वक्रीभूतपृष्ठो ऽधोमुखपुरुषादिः।द्वे इति उन्नता नाभिर्यस्य
डिर्गो एडः अ च इ इरितिडः तद्योगात् सिध्मादित्वाल्लच् तुंडिलः तुंदिवलिवटेर्भः उकारवतोप्येके द

शाविकृतत्वेनानन्यत्वात् तुंडिभः। तुंदिल इति पाठे तुंदादिभ्य इलच्। दुंगो उयुक्तस्य। कीति किलासं सिध्म
नद्योगादिनिः किलासी अंतस्थमध्यः। सिध्मादित्वाल्लचि सिध्मलः। हेसिहल्लीयुक्तस्य। अंध इति अंधह
ष्टयुपघाते चुरादिरदंतः अंधयतीति पचाद्यच् अंधं वन्हुलत्वयोगादर्श आद्यच् अंधः। अदृक् अवन्हुः
अंधस्य हे। मूर्छेति मूर्छायोगात् सिध्मादिषु न्हुइजं तूपनापाबेति लचि मूर्छालः। मूर्छा धातोः क्त
आदितश्चेतीट्प्रतिषेधः राल्लोप इति छलोपः पूर्ववन्नत्वाभावः मूर्तः। मूर्छा संजातास्य नारका
दित्वादितच् मूर्छितः। त्रीणि मूर्छायुक्तपुरुषादेः। शुक्रमिति शोकविगच्छति स्रवति शोचति का
मपीड्यानेन वा शुचवशोके ऋजेंद्रेत्यादिना रक् कुत्वं शुक्रं तेजयति उत्ते जयति लिंगं ति निशाने
ऽसुन् तेजः। रीणति स्रवति रीज् स्रवणे रुक् वीभ्यां नुक् वेत्यसुन् रेतः। इज गति न्हृप णयोः एयंताद्विपूर्वा
त्कमिण्येरच् वीजं। वीरयति विक्रामत्यनेना चोयत् वीर्य। इं इस्य पुरुषात्मनो लिंगमिंद्रयं इंद्रिय

मिं इस्लिंगमित्यादिना साधुः। घइस्मुकस्य। मेतिमिनोतिरेहकष्माएणमितिडुमिञ्प्रक्षेपणेमीनातिहिन
स्तिदेहंमीञ् हिंसायांपूर्ववदुणिवाह्रुवापाजिमीत्यादिनोणमायुः। अपिदद्यातिरोगंवा हुलकात्तञ्जर्तता
नस्त्रूरनपलितलोष्टाइतिवाहुलकात्कर्तरिक्तः। अप्पकारस्यवष्टीत्यादिनालोपः। अवउपसर्गात्तइति।
द्याञो ह्वितकारादेशः। द्वेपित्तस्य। केविकेनजलेनस्फातिर्हे ह्विरस्मकफः। कंशिरः फणतिगच्छतिडेवाकफः
श्लिष्यतेनासादिश्लिषेर्मनिम्श्लेष्मा। द्वेश्लेष्मणः। स्त्रीतित्वचतिसंहरणोतिरेहंत्वच संवरणे क्विप्त्व
क्। त्वकृत्वचचोवशद्वाः स्युर्वल्के। चर्मणिपत्रकइतिधरणिकोषात्। अस्त्रजोरक्तस्यधरा। स्त्रग्धरा
। अस्त्रग्रहणेतिअविअस्त्रग्वरेतितुसर्वधरः। द्वेचर्मणः। पीविपिशत्यवयवीसवतिपिशअवयवेताल
व्यांतः क्तः पिशितंकपिशितंपिशितंमदनाग्निनेतिमाघात्। तरतिप्लवतेनेनतरतेर्दिवसवदसप्रतर
सं। उपचयापचयोमन्येतेज्ञायेतेअनेनमनज्ञानेमने दीर्घश्चेतिसप्रत्ययेदीर्घचमांसं। पल्यते रक्ष्यतेप

रा.मु.२
१५४

लम्हरणेहृषादित्वात्कलच्पत्लं। कम्पतेऽनुकंप्यतेकंपहृपायांगतौपोनडुपधादितियतिनेरुक्ते
पस्पवत्वेक्रमं। आमिषतिसमंतादभिव्यक्तीभवतिमिषस्पर्द्धायां। उपसर्गवलादुन्मेषवदभिव्यक्त्यर्थः
इगुपधत्वात्कः आमिषं। षड् आमिषस्य। उन्नेतिउच्चैस्तनप्रसुतमं। शुष्कंचतन्मांसंचेतिशुष्कमांसं। व
ल्लतेसंवृतंभवतिवलवल्लसंवरणेरवर्जिपिंजादिभ्यऊरोलचावित्यूरः वल्लूरं॥ स्त्रियांतु प्रवल्लूरा। वी
एयातपादिनाशुष्कमांसस्य। रुधीतिरुध्यतेवमिणाशिरोभिश्चतिमिरवडुधेःकिरच्रुधिरं। सृज
तिनत्यजतिदेहंधात्वंतरंवाक्विप् असृक्पृषोदरादिःकलिपदांतेन्यंक्वादित्वात्कुत्वंनाज्ञादेर्निपा
तनस्येष्टफलत्वात् असृग्भ्यामसृग्भिः। नसृजतिशोचमित्यसृगितिसुभूतिः। लोहितंरक्तंचरक्त
वर्णत्वात्। अस्यतेन्क्षिप्यतेरोगोपशमायवहुलमन्यत्रापीतिरक् अस्त्रंदंत्यमध्यं। न्हृनाम्नाय
तेषा डुर्भवतिप्रकाशतेन्हातजंडः। शोणतेस्मशोणवर्णेतालव्यादिः क्तः शोणितं। सप्तशोणितस्य

एम
१५४

वुक्केतिधात्वनेकार्थत्वात् वुक्यते स्वादुत्वेन मृग्यते वुक्क भषणे घञ् कुक्कं नांतः पुंलिंगो यं स्त्री लिंगइ
त्येक इतिस्वामी वुक्का स्त्री वुक्कः पुमानपि। शोणिते पुंस्त्रियां वुक्का वुक्का स्कसमये द्वयो रितिरभसा
त् रुइकलिंगादिभिर्वुक्कनांतं क्लीवमप्युत्पन्नमित्युक्तं। उरस्यपि च वुक्कायां हृदये मानसे पि वेति त्रिकां
डशेषः। वुक्कस्याग्रं संमुखी भूतं मांसं वुक्काग्रमांसमित्येकं नामेत्यन्ये। अपरे तु वुक्का पृथगेव हृदयां
तर्गत मांसविशेषे पद्माकार हृदयादि द्वयमाहुः। उक्तं च पद्मकोषप्रतीकाशं सुषिरं चाप्यधोमुखं
हृदयं तद्विजानीयाद्विश्वस्यायतनं महदिति। केचित्तु वुक्कादिचतुर्भिरेव पर्यायमाहुः। हृदयं हृच्च प्रा
युक्तं। मेद इति मेद्यति स्निह्यति ञिमिदा स्नेहने ०८ सुन् मेदः घञंत इत्यन्ये। वपति शुक्रं तत्प्रभवत्वात्
वसति प्राणिषु पवाद्य च् टाप् वपा वसा दंत्यांता कुत्सा हिंसा निर्यास वसा वाय सपो स्नूतया श्रर्कुर्ंस
इति सभेदात्। त्रीणि मांसप्रभवस्य धातुविशेषस्य। पेति ग्रीवायाः शिरा ग्रीवा शिरा पश्चात्कछृ नक

र्मधारयः ग्रीवायाः पश्चादिति षष्ठीसमासे राजदंतादिर्वा ग्रीवायाः पश्चाद्भागे या शिरा सा मन्या मन्य
ते ज्ञायते गुरुदुःखमनया संज्ञायां समजेत्यादिना क्यप्। एकं ग्रीवायाः पश्चात् स्थितशिरायाः। नेति
नल्पते वध्यते नया एलवं धने वा हलकाद्द सिवपीत्यादिना ष्ट्रन् नाड्डिः पन्नेडी षि नाडी। नडे ध्यिञ्
नाडः गौरादिङीष् नाडीत्यन्ये। धमति दीपयति जठराग्निं धमेः सोत्राद् ईअर्थादशनिवद् निः धमनिः ना
डी षि धमनी च। सिनोति कायं षिञ् बंधने रक् सिरा दंत्यादिः ऊर्ध्वस्थायासा सिरा सा ल्लूरकाः सचल्ल
क्यइति दंत्यतालव्ये सूक्ष्मभेदात्। देहे शेते तिष्ठति शीङो रक् कः ख्वर्चं चेति शिरा तालव्यादिश्च। शि
रो नाम पिप्पली मूलेस्याद्धमन्यां चयो षितीति तालव्यादेरभसः॥ त्रिविधा हि कायनाडी एका वायुव
हा अपरा मूत्रविडस्थि वंधिनी अपरा लहरे ति ख्याता अन्याश्चाहारवाहिभ्यः सामान्येन ता सांत्री
णि। तीति तिल ति स्निह्यति ति लस्ले हने इगुपधत्वात् कः ततः कन् तिलकं। ल्कवते न्हारङ्ग व्यंबा

म्युड्र

प्पवलति मुङ ध्युङ न्युङ म्युङ प्युङ ल्युङ गतौ क्रुङ इत्येके मनिन् क्लोम क्लीवमदंतमपि सिध्मपर्याये उक्तं। हे फुप्फुस इति ख्यातस्य। मे तिमस्तक मिष्मति याति मस्तिष्कं इषुगतौ पृषोदरादिः। गुध्यते ऽनेनः शिरोवेष्टयति गुधपरिवेष्टने ऽच् पृषोदरादिः गोर्दं। हे मस्तकभव घृताकारस्नेहस्य। कीति केटतिनिर्गछति किटगतौ इगुपधत्वात् कः पृषोदरादित्वात् टकारः किट्टं। मलते धारयति देहं गर्ध्यंत्र वृ मलः। वसाशुक्रमसृक्मज्जा कर्णविण्मूत्रविण्नखाः। श्लेष्माश्रु दूषिका स्वेदो द्वादशैते नृणां मला इति। हे मलस्य। अंत्रमिति अमति रुजं पीडामनुभवति अमरोगे अमियमि मिदेस्त्र कुअंत तिव भ्राति काल खंडादि अतिवंधने ष्ट्रनि वा ऽत्रं। पुरिंशरीरं तनोति न हि हनीत्यादिना क्विप् दीर्घश्च अनुदात्तोपदेशेत्यादिना नलोपः तुक् पुरीतत् अंत्रसाहचर्यात् क्लीवत्वं पुरीतदस्त्रियामिति वाचस्पतिः हे अंत्रस्य। गुल्म इति गुल्पतेरन्हन्यते ऽस्मान्रुडरन्हायां भीमादयो ऽपादान इति साधुः गुल्मः। खेहत्यंतः प्रविशति

नीन्हणप्रयोगाच्चरति वा स्निहगनौश्चनूतन्हानूत्नीह स्नित्यादिना कनिन्दीर्घश्च स्नीहा। पुंसि दावंता
वयकान्स्नीहे वसं वद्देइति वाल काप्यः। हेकुन्हि वामपार्श्वमांसखंडस्य। अयेति वसांन्यस्यति नि
न्हिपति वस्नसाघ्र घोहराहि वस्नेशरीरमाच्छादयतिन किवरखं वर्मतहसति असगत्याहो मूलविभु
जादित्वात् केशकं छादित्वात् पररूपत्वे वा वरूसा। स्नातिवयसा वा झुलका डुणघुक्रस्नायुः स्त्रि
यां। हेनहुनइति ख्यातस्य। केतिकल्पत्वात् कालंवतत् खंडं चेति कालखंडं। यमनंयमः संयमनं
तत्करोतिक्किपितुकष्टषो हराहित्वान्मलोपः यकृत्। करंडाउमहास्नायुः कालेयं कालखंडक
इति स्मसः। समेक्लीवलिंगे। हेकुन्हेर्दक्षिणभागस्थमांसखंडस्य करेजइति ख्यातस्य। स्हणीति
सरतिपततिमुखात् सर्तेर्ल्युकुचेति इकनक्कित्वंतुकुवस्हणिका दीर्घो हिकीकनूपन्होस्हणीके
तिस्वामी। स्यंदेरावश्यकेणिनिः स्यंदिनी। लालयति ध्रामुमिच्छतिललई प्सायां घुरादिः अवदा

१५६

पृलाला। त्रीणि लाल इति ख्यातायाः। दूषीति नेत्रं दूषयति दुष वैकृत्ये हेतौ णिच् ण्वुल् ह्रस्वो णा वि
न्यूनत्वं दूषिका। एयंतात् ण्वुः कृदिकारादिति ङीष् दूषी च ततः स्वार्थे के वा ह्रस्वत्वे च दूषिका॥ पिंचो
डकं नेत्रमलं दूषीव दूषिका। पिबेति वा वस्यति। एकं पिंचोडी इति ख्यातायाः। मूत्रमिति। मूत्रयति
प्रस्रवति मूत्र प्रस्रवणे चुरादिः अच् मूत्रं। प्रस्रूयते नेन स्नु प्रस्रवणे पे डु स्नास्नव इति घञ् प्र
स्रावः। द्वे मूत्रस्य। उच्चेति उच्चार्यते त्यज्यते घञ् उच्चारः। अवकीर्यते क्षिप्यते वर्चस्के ऽवस्कर इ
ति सुट् अवस्करः। शामयति सौगंध्यं शकि शामि वहिभ्यो ऽलः शामलं। शक्नोति निःसर्तुं उणा
दयो बहुलमिति ऋदिति न प्रत्ययः शकृत्। गवते शब्दं करोति गूयते उत्सृज्यते वा गुङ् शब्दे
गु पुरीषोत्सर्गे वा तीर्थपृष्ठ गूथ गूथ प्रोथा इति थक् दीर्घत्वं च निपात्यते गूथं। पिपर्ति मलं पा
ति पृ पृभ्यां किद्वेति ईषन् उत्त्वरपरत्वे पुरीषं। शाम्यति उपवासादिना वा वर्च्चति दीप्यते वहिः

रा.मु.२
१५७

प्रकाशतेऽसुन् वर्चः कुत्सितं वर्चः कुत्सायां कः स्वार्थे वा वर्चस्कं। विशति भूमिं वा हुलकात् रमिका
शीत्यादिनाथ कृषत्वे कुत्वे च विष्ठा। विविधप्रकारेण हरेति ष्ठति उपसर्गादिति षत्वे वा। वेवेष्टि म
लनाडीं विष्टव्याप्नोत्वि क्विप् विड् नव विष्ठायाः। स्येति। कल्पते शिरोऽस्थनि समर्थो भवति क्लपेः
शीत्कारवदरन् वा हुलकान्नत्वाभावः कर्प्परः। कं शिरः पालयति अण् कपालः। कपालोऽस्त्री
शिरोऽस्थ्नि स्यात् घटादेः शकले व्रज इति मेदिनिः। द्वे शिरोऽस्थिखंडस्य। कीति। किं नाम न कस
ति व्याप्नोति अच् घृषोहरादित्वान्मलोपदीर्घौ कीकसं। कीकसः कृमिजातो स्यात् पुंसि कु
ल्ये नपुंसकमिति रन्त्यां ते मेदिनिर्दंत्यां तमेव कीकसं। कुले शरीरे भवं साधु वा कुल्यं। सजा
तीयगणो गोत्रे देहेऽपि कथितं कुलमिति विश्वः। अस्यते क्षिप्यते इदमिति सं ज्ञसिभ्यां क्थिन्
इति अस्थि। त्रीणि अस्थिमात्रस्य। स्येति। ककि धातोर्वा हुलकात् कलपीभ्यां कालन् कं

एम
१५७

कालः कमित्यप्ययं शिरः को वायुः कं कावाला तिकं कालः आत इति कः कं सुखं कलतिन्क्षिपति कल
पिलन्क्षेपे कर्मण्यण् णिवा। समुदितशरीरास्थिसंघातत्वग्मांससहितः कंकालः। एकं। पृष्ठेति। को
वायुः शेते तिष्ठति अस्यां त्वादयइतिरुः स्वार्थेकन् नीरं अत्वात् कं वा सुं शृणाति केश्रयरङ्‌ वास्येति
कुप्रत्ययएरङादेशश्च स्वार्थे कनि वा कशेरुका। एकं पृष्ठमध्यस्थिखंडस्य। शीति। केमस्तके रोटति वो
रयन्मानं रुड् स्तेये इन् करोटिः। कं वा युं रोटति प्रतिहंति वा पूर्ववत् करोटिः हृदयादुत्थितो वायुस्त
नप्रतिहतं यातीति ङीप् करोटी च करोटं चेति स्वामी॥ द्वेशिरोस्थ्नः पेति। पूरयति संधिं स्तुनस्तुचो पुरइ
ति पृधातोः स्तुन् प्रत्ययः गुणः स्वार्थे कन् यस्तु का स्पृशति पार्श्वे स्पृशे ऽ स्तुनस्तुचो पृचेति पृ आदे
शेगुणे कनि टापि पर्शुपार्श्वास्थ्नः। अंगमिति। अंगति शीतादिना चलति अगिगइत्यर्थः। अवृ अं
गं। प्रतीयते ज्ञायते ऽवयवमनेन प्रतिपूर्वी हिणः किंकिणीकादयश्चेति कीकन् प्रतीकः। अवयो

तिभिश्चीभवत्यवयविनाऽवपूर्वाद्योतेरवद्यत्र्यवयवः। अपहन्यतेऽपघनोंगमितिनिपातनादपघनः। च
त्वारिहस्ताद्यवयवस्य। अथेति। कलेरेतसिध्रियतेउपयुज्यतेकर्म्मण्यणितत्पुरुषेकृतीत्यलुक्
कलेवरं। एतिकालेगच्छतिइणगङ्निवहुलंसंज्ञाछंदसोरितिगादेशः गाङ्गतावित्यतोवागात्रं। वप
तिबीजमुप्यतेऽत्रादिकमन्नवावपेःक्नावपिचन्त्विन्निनितनिधनिम्यउस्वपुः। पृथिव्यादिभूतानिसं
घ्नंतिसंहतानिभवंत्यत्राधिकरणेल्युट्संहननं। शीर्यतेरोगादिनाशृणातेःकॄशॄपॄकटिपटिशौटि
भ्यईरः शरीरं। वर्षतिसुखादिहृष्यतेवास्नानपानादिनावृषुसेचनेमनिन्गुणः वर्ष्म। विविधोऽत्र
होज्ञानमत्रग्रहहृहवृदृश्नित्यादिनागृह्णातेरपविग्रहः। चीयतेसंचीयतेकललादिरूपेणान्नादिनोपची
यतेवानिवासचित्यादिनाघञ्आदेश्चकः कायः। दिह्यतेउपचीयतेकालेनदिहउपचयेकर्मणिघ
ञ्देहः पुंनपुंसकलिंगः। मूर्छत्युपचयंयातिक्तिन्राल्लोपइतिछलोपःदीर्घःमूर्त्तिः। तनोतिसा

मर्थ्यं मृत्वचरित्सरितनिमस्त्रिशीड्। स्यठः तनुः। यौगिकत्वे नाज्ञातित्वान्नोङ्। काव्यादर्शे तु यौगिका
दपिप्रयोगानुसारेणान्वज्ञातिविवक्षायांऊङ्। उक्तः तनूः नतुस्स्ततनुमनुपालयान्तुयांतीमितिमा
घः वरतनुसंप्रवदंतिकुक्कुटाइतिभारविः। ज्ञवपीत्यादिनाउसितनुः सां नापितनुषे तनुषेकमि
तिवासवदत्ता। एकादशदेहस्य। पेतिपादस्याग्रंपादाग्रं। प्रपदंप्रकृष्टंपदमितिप्रादिसमासः प्रगतं
पदमस्माद्वा। द्वेपादायस्य। पेतिपद्यतेगच्छतिपदरुजेत्यादिनाघञ्पादः पद्यतेगम्यतेनेनहलश्चेति
घञिवा। पद्यतेगच्छतिक्विप्पत्। पद्यतेगम्यतेनेनखलोघञ्चेतिघित्करणादन्यतोपिघः प
दमपिसिध्यसिञ्ञनवानुदात्तंपदमेकवर्जमितिसामान्यंज्ञापकं। अंघ्यतेनेनअहिगतौचंक्र्यादय
श्चेतिक्रिन्अंघ्रिः। अंघ्र्यादयोघकारश्कातिकृतः अहोरंहो दुहिणः संहर्षोङ्कीचघश्कातयः। च
रत्यनेनेनल्युट्चरणः। चत्वारिपादस्य। नदितितस्यचरणस्यग्रंथी घुद्यतेपरिहन्यतेनयाघुटप

रिवर्त्तने कुनृ शिल्पिसंज्ञयोरिति कुनृ घुटिके इग्गुपधत्वात्के ततः स्वार्थे क नित्यन्ये। गृपति उघम्यते गु
रिः फक्गुर्फः कपिरिकादिः गुल्फो। द्वेपादद्वयग्रंथेः। पुमेतितयोर्गुल्फयोरधः पादस्यपश्चाद्भागः
पार्ष्णिः हृष्यतेसिच्यतेपूत्नालनकाले भूरनेन। हृषुसेचने। पाद्मूर्धादयश्चेति निः। हृड्डिः। पार्ष्णिः स्त्रि
याम पिपार्ष्णिः स्त्रीपुंसयोः पादमूलेस्यात्ध्वजिनीकटाविति रंतिदेवः। एकं गुल्फाधोभागस्य। जंघे
तिको टिल्यपडं नात् जंघन्यधातोरन्येभ्योपीतिडः यडोऽ विचेतियडो लुक् टिलोपः टाप्प्रंतिगकं
त्यनयाहंते जङ्घचेत्यविनंघादेशोववाजङ्घा। प्रसरतिस्मगच्छतिस्मगत्यर्थाकर्मिकेतिक्तेरित्तः
प्रकृष्टं सृतं गमनमनयावाप्रसृता। द्वेजङ्घायाः। जेतिजनयतिगतिं जनजनने हस निज निचरिवट्भ्यो
तुण् ञुणितिघ्नुवंध विधानसामर्थ्या ज्ञतिवध्योश्चेतिनहद्य भावः अईर्वा दित्वाज्जानुः पुंलि
गोपिजानुमस्य मष्ठीत्यादितिसुक्तानात् उत्पज्ञानुज्ञुहोती तिस्क्तेश्च अस्त्रियामिति त्रिभिरन्वीयते

ऊरुः सक्थि तस्य पर्वग्रंथिः ऊरुपर्व। अस्थियोगादतिशयनेमतुप् आसंदीवदादिसूत्रेण
ष्ठीभावो मतोर्वत्वं च अष्ठीवत् पुंसि अष्ठीवान् अष्ठीवंतौ अष्ठीवंतः। त्रीणि अं वु इति ख्यातस्य।
सक्थीति सज्यते वस्त्रमत्र षन्ज संगे संज्प सिभ्यां क्थिन् सक्थि। अर्यते गम्यते नेन अर्तेरूर्वेति
कुक् अराङेशश्च ऊरुः ऊर्णोतेर्णुलोपश्चेति कुः णुलोपश्चोरूर्वा। द्वे जानूपरिभागस्य। तदिति
तस्य ऊरोः संधिस्तत्संधिः। वाङ्क्षन्ति आकाङ्क्षन्त्यावरणं का। न्हिवा न्हिमा न्हिकां न्हायं
ल्युः। बाहुलकाद्धातोर्ह्रस्वः स्त्रुवे न्हाणे न हर्षयन्बालवदिति कल्पलताश्लेषः। एकं भाउसी
नाम। विकारोयत्र जायते तस्य। गुदमिति गुधाति कुंचना कुंचनाभ्यां क्रीडति इगुपधत्वात्
कः गुदं। गूयते हद्यते नेन गुदादय इति निपातनात्साध्वित्यन्ये। द्वे दिव्याणो गुदे ऽपान इ
ति स्मृतेरपानयोगादपानः। भुक्ताहार निस्सारणाय याति रन्ध्राति व्याणादिकं च वा पाजिमी

रा.कु.२
१६०

त्यादिना उणप्रत्ययः। त्रीणि विष्ठानिर्गममार्गस्य। वेति वस्ते आच्छादयति मूत्राशयपुटं वस्तः आच्छादने इत्यस्मात् तिः। वस्तिः। मूत्राशयपुटो वस्तिरिति रत्नमाला। एकं नाभेरधोभागस्य। केति कथ्यते आध्रियते कटे वर्षावरणयोः पुंसीति घः कटः। फलकं चर्म तदाकारत्वात् श्रोणिः फलकमिव श्रोणिफलकं। इकेकडि अण रनिख्यातस्य। केति कथ्यते आध्रियते इत्यर्तीति इः कटिः। ततो ङीष् कटी च। श्रोणति संहती भवति शोणः संघाते इत्यर्तीति इः ङी वि श्रोणी च श्रोणी भारादलसगमनेति मेघदूतः। श्रोणीतटं स्पृशति किमिति पूर्वक विप्रयोगः। ककुद्‌ इह ष्यांसः तदाकारत्वात् मांसपिंडोपि ककुद्‌ तद्योगात् इति शायनेम तुप् अयवादिभ्य इति प्रतिषेधात् रूपरतिनवत्वं ककुद्मती। त्रीणि कद्याः पेति स्त्रीकट्याः पश्चाद्भागो नितंबः निभृतं तन्यते कामुकैः तनु कांत्यायां उच्चादयस्य इति वः नितंबः। एकं। स्त्री निस्त्रीकट्याः पुरोभागो जघनं हन्यते हनोज घे

एम
१६०

तिकुर्जघादेशः जघनं भृशं हन्यते हंनोयङंतात्पवाद्यविनैरुक्तेन लोपे वा चवर्गीयजकारादिकं। एकं स्त्री
कट्याः संमुखभागस्य। कूपेति कूपाविव निम्नत्वात् इवार्थे कन् नितंबद्वयस्थौ यौ कूपकौ पृष्ठवंशादधो
गर्तौ। स्कुंद्यते कामिनामनुरागेण स्कुदि आप्रवणे मन्दुराद्यश्चेति कुरच्प्रत्यये नलोपे ह्रित्वं च निपा
त्यते कुकुंदरे कुं नितंबभूमिं स्कुंदतीति आहृणोति व्याप्नोति पूर्ववत्साधनेन वा। एकं। स्त्रीति अविभागं स्फेट
यतः षट् स्फिट हिंसायामिति स्फेटयते चौरादिकात् क्विप् स्फिग्पूतेत्यादिना निपातनात् टकार
स्य चकारे स्फिचौ। प्रोथयति पर्याप्तं दृष्टं भवत्यत्र प्रोथः पर्याप्तौ पुंसि संज्ञायां घः प्रोथः कट्याः प्रो
थौ मांसपिंडौ कटीप्रोथौ। कश्चित्तु कटीन इति प्रोथाविति च पठ्यते वाह। स्त्रियां स्फिचौ कटिप्रोथौ
कटीप्रोथौ वपूलकाविति रभसः। द्वे पूलकद्वयस्य। उपेति वक्ष्यमाणयोर्भग शिश्नयोरुप
स्थो व र्तते उप तिष्ठते रेतः सेकाय शिश्नो वस्यास्तेति कः उपस्थम् ईर्चादित्वात् क्लीवमपि

रा॰मु॰
१६१

क्लीवे वाक्पाणिपायूपस्थकर्मेन्द्रियाणीति यहक्तल्लप्रयोगः। एकं। मेति भज्यते सेव्यते कामुकैरिति
खल्लोघवेति घचोधित्वाङ्जेरपि घः भगं गोचरसंचरेत्यादिना चकारात् भजेरपि घ इति त्वन्ये। यौति
शिश्नेन मिश्रीभवतीति योतेः श्रोणिवह्निः योनिः ङीषियोनीच द्वयोरित्यस्य योनिनान्वयः। द्वे योनेः
शीनिशाशाति सुतेन गच्छति शशासुतगतौ रास्नादिनिपातनान्नक् उपधाया इत्वं च शिश्नो। द्वितालं
व्यः श्मश्रु श्मशान शिश्रु शिश्न कुशेशयानीति शभेदः। मेहंति सिंचंति मूत्र रेतसी अनेन मिह सेच
ने दाम्नीत्यादिना ष्ट्रन् मेढ्रः। मिहेः करणे ल्युट् मेहनं। शुक्रपाते सति शेते पतति हजूशीङ्भ्यां रू
पस्वांगयोः फुक् चेत्यसु निशोफः तत्पन्हे शोफः सांतं। केचित्तु पुक् चेति पठंति न तत्पन्हे शोपः
न्यासकृता पि वनस्पतीत्यादिस्वरसूत्रे हजूशीङ्भ्यां फुक् चेत्यसुनि फुट्टिवशोफ इति सूत्यादि
तं। अनुन्यासकृतातु तत्रैव सूत्रे ऽ दंतोप्ययमित्युक्तं। रन्हितेनापि पष्ठ्याक्रोश इत्यत्र।

राम
१६१

शुनः शेपो मुनिः शेपोऽदंतोपीत्युक्तं अदंतत्वेव शेपपुच्छलांगूलेषु शुनः संज्ञायामिति प्रमाणं ॥
उणादौ तु इण्शीङ्भ्यां वन्निति वनि शेवो मेढ्र इत्युक्तं तदेवं शेप शेपः शेपसी शेफ शेफसी शेवश्चेति पंच
रूपाणि भवंति ॥ चत्वारि शिश्नस्य । मुष्क इति मुष्णाति गोपयति गुडकद्वयं मुष्केवा मुष स्तेये सृवृभृशु
षिभ्यः कः किदिति कः मुष्काः । अंडयोः कोषो भांडागारं अंडकोषः । वर्षति मुष्कं वा हुलकात् वृषः
ऋषिवृषिमंडिनीवाजृभ्यः क्युः वृषणाः त्रीण्यंडकोषस्य ॥ पृष्ठेति पृष्ठस्य वंशस्याधरेऽधोभा
गे त्रिभिरस्थिभिर्धरितं संख्यायाः संघे तिकन् त्रिकं । एकं । पीतिश्च पिचिनोति श्चाहारमिति वा हुलका
त् अमंतात् डः पृषोदरादित्वाद्वर्णागमलोपौ । पिचिंडः सदापिचंडसंरंभो नृपवज्जन इति लतास्ते
पादकारमध्योप्ययं । कुक्ष्याहारेण संश्लिष्यति कुशः स्निः कुक्षिः । जनयत्यन्नादिना स्वपूरणं ज
नेः ऋच्छेररन्निति वा हुलकादरन् पृषोदरादित्वादंत्यस्य ठः जठरं । उदरणाति उत् ऋच्छति वायुर

स्मातअगतौअमदोरपश्च।आहारेणोद्रणातिउन्दुक्छ्तीतिपचाद्यचिवाउदरं।तुण्यतेऽन्नादिनापूर्यते
तुणपूरणे अक्षादयश्चेतिनिपातनाद्दप्रत्ययेह्रस्वत्वेऽन्यस्यचनत्वेतुंदं।पंचोदरस्य।स्तनतिस्तनत
स्नारूपयोदयंकथयतःस्तनशब्देतनुतोविस्तारयतआत्मानंवाऽच्पारस्करादित्वात्सुट्स्तनौ।
।कुचतिसंकुचतिकुचसंकोचेकुचसंपर्कणकौटिल्यप्रतिष्टंभविलेखनेघित्यनोवाऽप्रघ्धपधत्वा
त्कःकुचौ।द्वेस्तनस्य।चूचितिकुचाग्रंस्तनहंतंचूचितिअव्यक्तंकारयतिशिशुनापीयमानमितिस्वा
मी।चूचुकोनाकुचाननमितिरत्नकोषः।एकं।नेतिक्रोडतिघनीभवतिक्रुडघनत्वेऽचक्रोडंस्त्रि
यांक्रोडा।इयर्तिचलतिनिश्वासवायुनाऽर्त्तेरुश्चेत्यसुन्उत्वंरपरत्वंचउरः।वदतिप्रकाशय
तिसामर्थ्यंहृत्वंवदीत्याद्दिनासःवत्सः।पुन्नादौतर्णकेवर्षेवत्सोवत्संतुवक्षसीतिरुद्रः।वक्ति
सामर्थ्यंवचेःसकुचेत्यसुनिसगागमेसत्वेकुत्वेचवक्षःवक्षसंघातेऽतोऽसुनिवक्षइत्यन्ये।

पंचवक्त्रसः। पृष्ठं त्विति तनोर्देहस्य चरमं पश्चाद्भागः पृष्ठं पृष्ठ्यते सिच्यते केशजलेन पृषु सेचने ति
थक् पृष्ठघ्रूथ पृथुप्रोथा इति पृष्ठेस्य कु पृष्ठं॥ एकं॥ स्कंधेति स्कंध्यते भारेण स्कंधः पृष्ठोदरादिः। कं
शिरो दधाति आतोनुपसर्गे कः पारस्करादित्वात्सुट् स्कंध इति वा। भुजस्य शिरो भुजशिरः
। अमति रुजति भारादिना वाहुलकान्न हबदीत्यादिना सः अंसो दंत्यांतः अंसः स्कंध इति सभे
दः। त्रीणि स्कंधस्य। सेति तस्यैव स्कंधस्यैव संधी अंसवक्षसोः संधी। जायते प्रकाशते वाहुस्मा
त् जत्रु इत्यश्चेति रुः जनेर्नकारस्य तकारः जत्रुणी। एकं। मेति कष्यते स्पर्शेन हिंस्यते कष शिषे
ति धातुर्हिंसार्थः वाहुलकात् सः षद्धोः कः सीति कत्वं कक्षाः। द्वे वाहुमूलस्य। पेति तयोः कक्षा
योरधोभागः पार्श्वं पर्शूनां पार्श्वास्थ्नां समूहः पर्शोरण स्वक्त्र्य इति णस् पार्श्वं नाल्यस्त्रा।

एकंवा हुमूलाधोभागस्य।मेतिमध्येभवंमध्यमंमध्याम्मः।अवअवलंवनेतेनलग्नंसंवद्धंओलग्जी
त्यनःक्तः अवलग्नं।मांलग्नंमीशोभांधत्ते॰ध्याहयश्चेतिनिपातनात्साधुःमध्यशरीरेविद्यमानत्वा
त्त्रसांप्रतिकइत्यकारेबामध्यः।विलग्नंचमाडो।त्रीणिदेहमध्यस्य।द्वाविति द्वौपरौभुजवाहू द्व
योःस्त्रीपुंसयोःभुज्यतेनेनेतिभुजःभुजन्युज्जावित्यादिनानिपातितःटापूभुजा।पानिसंबंधात्
क्वचिद्वाहुरपिभुजःवहंत्यनेनवहिरहितलिपंशिभ्यश्चेत्युणवाहुःवहेहंलश्चेतिघञिटापिवा
हावववाहोऽहंतोपिवाहोऽस्य भुजयोःपुमानितिदामोदरः।वाहोवाहुरितिस्मृतइतिदेशीकोष:
।सुवाहाइतिसुवंधुस्त्रेषःस्वश्चासुभुजाच।वकर्षेणवेष्टयतिवेष्टवेष्टनेचुरादिःपचाद्यच्त्र
वेष्टः।दाम्पंत्यनेनदमेडेसिद्धोःपहृन्नोमासित्यादिनादोषन्नादेशेदोष्णोर्वलान्नंत्रवलंगरी

यश्ति। भागुरिमतेटापि दोषा। पिदोर्दोषा च भुजो वा दुः पाणिर्हस्तः करस्तथेति धनंजय निघंटुः।

व हु दोषो गुरुस्त्वंसौ गोहं ताज नपीडकरस्ति विदग्धमुखमंडनं। चत्वारि बाहोः। केतिकेन सुखे

न फणतिप्रसरति फणगतो वा कुल्यादित्वाद्बहोदरादित्वाद्दकारस्यो त्वं कफोणिः कफणिश्च

। कफोणिः कफणिर्द्वयोरिति शब्दार्णवात् कृदिकारादक्तिन इति ङीषु कफोणी कफणी

च। कुरतिछिन्नो भवति कुरच्छेदने वाहुलकात् दशीकरवदरन्नुप्रकुवागमश्च कुर्परः। द्वे भुजमध्य

ग्रंथेः कहिणि औं इति ख्यातस्य॥ अस्येति अस्य कुर्परस्योपरिभाग आकन्धंप्रकर्षेण गंड

त्येकदेशी भवति गडिवदनैकदेशेऽच्प्रगंडः। एकं। प्रेतिप्रकुष्यते निष्कृष्यते भुजाभरणमस्मात् कुषेः रुषिकुषिगान्यर्त्तिभ्यस्थन् प्रकोष्ठः आमणिबंधं कफोणेरधः प्रकोष्ठः एकं

मणीतिप्रकोष्ठपाण्योः संधिर्मणिबंधः तमारभ्य कनिष्ठापर्यंतं करस्य वहिर्मांसलो भागः कीर्य
ते मुष्टिरनेनेति किरतेः कभगर्द्दिरासिवत्किल्भ्यो ऽभच्च करभः करस्येत्यत्र ज्ञापकसिद्धं न सर्वत्रेति
वहिः शब्दयोगेन पंचमी। एकं। पंचेति पंचांगुल्यः शाखा इव शाखा अस्य पंचशाखः। शेते सर्व
कर्मात्र एनत्र। शमशब्दोऽप्यत्र पाणिः शमः शयो हस्त इत्यमरमाला। पराप्तते ऽवक्रियतेऽनेने
तिवा हुलकादय्यतिभ्यां चेति नुपाणिः। त्रीणि हस्तस्य। तेतितर्ज्यते ऽनया तर्जतर्जने ल्युट् तर्ज
नी। प्रदिश्यते ऽनया करणे ल्युट् प्रदेशनी प्रदेशिनीत्यन्ये। द्वे। ऽगुष्ठसमीपांगुल्याः। अंगिवति
अगिर्गत्यर्थः अंगति ग्रहणाय गच्छति क्तन् न्यंजीति ठीः अंगुरिः वाक्षमूललत्वं अंगुलीनां
वारोलः अंगुलिः कृदिकारादिति ङीषि अंगुरी अंगुली च अंगुलरूपत्वकान्यं तरंयवमाने

अंगुलस्त्रयवोमतइत्यमरदत्तः। अंगुल्योनायवमानमितिवाचस्पतिः। करस्यशाखाइवकरशाखाः॥
द्वेअंगुल्याः। पुंसीतिअंगुरितिअंगुलीशब्दैकदेशानुकरणं अंगौ तिष्ठतीतिसुपिस्थइतिकः। अंवे
त्यादिनाषत्वंप्रदेशनीप्रागुक्ताक्रमप्रतिपादनायपुनरुक्तइत्यपोनस्तत्त्यांमध्येजातामध्यमा
। अनयाकिलब्रह्मशिरश्छिन्नमतोब्रह्मवधित्वादस्यानामग्रहणमयोग्यमित्यनामाडावुभा
भ्यामितिडाप्ततःकनूअनामिका। इर्वांगुल्यपेन्त्याऽल्पेतिकनिष्ठा। क्रमेणैकैकंपंचांगुली
नां। पुनरितिछिन्नोपिपुनर्भवतिपुनर्भवः पुनर्नवइत्येकेपठंति। करेरोहतिइगुपधत्वात्कः
कररुहः। नास्तिखमस्मिंइयंत्वयूपमवेतिनखः नभ्राडित्यादिनासाधुः। नखंनखत्वंधर्मप्रधान्
त्वान्नखपदंप्रहृत्तिनिमित्तरातिददातिप्रतिपादयतिनखरः नखरंत्रिष्वित्यमरमालांस्त्रियां
टाप्नखरा। चत्वारिनखस्य। प्रेतिततर्जन्यादिसहितेविस्तृतेऽंगुष्ठेयथाक्रमंप्रादेशादयः।

रा.मु.
१६५

द्वादशांगुलयः प्रमाणमस्य तद्धितार्थेत्यादिना समासे द्विगोर्नित्यं लुगिति मात्रचो लुकि तत्पुरुषस्यांगुलेः संख्याव्ययादेरित्यच् ६

प्रदिश्यते कथ्यते नेनेन हलश्चेति घञ् उपसर्गस्य घञ्यमनुष्ये बहुलमित्यादिना दीर्घः प्रादेशः प्रदेशो देशमात्रे च तर्ज
न्यंगुष्ठसंमित इति मेदिनिः। मध्यमायुतेंऽगुष्ठे विस्तृते तालः। तलति प्रदेशापेक्षया प्रकर्षेणा ति
ष्ठति परिमाणमत्र तल प्रतिष्ठायां घञ् तालः। गोकर्ण प्रमाणत्वाद्गोकर्णः। त्रीणि क्रमेण पृ
थक्पृथक्॥ अंगुष्ठ इति कनिष्ठासहितेंऽगुष्ठे विस्तृते वितस्तिः वितस्यते प्रादेशाद्यपेक्षया
अधिकमुत्क्षिप्यते प्रमाणमनेन तसु उत्क्षेपे वा हुलकात्त्र सेस्तिरिति तिः वितस्तिः॥ स
एवं द्वादशांगुलः पुंस्त्वश्रुतेः पुंसि वितस्तिः स्त्रीत्वित्यमरमाला। सुभूतिरपि स्त्रीत्वमाह। द्वे वि
तस्तेः। पेति विस्तृतांगुलिपाणौ चपेटाद्यास्त्रयः चंवनु सरन्नु पिटति संहतो भवति चपेटः पृथो
दरादिः चप्यते सांत्व्यतेनेनेति शकादिभ्योऽटन् वा हुलकादित्वं चपेट इति मधुमाधवी। चर्प
टोप्यत्र चर्पटः फाल विपुले च पेटे पर्पटे पि चेति मेदिनिः प्रकर्षेण तल प्रतिष्ठते पूर्वापे

रा.म.
१६५

न्तयापवाद्यत्। तलं स्वरूपाधरयोः खङ्गमुष्टिचपेटयोरिति विश्वः। मेरुसुमेरुवत्तलप्रतलौ
प्रसृतो हस्तः प्रहस्तः। द्वाविति द्वौ वामदक्षिणौ प्रतलौ मिलितौ संहतल उच्यते। प्रतलद्वयं मि
लितं संहतलः स्यादित्यर्थः संहतं तलानि अत्र इति कः संहतलः। प्रश्लिष्टे तले ऽत्र प्रतलः। नि
र्विसर्जनीयपाठे द्वौ वामदक्षिणौ पाणी संहतौ मिलितौ चेत्तदा संहतलप्रतलावुच्येते॥ एकं
।पेति निःशेषेण कुञ्चीकृतः पाणिः प्रसृताख्यः। प्रसृतिरिति चेति स्वामी। प्रसृतैः कः किन्नुवा
एकं। ताविति तौ प्रसृतौ युतौ मिलितौ अञ्जलिः अञ्जेः कीतन्यं जीत्यादिना अञ्जलिः। एकं। पेति कफो
णिरधः प्रकोष्ठस्तत्र विस्तृतकरेण सहिते हस्तो वर्तते स च चतुर्विंशत्यङ्गुलः प्रकोष्ठो वि(
स्तृतकर इति प्रथमान्तौ विपाठः। एकं हस्तस्य। मुष्ट्येति सहस्तो बद्ध्या मुष्ट्योपलक्षितो र
त्निः स्यात् क्तनीत्यादिना द्वादश धातुभ्यो द्वादश प्रत्ययाः क्रियन्ते तत्र अर्त्तेः कत्निप्रत्य

यः ककारः कित्कार्यार्थः। धातोर्यणादेशः। रत्निः। रत्न्यरत्नी स्त्रियो हस्तौ वद्धमुष्टितनांगुली
इत्यमरमाला। ना ऽरत्निः कफोणौ हंतेस प्रकोष्ठे वांगुलादिविति रुद्रः। एकं। अरेति निर्गता क
निष्ठा यस्मात्तेन मुष्टिना विस्तृतकनिष्ठेनेत्यर्थः तदुपलक्षितो हस्तो ऽरत्निः स्यात् रत्निसदृ
शो ऽरत्निः साहश्ये नञ्। ऋतेः सौत्रात्पाल्ह्यरियइति निः अर्त्तिरिति तुसुभूनिः। एकं। व्येति ति
र्यक्कृतयोर्विस्तृतयोः सहस्तयोर्बाह्वोरंतरमवकाशो व्यामः व्यामीयते तेन नमाङः मूलवि
भुजादित्वात्कः। एकं। ऊर्ध्वेति ऊर्ध्वमुपरि विस्तृतौ दोषौ भुजौ पाणी च येन तत्रा पुंसा स तथा मा
दृशः पुंसो यन्मानं परिमाणं तत्र पौरुषं त्रिषु यथा पौरुषं जलं पौरुषी यष्टिः पौरुषः सेतुः
। पुरुषहस्तिभ्यामण् चेत्यण्। एकं। केति कणति शब्दायते कण्ठः कंठः कंठं कंठी च समीप
गलशब्देषु त्रिषु कंठं विदुर्बुधाः इति शाश्वतः। गीर्यते भक्ताद्यनेनेति गलः पुंसी क्षिपः अविदि

भाषेतिलत्वं।ह्रेग्रीवापुरोभागस्य।अथेतिगिरंत्यनयाऽस्यांनिगरणेपूर्ववज्जिह्वाग्रीवाइतिवनुप्रत्ययो
ऽत्वःपरईकारःगुणेऽडागमाभावेयणादेशेवटापिग्रीवाउल्वादिवप्रत्ययेपूर्ववत्ग्रीवेतिवा।शि
रोधीयतेऽस्यांकर्मण्यधिकरणेचेतिकिःशिरोधिःस्त्रीसाहचर्यात्स्त्रीविश्राणमायनिम
तीमहत्याशिरोधिमितिमाघःकंशिरोधारयतिसंज्ञायांभृत्वृइत्यादिनाखच्खचिह्रस्वइतिह्र
स्वत्वेटापिकंधरा।त्रीणिग्रीवायाः।केतिसाग्रीवारेखाभिस्तिसृभिर्युक्ताकंबाकृतिग्रीवाकंबु
ग्रीवा।एकं।अवेतिनविभजतेविभागंयातिनञ्पूर्वात्त्वष्टिविभजनेइत्यतोवाहलकात्भृञ्
इत्यादिनावटेरुःअवटुःसाहचर्यात्स्त्रीअवटुःपुरुषेकृकाटिकाघाटेतिवोपालितः।घटे
श्चौरादिकात्कर्तर्यचिवृटापुघाटा।कृकंकंठमटतिएवुल्कृकाटिका।त्रीणिग्रीवापश्चाद्भा
गस्यघाडइतिख्यातस्य।वेतिउच्यतेनेनवचेःष्ट्रन्वक्त्रं।अस्यतेक्षिप्यतेऽस्मिन्क्तन्नादिकं

रा॰मु॰
१६७

कृत्यल्युटोबहुलमितिवा हुलकादधिकरणेऽर्हलोरण्यत् आस्यं आस्यंत्यनेन वर्णा । नित्यास्य
मितिमधुमाधवी। वदिलपिभ्यांकरणेल्युट् वदनं लपनं तुंड तिखंडयति न्हिम्नड्मंतु डितो
डनेपवाधवतुंडं। आसमंतादनंति आणंत्यनेनल्युट् आननं। प्रजापतिनाखातं इति ख
नेर्मुडुदात्तश्चेत्यत्रसच डित् टिलोपः मुडागमश्च मुखं मुखवर्गे मुक्तं। प्राक्खनेर्मुडुदात्तश्चत
तोऽ बप्रत्ययोभवेत्। प्रजास्तेजायतः खातं तस्मा दाहुर्मुखंबुधा इति निरुक्तकारः। सप्तमुख
विवरेकवचनकृत डुपलक्षितेसमुदायेप्रयुंजते। घ्रातीति जिघ्र इत्यनेनल्युट् घ्राणं। वहति
प्राप्नोतिअत्रवहागंधस्यवहागंधवहा। घुणतिभ्रमतिसंगतार्थे अत्रघोणा। नासतेशब्दा
यतेणास्टशब्दे॰ चनासाण्वुलिरवार्थेकनिटापिइत्वेनासिकानसानस्याच। घ्राणंगंधव
वहानासानसानस्याचनासिकेतिसाहसांकः। पंचनासिकायाः। ओष्ठेतिउष्यतेदखते

राम
१६०

रा॰मु॰
१६८

णकेनजलेनपुल्पेनेवाघत्र्कप्पेतेप्रसाध्येतेवाकपिः सौत्रोधातुः कपिकंडिकलिम्पत्रोलत्
कपोलः। अत्रद्विल्वमतंत्रंकपोलस्यविभूषणमित्यादिदर्शनात्। द्वेकपोलदेशस्य। नदिनितभ्यां
कपोलाभ्यांपरोमुखभागोहंनिकठोरमपिदंष्ट्रंस्तृहन्तिहीत्यादिनाउः हनुः यत्रजंभारव्यादं
ताजायंतेइतिसुभूतिः। नवपरेतिपाठेहनोःस्त्रीत्वंहनुरितिप्रकृतेद्वयोःकपोलावयवइति
मेदिनिः। पुंस्यपीतिस्वामीपुंयोगेकरणिहनूनपुंसकेश्मश्रुजानुवगुदंवेतिवररुचिः। एकं
। रेतिरघतेविलिरव्यतेदशपतेचामीभिरितिल्युड्रदनाः। एवंदशनाः दन्शदशनेइतिनिर्देश
न्नलोपः। दाम्पतिकठोरइमंशमयतिदमेरंतर्भावितणयर्थात्तवन्नन्दंताः। रदंतीत्यद्र
दाः। चत्वारिदंनस्प। तेतितलप्रतिष्ठायांवाहुलकाडुणनालु। ओरस्यलइतितरतेर्डुणरे
फस्यलइतिवा। ताद्यतेनिक्कयातडआघातेवुरादिःमित्रधादित्वात्कुः उलयोरेकत्रस्मरणा

राम
१६८

ह्वा। ककुदं तिष्ठत्येष्टं ककुदं शिरः तत्रभवमग्रं काकुदं। द्वे तालुनः। रसे त्रिरसंज्ञा नातिरसज्ञा। रसत्या
स्वादयति नंद्यादित्वाल्ल्युः रसना। रसेः सौत्रात्। रसिरुचिरुहन्तोयुज्ञिति युच्चिवा रसनेव। रसनं
स्वदनेध्वनौ जिह्वायां तु नपुंसि स्यादितिमेदिनि। अतएव पित्तेनदूनेरसन इति नैषधः। तालम्
स्वपिदंत्यास्वेत्यादौ जिह्वायां तु [illegible]
[illegible] जिह्वा रसना तथेत्युक्तेरियं तालव्यदंत्यमध्या रसने तु ध्वनौ
स्वादे रसाज्ञारास्नयोः स्त्रियामिति रभसः। लिहं ति रसाननयालिहेः पूर्वं जिह्वामीवा इति व
नु प्रत्ययः आदेर्जत्वं निपातनात् जिह्वा जहातेर्व प्रत्यये द्वित्वे न्वाकारलोपे ष्ठुवा जिह्वा॥
त्रीणि जिह्वायाः। द्वे ति ओष्ठयो र्वामदक्षिणौ प्रांतावंतौ सृक्कणी ओष्ठस्येति ज्ञातावेक
त्वं सृजतो लाला दिवाहुलकात् श्नलुक्त्वात्रित्यादिना निपातः सृक्कणी क्लीवइति सुभू

रा.मु.
१६८

त्तिः। प्रांतावोष्ठस्य सृक्कणी इति क्लीवकांडे॰ मरहन्तश्च महासृक्कायश्चोभितो न्टसिंहनखा।
ग्रवदिति लताश्लेषात्कद्वयं स्मितस्य संभावय सृक्कणाकणानिति श्रीहर्षप्रयोगाद्दकारयु
क्तं वा नसंयोगाद्दमंतादित्यप्लोपोन॰ सृक्कोवेव विज्ञेये वत्वारिंशाच्चवक्रजा इति वचना
दर्दंत क्लीबं सृक्कमपि सृक्कणी ङि॰ वंतावससृक्कणी प्रांतमसृक्कप्रदिग्धं प्रलेलिहानो हरि
णारिरुद्वैरिति पाणिनेः। सृक्कणिरिती दंतमपि क्लीवे वारिशाद्ववदित्युक्तेः। सृक्किशद्वोक्क

रा

स्वेकांतोपि क्लीव इत्यपरे। सक्थ्यस्थिदधिसृक्कितथा वारिस्यादित्युरुणाः। एकं। लेतिल
लति विलसति तिलकादिकमत्र ललतीप्सति तिलकादिकं लल विलासे लल ईप्सायां वा
उणादयो बहुलमित्याट इतिस्वांगं क्रवमपर्शु इत्यत्र स्वरसूत्रे जिनेंद्रः। अल्पते भूष्यते
अलभूषणे वा हुलकात्तक्रिय इति रकन् अलिकं। अलीकमहितेपीति कात्यायनः।

राम
१६८

अक्षिकं ह्रस्वदीर्घमध्यमिति राजदेवः ॥ गावौ नेत्रे समीपे धीयेत अस्मिन्निति किः गोधिः ॥ गोधिभालौ महाशंख इति त्रिकांडशेषात् पुंल्लिंगः । वीणिल ललाटस्य । ऊर्ध्वं इति नेत्राभ्यामूर्द्ध्वभा गोध्रुवौ भ्रामतो नेत्रोपरि भ्रमे डू रिति डू प्रत्ययः भ्रुवौ ॥ एकं । कूर्चमिति नासोपरि भ्रुवोर्मध्यं कूर्चं तत्र कूर्चशीर्ष इत्यत्र वाग्गुक्तं । एकं । नेति अक्षिपुत्तलिका तारका सा च वाग्गुक्ता कनति दीप्यते कनी दीप्तौ वा हुलकादीन् गौरादिः स्वार्थे कन् कनीनिका । द्वे अक्षिपुत्तलिकायाः लोचे ति लोक्ते नीन्दिभ्यः करणे ल्युट् लोचनं नयनमीक्षणं च । मीयते प्राप्यते रूपमनेन दाम्नीत्यादिना ष्ट्रन् नेत्रं । आचष्टे कथयति विज्ञापयति रूपं चक्षिङः कट्टव पि वक्षि जनित निध निभ्य उसुः चक्षुः वा हुलकात्र ख्याञादेशः । अश्नुते रश्मिभिर्व्याप्नोति रूपवद्द्रव्यं अशेः षित् प्रथ्वादिना षत्वं षढोरिति कत्वं आदेशप्रत्यययोरिति षत्वं अक्षि

८६ ओष्ठोन्नाद्याहारेण उषि कुषीत्यादिना थन् ओष्ठः उपरिवर्त्यधोवर्ती च ओष्ठः अधरोप्येवं धरति
धरः न धरो ऽधरः न किंचिद्धर्तुं शक्नोतीत्यर्थः ओष्ठाभ्यां सहितावधरौ ओष्ठो धरौ प्रत्येकं द्वयोरपि
ओष्ठादिचतुष्कं द्वयोरपि । मां विवक्षुरसि किं चलदोष्ठ इति अनएव उत्तरोष्ठोधरोष्ठ इति प्रयो
गः । रदनाः दंताः छाद्यते आभ्यामिति पुंसि घः छादेर्घ इति ह्रस्वत्वे रदनच्छदौ । दशनानां छा
दनसाधर्म्यात् वाससी वस्त्रे इव दशनवाससी । चत्वार्योष्ठाधरयोः । अध इति अधराधोभाग
श्चिबुकं चीयते मुखसौंदर्यं चीञ् आह्वानसंवरणयोः मित्रघ्वादित्वात् कुः पृषोदरादित्वाद् ईण
विकारः ततः कन् छिनोति मुखसौंदर्यं वा मित्रघ्वादित्वात् कुः मेरुक्तो वर्णागमः ततः कन् । अ
धरस्याधरौष्ठस्य चिबुः स्याच्चिबुकं तथेति निगमारम्भः कोषः । एकं । गेति गंडतो वदनैकदेश
तां गच्छतो गंडिर्वदनैकदेशो ऽवृगंडो पुलमहत्त्वे कं सुखं पुलतो महत्त्वं नयतः कमिण्य

अन्वेर्णोति अन्तू माप्नौ इः अन्तीति तु स्वामी। दृश्यतेऽनया। क्विपृक्विन् प्रत्यययोर्यस्मात् दृश इति प
न्तो क्विन् प्रत्ययस्येति कुत्वं दृक्। क्तिनि तु दृष्टिः। अक्ष्णौ चक्षुषः। अश्वीति अस्पति अश्नुते वा कंठं ज
न्वादित्वाद् उः अश्रुनाल मांतं द्वितीयमस्कपरं दंत्यांतं। रुध्यते इदमिति कर्मणि ल्युट् रोदनं। अस्र
ते क्षिप्यते वा हुलकात् स्फायीतिरक् अस्त्रं दंत्यसं। प्रावर्तयन्नदीमस्रैर्द्विषांतद्योषितां वस इति मा
घस्तेषाद् इत्यर्थे न सह श्लेषाद् दंत्यसं। जगरे चाश्रुमश्रुणी सूक्ष्मभेदान्नाल्पशब्दकरणोक्ते अश्रु
नालप्रशामपि। पंचाश्रुणः। अपेति नेत्रयोरंतौ प्रांतौ अपांगौ अनृजुत्वेनापकृष्टमंगतः अश्रु एकं
नेत्रांतस्य। केति कटमसहशामन्ति अत्र कटान्ताः कटतो वक्रं गच्छतोऽविकटे अन्तिणी अत्रेति स
विकटान्तकान्तावितिरभसात् कान्तोऽपि। एकं। केति करोति शब्दज्ञानं कः जः कहट इत्यादि ना
न नृकर्णाः। शब्दो गृह्यते नेन ग्रह हव ह इत्य प्रशब्द ग्रहः। श्रूयते नेन श्रवणो नेः स्नुक्तिन् ल्युट् इपः।

श्रोत्रं श्रुतिः श्रवणं श्रवः॥ पञ्चापयिरो। श्रोत्रं च। असुनि श्रवः सांतश्च। क्वचित् श्रोत्रस्थाने पुंसी
ति पाठः॥ षट् कर्णस्य। उत्तेति उत्तमं अंगत्वादुत्तमांगं। श्रीयते केशैः श्रयते स्वांगे शिरः। किच्चेत्यसुन्
शिरादेशः। शिरः देहः श्रितो चेति वा श्रणाते रुधिरं जिस्फृभ्यः किदित्यसुन् कृतइत्वे शिरः इति तु सुभूत्या
द्यः। कं भूषण काया लंकारस्तु कं। शिरो वाचीशी दंतोरजो वा चीरजस्तथा॥ निचकर्त शिरान्
द्वौ ति। अर्थाः पादरजोपमाद् इति पिंडं दद्याज्जयाशिरे। शृ हिंसायां बाहुल
कादतोऽपि षप्रत्यये किच्चेति कित्वाद्गुणाभावे इत्वरपत्वदीर्घत्वे सुशीर्षं। कुकार शीर्षयोरिति निपा
तनाद्वा॥ छिन्नेनानेन न म्रियते मडः श्वन्नुक्षन्नित्यादिना कनि मूर्द्धभावे मूर्द्धा निपातितः॥ मस्य
ते परिमीयते मसि धातोर्बाहुलकात् घुषिदृड्भ्यः क्तः स्वार्थे कन् मस्तकः। पंच मस्तकस्य॥ चीति
विज्ञवयने ह्रुर छेदने चिन्वन्नु वर्द्धमानं ह्रूर्यते छिद्यते चिकुरः पृषोदरादिः। कुंतं कुंता

रि ७

याकारं॥तिकः कुंतलः वालः प्रागुक्तः। कच्यते वध्यतेऽसाविति कच बंधने पुंसीतिघः कचः कवत्या
त्मानमित्यजित्यन्यः। केमस्तके शेते तिष्ठति अन्येभ्योपीति डः तत्पुरुषे कृत्यलुक् केशः॥
शिरसिरोहतिकः शिरोरुहः। षट् केशस्य। तद्दितिकेशसमूहे इंचि न्नेत्यादिना ठक् कैशिकं कै
शाश्वाभ्यां पक्षाविति यक् कैश्यं द्वे। अलति चूर्णभंगयुताः केशा अलकाः कर्पूरादिक्षोदश्चूर्णं तस्य
कुंतलाः चूर्णकुंतलाः। तद्धितत्र न्यस्यत इत्यन्ये। अलंति भूषयंति मुखं अल भूषणे तो कृ ज्वादिभ्यो
वुन्॥ क्लीवेपि स्वभाववक्राण्यलकानि तासामिति भारवेः। एकं। तद् इति अलका एव अलंवत्त
या ललाटे वर्तमानाः काम्याश्चलत्वाश्च भ्रमरप्रतिकृतित्वात् भ्रमरकास्वाभाविकाः कल्पितावे
तिएकं। केतिकाकपक्षाकारत्वात् काकपक्षः। शिरसि खंड्यते शिखंडकः पृषोदरादिः ताल
व्यादिः। शिखंडो तु शिखावर्हइति तालव्यादौ रभसः। शिखंडक शिखंडकाविति वाचस्पतिसु

स्वांगे २

श्रोत्रं श्रुतिः श्रवणं श्रवः। श्रूयते[illegible]नेन श्रोत्रं। ष्ट्रन्। असुनिरुद्धः सोनश्च। क्वचित्त श्रोत्रस्थाने पुंसीति पाठः। षड् कर्णस्य। उत्तमे इति उत्तमं शंगत्वादुत्तमांगं। श्रीयते के शेः श्रयते [illegible] शिरः किंचेत्यसुन् शिरा देशः शिरः। दृहः शिनो [illegible] निवाप्यगणातेरु पिरं जिष्णुभ्यः किदित्यसुन्। रुकृत इत्वे शिरः इति नुसुभूत्या दयः। कंठभूषणका [illegible] कारउक्तं। शिरो वाची शिरो दंतोरजो वाचीरज स्तथा॥ निचकर्त शिरा न्ड्डौणिः अर्थाः पादः [illegible] मा इति पिंडं दधाद्याशिरे। प्रगाति शात्रव इदं [illegible] हिंसायां वा कुलका द्वतो पिष्व अत्यये किंचे [illegible] केत्वा अुगाभावेदूत्वरपत्वदीर्घत्वे षुशीर्षं। कुं कारशीर्षयो रिनिनि पातना द्वा। छिन्नेना नेन [illegible] यते मडः प्वन्नु क्षन्ति त्यादिना कृतिमूर्ढ भावे मूर्द्धा निपातितः। मस्य ते परिमीयते मसिधाने दी कुलकात द्युषि दृढ् भ्यः क्तः स्वार्थे कने मस्तकः। पंचमस्तकस्य॥ वीति विभ्रम वयने न्युरं [illegible] ने चिन्व न वर्द्धमानन्द्धूर्यते विद्यते चिकुरः पृषोदरादिः। कुंतं कुंता

रोहतिकः शि॰२

रा॰मु॰
१७१

ग्याकारंल्नातिकः कुंतलः बालः प्रागुक्तः। कच्यते बध्यतेऽसाविति कच बंधने पुंसीति घः कचः कव१
न्यात्मानमित्यजित्यन्ये। केमस्तके शेते तिष्ठति अन्येष्वपीति डः तत्पुरुषे कृत्यलुक् केशः॥
शिरसिरोरुहः। षट् केशस्य। तदिति केशसमूहे ऽचित्तेत्यादिना ठक् कैशिकं। केशाश्वाभ्यां यञ्छा
विति यञ् कैश्यं। द्वे। अलेति भूषणा भंग्युनाः केशा अलकाः। कर्पूरादि न्होरद्धूर्णतस्य कुंतलाः
स्धूर्ण कुंतलाः। तद्धितत्वन्यस्यत इत्यन्ये। अलंति भूषयंति मुखं अलं च भूषणे कृत्वाहिभ्यो वु
न्। क्लीबेपि स्वभाववक्राण्यलकानि तासामिति भोरवेः एकं। तद्दति अलका एव प्रलंबतया
ललाटे वर्त्तमानाः कार्ष्ण्याबल्लत्वाच्च भ्रमरप्रतिकृतित्वात् भ्रमरकाः स्वाभाविकाः कल्पिताविति
एकं। केति काकपन्हाकारत्वात् काकपन्हः। शिरसि खंडयते शिखंडकः स्पष्टोदरादिः नाल
साद्विः। शिखंडो तु शिखावर्ह इति नाममाले रभसः। शिखांडक शिखंडकाविति वाचस्पतिमु

राम
१७१

मूर्ती। इह क्षत्रियकुमाराणां शिखापंचकस्य शिखात्रयस्येत्यन्ये। उक्तं च बालानां तु शिरः कार्यं
त्रिशिखं मुंडमेव चेति। अन्ये तु सामान्येन चूडायाः इत्याहुः। इह क्षत्रियकुमाराणामुपनयनकाले
कृतानां चूडानामित्यन्ये। केति केशानां माडीनां वंधविशेषः वेशः कं शिरो हरणोत्याच्छादयति
जानपदेत्यादिना ङीष् कबरी अत एव कवर निर्देशात् हृणं वा धित्वा ऽ च्। एकं। अथेति कुसु
मगर्भो मौक्तिकपद्मरागतिलकादिनाडी [illegible] बहिः संयतो बद्धकेशकलापो
धम्मिल्ल इति स्मृतिः। उर्ई मिलति इगुपधत्वात् के पृषोदरादिः धमिल्लः। एकं। शीति। शिखा
चागुक्ता। खुर संबोहने चुरादिः भिदादिपाठादङ् उत्वं रकारस्य दीर्घत्वं च चूडाः। अल्पः केशक
लापः केशपाशी अपच येगौरादिङीश्। त्रीणि शिरोमध्यस्थ चूडायाः। ब्रेति व्रतिनो जटास
त्तस्मात् जन्यते उत्पाद्यते जनेष्टो लोपश्चेति टप्रत्ययोंत्यनकारलोपश्च जटाजट तिसंहता

रा॰मु॰
१७२

भवति जट झटसंघातेऽपि वा। सटति अवयवद्रव भाति षट अवयवेऽवृदापूसटादंत्यादिः सटा
सांत्वसुखसिद्धा इति दंत्यादाद्वा सूक्ष्मविवेकात् व्रतिन इति प्राथिकमन्यस्यापि व्रतिनामिति वपा
ठः। कोटीरस्कं जटासटेतिरभसः। एकं। वेणिरिति वेणयतेऽपसार्यते वेणट गतौ दुः वीयतेऽप
सार्यते वीधातो र्हीरिभ्योनिः नैरुक्तेण त्वे वेणिरिति तु सुक्तिः। अन्योपसर्गनिवृत्त्यर्थं प्रवे
णिः इहधरणिभरणिः करणिश्रेणि वेणय इति स्त्रीप्रकरणे निगमात् स्त्रीत्वं कृदिकारादि
तिवा ङीष् वेणी॥ प्रवेणीच। द्वे प्रोषितभर्तृकादिधार्यकेशरचनाविशेषस्य। शीति वि
शदे मलेमलेना संपूर्णे केशे शिरसि भवः शीर्षण्यः शिरस्यः शरीरावयवाद्यत् शीर्षन्ये
चतद्धित इत्यत्र वा केशेष्विति शीर्षन्नादेशः। द्वे स्वतः स्नानादितो वा निर्मलस्यान्योन्यासंसृष्ट
केस्य केशस्य। पेति कचादित्यर्थे निर्देशः तेन कचात् कचपर्यायात् परे स्थिताः पाशादयः क

राम
१७२

लापार्थाः समूहार्थाः शोभनार्थाः शोभनार्थावापश्शिः सौत्रः। केचित्तु पशवंधन इति भूवारोप
ठं तितनोपजिपाशः। शेषो प्रागुक्तार्थौ। तेतितन्वां रोहति मूलविभुजादित्वात् कः तनूरुहं रू
स्वांतोघपक्षेपिआनशे तनुरुहाण्यपिहर्षइतिमाघः। यौगिकत्वात् विहंगराजां गरुहै रितिमा
घः। लोमन् लोमन् सामन्निति निपाताइति लोमादयश्चेति रुहेर्मनिन् हलोपः रोमकपिरिकादि
त्वाल्लत्वे लोम। त्रीणि लोम्नः। तद्दितिपुंमुखे पुरुषास्येतेषांद्वौ सत्यांतल्लोमानि श्मश्रूण्युक्तं
ते श्मनमुखमितिस्मृतिः श्मनिश्रूयते उपलभ्यते जचादयश्चेति निपातनाडुः शादेशादयश्चेति
सुभूत्यादयः। श्मनमुखंश्रयति श्मनिश्रयते डुन्तिडुनिवा॥ श्वश्रूश्वश्रुर श्मश्रु वर्णादेशना
। एकं। आकेति आकल्पनमाकल्यः। वेवेष्टि व्याप्नोत्यंगंपचाद्यच् वेषोमूर्द्धन्यांतः। विशंतिने
त्रमनांस्यत्रेतिवा अधिकरणेघञ् वेशस्तालव्यांतश्च। वेशो मूर्द्धन्यांतस्तालव्यांतश्चेतिप्राग

प्युक्तं। नयतिविबुनेर्नायकस्तस्यपथः कामजननादिव्यवहारादनघेतंधर्मपथ्यर्थेत्यादि
नायत्नेपथ्यं। प्रतीतंस्त्रीपुंसयोः ख्यातंकर्मप्रतिकर्म। प्रकर्षेणसाध्यतेजन्यतेशोभानेन।
ल्युट्प्रसाधनं। पंचालंकाररचनादिकृतशोभायाः॥ द्विनिदृश्येतेइत्याद्यलंक्रियांतसार्द्धंप
द्यमेकं क्वचिद्देवपुस्तकेदृश्यतेतत्तुसुगमार्थमेव। अलेतिअलंक्रियतेतेनघञ् अलंकारः
। एवंपरिष्कारः संपर्युपेत्यादिनासुट्परिनिविभ्यइत्यादिनाषत्वं। शेषेभ्यः करणेल्युट्
कुधिमंडार्थेभ्यश्चेतिकर्त्तरियुज्वा। पंचहारकेयूरादेः। अयेतिमंकतिमंडयति[illegible]नं उ
[illegible]तिमकिमंडनेमकेरुटतलोपश्चेतिउटनलोपावितिन्यासकारःमकुटमेकोकारंमुकि
लजिभ्यांकुटन्निति कुटनिमुकुटमितिपुरुषोत्तमइतिमुकुटंद्युकारंवररुचिमतेइहापि
द्युकारमेव। किरतिन्दिपतिरश्मीन्स्वर्णमयत्वात्‌ इगुपधज्ञाप्रीकिरःकः किरीटं। द्वेशिरोलं

कारभेदस्यमकुट इतिख्यातस्य॰ चूडेति॰ चूडा शिखा तत्र स्थितत्वाच्चूडाया मणिः चूडामणिः। शिर
सो रत्नं शिरोरत्नं। द्वे शिरोरत्नस्य। तेतितारं ज्ञातिख्यातइति कः एषो हारादित्वाद्धुस्वत्वे। एकं हारम
ध्यस्थनायकमणेः। वितिवालपाशेकेशहं देसाधुः। शोभाकरत्वात् हिताद्यत्वालपाश्या। परि
तः सर्वतोऽन्यो तिमियत्वात्तथाभूतापरितथा कर्मणि ष्य ञ्यपारि तथ्यं तद्योगादर्श आद्यचपारि
तथ्या। द्वे सीमंत स्थिताया: स्वर्णादिरचिताया: पट्टिकायाः। पेति पाशपुते वध्यते पाशवंधने चुरादि
ण्यंताद्चोयत्पाश्या ऽल्पविस्तृतत्वात्पत्रमिवपाश्यापत्रपाश्या। ललाटस्यालंकरणं कणि
ललाटात् कनलं कारइतिकनूटापुइत्वेललाटिका। द्वे सीमंतिकातो ऽन्यस्य सुवर्णादिरचित
ललाटाभरणभेदस्य। केतिकर्णस्यालंकारः पूर्ववत्कनादिकर्णिका। तालस्यपत्रं तालपत्रं
तेनापि कर्णभूषाजननात्कर्णिकापर्यायतातत्वस्वर्णादिकृतमपि वलयितं तालपत्रिका

रा०मु०
१७४

रत्वात्तालपत्रमुच्यते ताडंकोप्यत्र। द्वे ताडंकेति ख्यातकर्णाभरणस्य। कुंडेति कुंडतिसंहतं भवति कुंडत्यशोभां वा कुडितुडिसंघाते कुडिदाहे वा हृषादित्वात्कलच् कुंडलं। कर्णैकदेशो कर्णः सवेष्ट्यते तेनेन ल्युट् कर्णवेष्टनं। द्वे कुंडलस्य। ग्रीवेति ग्रीवायाः सर्वं भूर्त्तौ ग्रीवायां भवं कुलकुक्षिग्रीवाभ्यः श्वास्यलंकारे ष्वि ति ढकञ् ग्रैवेयकं। ग्रीवाया अण् चेति ढञि ग्रैवेयमपि स ग्रैवेयस्त्वमासि फणिनेति राजशेखरः। कंठे भूष्यते नया गुरोश्च हलः इत्यकारः कंठभूषा। द्वे कंठाभरणमात्रस्य। लेति लंबत इति ल्युः लंबनं। ललंत्येव ललंति का लल विलासे शतृ कन्नंतात् हभूवहिवसीति बाहुल का ल्ललेरपि कृ ड्षित्वं वषित्वात् ङीषू संज्ञायां कनिके णिङ्क ह्रस्वत्वे वा। द्वे नातिर्लंवितकर्णादेः। स्वेति सेवलंवकंठिका स्वर्णैर विता प्रालंविका। एकं। अथेति सेवलजं तिका मुक्ताभीरविता उरसो वक्षसः सूत्रं सूत्रः सूत्रं सूत्रावली तत्प्रतिकृतिच्चात्

रामु
१७४

कन्ठउरस्सूत्रिकाएकं।हेतिनिर्विशेषणोहारशब्दोमुक्तावल्यामेववर्त्तते ह्रियतेमनोनेनमंडनाय
ह्रियतेवाघञ्हारः।मुक्तानामावलिर्दीर्घापंक्तिः साचग्रथितैवभूषणप्रकरणात्।भिदाद्विपा
गत्।हारापिहारामुक्तावलीहारइतिरभसः।द्वेहारस्य।देवेतिअसौहारःशतयष्टिकःशतलतिकः
सन्देवैरपिच्छंद्यतेसंव्रियतेछदसंवरणेछंदिर्वेत्यतःकर्मणिघञ्।देवच्छंदः।यष्टिर्हारलताश्च
स्त्रभेदयोरितिविश्वः।यष्टिर्लतासरःसरिदित्यनेकार्थमाधवीसुभूतिश्च।अष्टोत्तरशतलति
कोयमितिकेचित्।एकं।हारेतियष्टीनांहाराणांभेदाहारभेदाःस्युःतेचकेइत्याहगुत्सेत्यादि
द्वात्रिंशद्यष्टिकोगुत्सः।गुत्सःस्यात्स्तवकेस्तंबेहारभिद्ग्रंथिपर्णयोरितिदंत्यांतेषुमेदिन्या
दयःगुत्सःप्रागुक्तः।चतुर्विंशतियष्टिकोहारोगुत्सार्द्धःअसमप्रविभागत्वात्पुंस्त्वं॥च
तुर्यष्टिकोहारःचतुःसंख्यायागोस्तनसमसंख्यत्वात्गोस्तनःचतुस्त्रिंशद्यष्टिको।

रा॰मु॰
१७५

गोस्तनः अभिमतरसन्त्वर्णात् गोस्तन इवेत्यन्ये। चतुःषष्टियष्टिको हारोऽर्द्धं एकदेशस्तत्
कृतो हारोऽर्द्धेत्यर्द्धहारः। विंशतियष्टिको हारो माणवकः आयुक्तः स्वल्पबटुत्वाद् शिशुः तद्
पेन्त्वायाऽल्पत्वान्माणवक इव माणवकः। एकयष्टिका एकसरा एकावली। सैव एकावली
सप्तविंशतिमुक्ताभिः कृतान्नक्षत्राणां सप्तविंशतित्वात् नक्षत्रमालेव नक्षत्रमाला। सप्तावि
शतीति पाठेऽन्येषामपीति दीर्घ इति सुभूतिः। प्रत्येकं नामानि। आवेति आङ्पूर्वो वपिर्न्या
सार्थ इति स्वामी। आ उप्यतेऽकर्तरि चेति कर्मणि घञ् आवापः ततः कन् आवापकः। परितो ह
र्तुं शक्यते ण्यन्तिपरिहार्य्यः प्रत्याघणिपारिहार्य्यः। कटत्याहृणोतिकटकं कटति स्थानांतरं
गच्छति वा कटगतौ कृञादिभ्यो वुन् इति वाऽस्त्रियामित्यस्य कटके नापि संबंधात् पुंस्त्वे पादक
टक इति वल्ह्यते घञर्थे कः। वलं वलनं वेष्टनं याति कः वलयः। चत्वारि स्वर्णादि रचितप्रकोष्ठा

राम
१७५

भरणस्य वाला इति ख्यातस्य ॥ क इति केकफोणिशिरसि प्रगंडयोः निखह्वादित्वाड्डूरः केयूरः स
न्नम्यलुक्तकेयूरं । अंगं प्रगंडरूपमवयवं दायति घर्षणात् शोधयति आत इति के अंगदं के
यूरमंगदं भूषेति स्वामी । द्वे प्रगंडभूषणस्य । अंग्विति अंगुलौ भवं विद्यमानं जिह्वामूलांगु
लेश्छः ततः स्वार्थे कन् अंगुलीयकं कपिरिकादित्वा दंगुरीयकं । पुंलिंगमपीदं अयमेथिल्प
भिन्नानेकाकुत्स्थस्यांगुरीयक इति भट्टिप्रयोगात् । ऊर्मिस्तरंगभेद आवर्ती ख्यस्तत्प्रति कृ
तित्वात् कनि ऊर्मिका ऊर्मिं प्रकाशं कायति आत इति के वा ऊर्मिः स्त्रीपुंसयोर्वीच्यां प्रकाशे
वेगभंगयोरिति मेदिनी ॥ द्वे अंगुरीयकस्य । सेति ऊर्मिकैव साक्षरा प्रभुनामाक्षरयुता मुद्र
यति विद्रयति मुद्रं रातिवा मुद्रा पवाद्यविके वा ऊर्मिकाया अंगुलिस्थत्वा दंगुलेर्मुद्रा अं
गुलिमुद्रा । एकं । कंकेति कं सुखाय कं सुखं वा यथा स्यात्तथा कणति शब्दायते कमिति प्र

प्रकृतेमस्तकेवसुखेपिवेतिअमयप्रकरणेमेदिनिः। कलमव्यक्तमधुरंवाकणतिष्टषोदरादिः।क
रोभूष्यतेनेनकरणेल्युट्करंभूषयतिवायुवुमंडनसूत्रेप्येनत्।क्लीवंस्यान्मंडनेसूत्रेकंकणंक
रभूषणमितिरभसः। पुंलिंगोपिहस्तमंडनसूत्रेस्यात्कंकणोनाप्रतिसरइतिरत्नकोषः।द्वेकं
कणस्य।स्त्रीतिमेहनस्यसूत्रस्यघतरवभिंइयंभगंतस्यमालामेखलापृषोदरादिरितिमाधवी
मीयतेप्रक्षिप्यतेमध्यभागेडुमिञः कलंवादयश्चेतिकलःगुणःप्रत्ययककारस्यखत्वंवनि
पातनाद्वामेखला।कचदीप्तिवंधनयोःकाचीत्येकेइरितिइःअन्येभ्योपीतिदीर्घःकृदिका
रादितिङीष्कांची।कांचीगुणस्थानमनिंदितायाइतिकुमारः।कांचिदामपिहितैकतरोरु
रितिमाघः।सपतिसमवैतिसपेर्वाहुलकात्हस्रिग्हष्टइतितन्स्वार्थेकन्गौरादिः सप्तकी
सप्तकेत्यनेकोपलन्हणंसप्तवल्क्यःकिंकिणयःकार्यतिशब्दायते ऽस्यांमूलविभुजादि

रम
१७६

त्वात्केवा। अश्नुतेव्याप्नोतिअशूव्याप्तौ अशेरशवेतिप्युःरशादेशश्चरशनेतिमाधवी। रसतिरस
शब्देचलनशब्दार्थादितियुवुरसना। क्षुभितसिंधुमनीरशनैःशनैरितिभारवियमकात्। रसना
वंधोरतिकलहेषुसदानानुमतिश्चितिवासवदत्तानाश्लेषात्तालव्यादंत्यमध्यारसना। सहारसनेन
ईषद्ध्वनिनावर्तनेसारसनंसारस्तुतल्कष्टंयथास्यात्तथासनतिभजतेसनसंभक्तौअविदासा
रसनं। स्त्रीकट्यांवस्त्रग्रंथनमितिस्वामी। मेखलापांसारसनमुरस्त्रेचतनुत्रिरणामितिदंत्या
दौरभसः। सारसनं द्विदंत्यसंसाहसिकः सारसनंसारसाः स्त्रोतसइतिद्विदंत्यसभेदात्। के
चित्तुएकयष्टिर्भवेत्कांचीमेखलात्वष्टयष्टिका। रसनाषोडशज्ञेयाः कलापःपंचविंशक
इतिपठंतिइहत्वभेदात्पर्यायता। पंचस्त्रीकट्याभरणस्य। अथपुंस्कटेतिसैवकांचीपुंसां
कट्याभरणंसत्शृंखलंत्रिलिंगंशृंगेणाग्रेणस्खलतिअच्शृंखलंपृषोदरादिःस्त्रणा।

निशैथिल्यं श्टृंखलं कलं वा इयश्चेति कलघन्प्रत्ययो धातोः श्टृंखादेशश्च निपात्यते नालख्या
दि। एकं। पेति पादस्यांगदमिव पादांगदं। तुलाइंडाकृतेर्जंघायाः कोटिरग्रमिव तुला कोटिः
तुलागृहदारुवंधार्थपीठिका तस्याः कोटिरश्रिरिव तुलाकोटिरित्यन्ये। मंजेः सौत्रात् गंभी
रादयश्चेतीरन् वा हुल्लकादिं सेरीरन्निति तु माधवी। मंजूशोभनोपादौ करोति णिचि टिलो
पे मंजिः ततः पूर्ववदीरनि मंजीरः। नूनंन्नूतंनूरयतिम्अवृषेोदरादिः नूपुराः। मंजीरोस्त्रीस
नूपुर इति रभसः। हंस इव कायति करोति शब्दायते मूलविभुजादित्वात्कः मधुरध्वनित्वा
द् हंस इवइवार्थे कन्निति माधवी इयगः हंसाकृतिपादकटको हंस इव हंसकः। पादस्य
कटको वलयः पादकटकः। घट् नूपुरस्य। किंकीति किमिति कणति नैरुक्त इत्वेगौरादिः
किंकिणी। ह्रस्वदीकारवतीनि रिकारा पिकंकणीति स्वामी। घंटेव घंटिका कन्नन

नः क्षुद्रेणसहसमासः क्षुद्रघंटिका। कंकणः स्यात्प्रतिसरः कंकणी क्षुद्रघंटिकेतिभागु
रिः॥ द्वे। त्वगिति त्वगादीनि चत्वारि वस्त्राणांयोभयः कारणानि भवंतितत्तस्तदुत्पन्नैः। एकं।
इतिवक्ष्यमाणानि क्षौमादिवर्जं वाल्कफालादीनिनिष्प्रयाणं यतानि दशत्रिषुत्रिलिंगानि
वकारादेकादशंतेत्रकमितिसुभूतिः। वल्कस्यत्वचो विकारो वाल्कं। क्षुमाया विकारः क्षौ
मं हृद्या दिवा च्यलिंगं च स्त्रियां क्षौमी॥ फालेति फलस्य विकारः फालं तस्य विकार इति सर्व
त्राण्। कर्पासीबदराभ्यां फले विकारेऽण् तस्य फले लुक्। ततोऽण्कार्पासं बादरं। कृमी
णामपाननिर्गतसूत्रकृतः कुड्मलाकारः कोषस्तनस्ककोशीं डठ्ञ्‌ कौशेयं। रंकुर्मृगभे
दस्ततोनानाद्यर्थेरंकोरमनुष्येऽण्चेत्यणञ्चां कवं। पशवोपिमृगा इति वक्ष्यते अतो मे
षादिलोमजमपि कंबलादिरांकवं। अनेति छेदः न्हालनंभोगश्चाहननं तद्हितमना।

निष्प्रवाणि २

रा॰ मु॰
१७८

हतं अहतं च गृहशय्यासनमुखैर्वासोभिरहतैः प्रियेरितिशाद्विकः। अनाहतमस्फुटितमित्य
न्ये। प्रायते अस्यां प्रवेशो ऽधिकरणे ल्युट्। प्रवाणी तंत्रवपनाधारशलाका सा निर्गता यस्मात् त
न्निष्प्रवाणि स्त्रियां निपातनात् कबभावः स्त्रियां निष्प्रवाणी च शाटी। विततास्तंतवस्तंत्रमि
ति न्यासः। ततो ऽखिवापहृतमुत्थापितं तंत्रात् दविवापहृत इति कन्। तंत्रकं। चत्वारि। नदिति
धौतयोः प्रक्षालितयोर्वस्त्रयोर्युगं शोषणायोद्गमनार्हत्वादुद्गमनीयं। उद्गम्यते ऽभि
लष्यत इति तु माधवी। एकं। पेतिधौतं शुद्धं धौतं वतत् कौषेयं चेति तन्नया। धावुग ति शुद्धो
क्तः। शुद्धः शु क्लो च पूते च केवले च प्रयुज्यत इति धरणिः। लकुचवटादिपत्रेषु कृमिभिरू
र्णाभिः कृतत्वात् पत्रोर्णपत्रसंवाधिन्यूर्णा त्रेतिपत्रोर्णं कौषेयमेव धौतं प्रक्षालितं मन्त्रो
र्णाख्यमिति तु सुभूत्यादयः। वेतिव हुमूल्यं यत् किमपि वस्त्रं तन्महाधनं न तु वस्त्रमेव व

एम
१७८

स्येतु मुख्यमेवश्चतएवपुराधिरूढः शयनं महाधनमितिभारविः।महांति मूल्यधनान्यस्यम
हाधनं द्वे।क्षौममिति सौत्रवस्त्रादधिकं क्षौतीति दुक्षुशब्दे धर्मवन्मनून्क्षौममहद्घ्यादि क्लीवंमा
विष्टलिंगमिति सुभूतिः।यत्पुनरतसीविकारवाचि प्रकृत्यंतरं तद्दुघ्यादि।दुनोत्युपतापय
त्यधिकघर्मोष्मजननात्वा हुलकात् दुनोतेः पिंजाद्युलच्कुगागमश्च दुकूलं।द्वे वर्माख्यव
स्त्रस्य।द्वे तुनीतिं निवीयतेस्म व्येञ् संवरणे क्तः संप्रसारणादि निवीतं।निहृतमिति तुस्वा
मी।प्रकर्षेणाध्रियतेस्म हृञ् संवरणे क्तः प्राहृतं।द्वे प्रोटितवस्त्रस्य।स्त्रीति वस्त्रस्य संल
ग्नाश्चंतावयवा दशाः स्युः सदा स्त्रीलिंगा बहुवचनांताश्चेत्यर्थः।वस्त्रस्येति वचनाद्वर्त्यो
दावेकत्वमपि च दशेति सुभूतिः।दशावर्त्योमवस्थायां वस्त्रांते भूम्नि पुंस्त्रियोरिति रभसः
।।दश्यते प्रायेण छिद्यते दशा भिदादिः।वस्यते आच्छाद्यतेनेन वस्तिः स च प्रागुक्तः वस्यं

नेछिद्यते आछ्रियंते वसनेहनच्छेदनावरणेषु चुरादिस्तनोः नित्यग्णंपनात्वसेस्तिरितिवावस्ति
रेकवचनांतोपिरहतुदशासामानाधिकरण्याद्गुत्वमितितुसुभूतिः॥ द्वेदशायाः॥ दैर्घ्यमि
तिआयम्यते आलम्ब्यतेनेनघञ् आयामः आसमंताद्याति आङ्पूर्वीद्यातेर्वर्त्तिस्कस्त्वित्या
दिनाः णिवावस्त्राहन्यचाप्युपचारादितिस्वामी॥ आरुह्यतेनेनहलश्चेतिघञ् आरोहः स्वा
मीत्वारोहस्थानेआनाहइतिपठति॥ त्रीणिदैर्घ्यस्य॥ पेतिपरितोनह्यतेवध्यतेवेष्ट्यतेनेने
तिपूर्ववत् परिणाहः॥ विशद्वात् वेः शालच्शंकटाविति शालच् विशालता हहत्वं॥ द्वेवस्त्रस्य
विस्तारस्यओसारइतिख्यातस्य॥ पेतिजीर्णमहष्टं वस्त्रपटादितिशद्वंभंगेवरतिकरोतिअ
वपटच्वरं पटोभूतपूर्वइतिभूतपूर्वेचरटिनेरुक्तेतकारवर्णागमेवाहुः॥ सेतिअज्यतेस्म
अक्तः स्फुटः नअक्तं कंसुखमस्मादितित्रिपदेवहुव्रीहौशकंध्वादित्वात् पररूपत्वेनक्त

कः। लक्यते हीनैरास्वाद्यतेऽनुभूयते रकलकः आस्वादने चुरादेर्विकल्पितण्यंतात् कर्मणि

कः लक्कः ततः स्वार्थे कन् लक्कक इत्यपि पाठः। कल्पते कुत्सायै क्लपेः शकादित्वाद् टन्। कि

रत्यवयविनं विचिकर कर्चा सोपटश्चेति वा कर्पटः। क्लेमलिनत्वादि दुष्टजीर्णवस्त्रखंडस्य

वस्त्रमात्रस्येति केचित् इति सुभूतिः। वेति वस्यते आच्छाद्यते नेन ष्ट्रन् वस्त्रं। आच्छाद्यते ने

नल्युट् आच्छादनं। वस्यते नेन वसैर्वस्यसिभ्यां णित्यसुच् णित्वाद्वृद्धिः वासः। चिलत्या

च्छादयति चिल वसने अच् चिल्यते ऽनेन करणे घञ् वा चेलं चिले श्चौरादिकादपि वा सुभूतिः

गौरादिङीषि चेली च। वस्त्रे आच्छादयति चिल वसने अच् चिल्यते ऽनेन करणे घञ् वा चेलं चि

ले श्चौरादिकादपि वा सुभूतिः गौरादिङीषि चेली च। वस्त्रे आच्छादयति ल्युः करणे ल्युट्

वासे वनं। अंशुभिस्तंतु सूक्ष्मभागैः काशते काशृदीप्तौ अन्येष्वपीति डः टिलोपः अंशुकं त्वा

लव्धशमिति प्रागप्युक्तं। पटोऽस्त्री कर्पटः शाटः सिचयप्रोतलक्तका इति रभसः॥ चट्ट वस्त्रस्य।
स्विति शोभनं सेलं सुचेलमेव स्वार्थे कन् सुचेलकः स्वार्थिकानां लिंगवचनातिक्रमात् पुंस्त्वं।
पटनं पटः पटविस्तारे घञर्थे कः ततः प्रशंसायामर्श आद्यच् वि पटः पटेटी अर्थेप न्हे पाटयति
दीप्नयति धारकं पवाद्यचिवा। हृे सु वस्त्रस्य। वेतिह्ने पिवरमावरणाम स्नुतेर्व्याप्नोति हिमा
दिवारणात् इ भिन्नीतीन् वराशिः वराशिर्ने ति तालव्यांते शाब्दिकाः। शटति गुरुत्वाद्रुगति अव
सादयति वा शटरुजा विशरणगत्यवसादनेषु ण्वुल् शाटकः तालव्यादिः त्रिलिंगश्च यथा
शाटकः शाटिका शाटकमिति ततः कर्मधारये स्थूलशाटकोपि त्रिलिंगः। अश्वत्थ शाथ
शिखि शाखि वराशिरात्रिवेशंतशांत कुशकौशिककाशदेशा इत्युष्मविवेकाद्वराशि
स्तालव्यशः। वरासिः स्यात् खड्गवरो वरासिः स्थूलशाटक इति दंत्यांतेषु रभसाद्दंत्योपि

हेस्थूलवस्त्रस्य। नीतिचुलसमुच्छ्रायेनिचोल्यतेसमुच्छ्राय्यतेऽवगुंठ्यतेवानेनघञ् निचोलः।
प्रकर्षेणाच्छाद्यतेनेनघञ्कादेर्घ इतिह्रस्वः प्रच्छदः पटेनसहकर्मधारयः। निचुल इति द्विरूप
कोषेह्रस्वमध्योपिनिचोलंतुनपुंसकमितिरभसात् स्त्रीवेपि। स्त्रियांनिचोलीत्यपीतिराज
देवः। स्यूतेनास्यूतेनवायेनवस्त्रांतरंपिधीयतेतस्यहे। सेतिरमणेरत् क्विप्यनुनासिकलोपे
रत इच्छातांलातिकः रल्लस्ततःस्वार्थेकः रल्लकः। काम्यतेऽसौकमेर्णिङ्ताहृषादित्वात् क
लच् वुगागमश्चकंवलः रल्लकादन्योपिकंवलइतिसुभूतिः। द्वे कंबलस्य। अंतेतिअंतरमु
ध्येभवंविद्यमानंगहादित्वाच्छः अंतरीयं। उपआप्यसंवीयतेंऽगमनेनल्युट् उपसंव्यानं
परिधीयतइदमितिकर्मणि ल्युट्परिधानं। अधोदेहभागस्यांशुकमधोंशुकं। चत्वारिप
रिधानवस्त्रस्य। द्वाविति प्राव्रियतेनेनकरणोहरणोतेराच्छादनइतिघञ् उपसर्गस्यघञि

तिदीर्घः प्रावारः। उत्तरस्मिन्देहभागे वामपार्श्वे आसज्यते कर्मणि घञ् उत्तरस्मिन् ऊर्द्ध्वदेहभा
गे आसज्यत इति वा उत्तरासंगः उत्तरशब्दो वामपार्श्ववचनो पि यथा उत्तरे वास्य सौवर्णेलन्द्र
पार्श्वे भविष्यतीति वनपर्वणि जंतूपाख्याने उत्तरो वाम इति तट्टीकाकृता विहितं बृहत्या
आच्छादयन इति कन् बृहतिका बृहती वसवोत्तर इति मेदिनी। बृहत्येव बृहतिका। संवीय
ते नेन ल्युट् संव्यानं। उत्तरस्मिन्नूर्द्ध्वदेहभागे भवं विद्यमानं गहादित्वाछः उत्तरीयं। पंचोपरि
धानवस्त्रस्य। चोल इति चोल्यते ऽवगुंठ्यते चुल समुच्छ्राये घञ् चोलः। गौरादित्वात् ङीष्
चोली च। कूर्परः कफोणिर्जानुवद्द्वयमस्य ते न्हिष्यते ऽत्र स्वार्थे कन् कूर्पासकः दृषो
दरादिः। कूर्परः स्यात् कफोणौ च जानुन्यपि च पुंस्ययमिति मेदिनिः। कूर्पासस्त्वर्द्ध
चोलक इति हारावली। स्त्रिया इति विशेषेणोक्तं पुंसो प्येतावुपमानादिति सुभूतिः द्वे

५२

स्त्रीपुंसकंचुलिकायाः। नीतिहिमानिलनिवारणे प्रावारे पटीकंबलादौ नीशारः। शॄ हिंसायां। नि
शेषेण शीर्यते हिमवातावत्रेति शृणातेर्वा युवर्णनिवृत्तेत्यिति घञ् उपसर्गस्य घञ्यदीर्घः नी
शारो मध्यमतल्लजः। एकं। अर्द्ध इति ऊरोरर्द्धमर्द्धोरु ततस्यत्वात्मंचाः क्रोशंतीतिवत् वस्त्र
मप्यर्द्धोरु ततः कन् ऊर्वोरर्द्धमर्द्धोरु तावत्रस्तः अर्द्धाद्यादित्वात् ठनिर् सुसुक्तांतादितिठस्य
कादेशेवा अर्द्धोरुकं। वरस्त्रीणामुत्तमस्त्रीणां यदर्द्धोरुकमंशुकं वस्त्रं तदर्द्धं जातकं चंडंती
ब्रमत तिगवुल्त्र्त्रन्वा। अर्द्धोरुकं वरस्त्रीणां वासश्चंडातकः स्मृतइति मुस्कांडे वोपा
लितात् पुंलिंगोपि। एकं वरस्त्रीणामर्द्धोरु पिधायकस्यचलनाकारेण परिहितवस्त्रस्य
स्येति प्रथमं गतं ज्ञातं पदमत्र प्रपदं पादाग्रं तत्पर्यंतं प्राप्नोति आप्रपदं व्याप्नोतीति खः
आप्रपदीनं। हिशब्दोवधारणे तदेवाप्रपदीनमित्यर्थः। एकं पादाग्रपर्यंतलंबमानस्य

रा.मु.
१८२

वस्त्रादेः। अस्त्रीति विशेषेण विशेषाद्यातपादिवारणाय वा तन्यत इति घञ् वितानः। उत्ऌ
ईल्लोच्यते दृश्यते उल्लुच्यते ऽपनीयते आतपादिर्वा नेन घञ् लोचेऽस्त्रौ राद्दिकस्य दीक्षर्थ्य
स्यपन्हो ऽर्हल्लोचयत्सुपरिदीयते पवाद्य विवा उल्लोचः। वंड्डातपो घत्र। द्वेवं ड्डातप
स्य। दूष्यति दूष्यते वेष्टनरूपां विकृतिं प्राप्यते दुष्यैः कृत्ये ण्यं ता दन्चोयत उपधायाऊत्
दूष्यं दीर्घमध्यं। आधशब्दात् कुटरपटकुटीपटवासादिग्रहः। एकं। प्रतीति प्रतिसिनो
तिप्रतिव भ्राति वेष्टयत्याहरणो तिवाम्बुसि विमीनां दीर्घश्चेतिरः दीर्घत्वं वटाप्रप्रतिसी
रा। कृत्स्नं कुसुंभ कुस्तूलौ प्रतिसीरा तस्करासारा इत्सूक्ष्मविवेकाद्दंत्यमध्या। जुः सौत्रो धा
तुः जवंत्यन्नल्युदृ स्वार्थे कन् जवनिका। जवनिका वनिकांति ह्रदान्तते तिकल्पिकेणा म्युद
यमकादंतस्य वकारमध्या च वर्गतृतीयादिः। यमनिकांतस्यादिः पवर्गपंचममध्या

रम
१८२

तिर्दीर्घः प्रावारः। उत्तरस्मिन्देहभागे वामपार्श्वे आसज्यते कर्मणि घञ्। उत्तरस्मिन्नूर्ध्वदेहभा
गे आसज्यत इति वा। उत्तरासंगः उत्तरशब्दो वामपार्श्ववचनोपि यथा। उत्तरे वास्य सौवर्णे लिन्नम्
पार्श्वे भविष्यतीति वनपर्वणि जंतूपाख्याने। उत्तरो वाम इति तट्टीकाकृता विहितं बृहत्या
आच्छादयत इति कन् बृहतिका बृहती वसनोत्तर इति मेदिनी। बृहत्येव बृहतिका। संवीय
तेनेन ल्युट् संव्यानं। उत्तरस्मिन्नूर्ध्वदेहभागे भवं विद्यमानं गहादित्वाच्छः उत्तरीयं। पंचोपरि
धानवस्त्रस्य। चोल इति चोल्यते ऽवगुंठ्यते चुल समुच्छ्राये घञ् चोलः। गौरादित्वात् ङीष्
चोलीच। कूर्परः कफोणिर्जानुवद्वयमस्य तेन क्षिप्यते ऽत्र स्वार्थे कन् कूर्पासकः छेषो
हरादिः। कूर्परः स्यात् कफोणौ च जानुन्यपि च पुंस्ययमिति मेदिनिः। कूर्पासस्त्व ह्री
चोलक इति हारावली। स्त्रिया इति विशेषणोक्तं पुंसोप्येतावुपमानादिति सुभूतिः द्वे

द्वेस्थूलवस्त्रस्य। नीतिचुलसमुच्छ्राये निचोल्यते समुच्छाद्यते ऽवगुंठ्यते वानेन घञ् निचोलः। प्रकर्षेण छाद्यतेऽनेन घञ् छादेर्घे इति ह्रस्वः प्रच्छदः पटेन सह कर्मधारयः। निचुल इति द्विरूपकोषे ह्रस्वमध्योऽपि निचोलं तु नपुंसकमिति रभसात् क्लीबेऽपि। स्त्रियां निचोलीत्यपीति राजदेवः। स्यूतेनास्यूतेन वा येन वस्त्रांतरं पिधीयते तस्य द्वे। सेतिरमणे रत् क्विप् अनुनासिकलोपे रत् रल्लानां लाति कः रल्लस्ततः स्वार्थे कः रल्लकः। काम्यते ऽसौ कमेर्ण्यंतात् हृषादित्वात् कलच् बुगागमश्च कंबलः रल्लकादन्योऽपि कंबल इति सुभूतिः। द्वे कंबलस्य। अंतेति अंतरमूध्वे भवं विद्यमानं गहादित्वाच्छः अंतरीयं। उपव्याप्य संवीयतेऽनेन गमनेन ल्युट् उपसंव्यानं परिधीयत इदमिति कर्मणि ल्युट् परिधानं। अधो देहभागस्यांशुकमधोंऽशुकं। चत्वारि परिधानवस्त्रस्य। द्वावितिप्रावियतेऽनेन हृञो हरणो ते रा छादन इति घञ् उपसर्गस्य घञि

चयमयतिश्रंतस्यमध्यस्ययमयतिउपरमयतिल्युट्कनटाप्इत्वेचयमनिका।तिरोंतर्धा
नंकरोतिकृञोरिनिरितियोगविभागाहिनिःतिरस्करिणीतिपुरुषोत्तमः।तिरस्क्रियतेनये
तिल्युडितिरस्करिणीतिसुभूतिः।तिरोंतर्धौतिर्यगर्थेइत्यमरः।त्रीणिअवधायकपद्याः
कांडपटस्येत्यन्यइतिसुभूतिः।पेतिश्रंगानांयः संस्कारः स्वेदादिक्लतदौर्गंध्यहरणाय
शोभायैववंदनादिनागात्रोद्वर्तनानुलेपनादिस्तत्परिकर्मपरिसर्वः कारोणिः शरीर
शोभाधानेवर्तितेपरिष्करणंपरिकर्मकरोतेःशर्मवन्मनिन्।प्रतिकर्मेतिक्वचित्पाठ
इतिसुभूतिः।हेकुं कुमादिनाशरीरशोभाधानरूपसंस्कारस्यरत्नानोद्वर्तनादेरितिरत्ना
मी।स्पेतिमृजुमृद्दौवसेत्तिरितिवाहुलकात्वृत्तिः मृजेर्वृद्धिस्त्रमार्ष्टिः।मृजेष्योरादिका
णंपतात्न्यासमृश्रंयोयुजितियुज्माजैना।भिदाद्यङि मृजा।मृजेरजादौसंक्रमइति

रा॰मु॰
१८३

ह्रद्दौ मार्जो वधमर्थे केवावे द्विसम्मार्जिष्णुन्हेति कुमारः। त्रीणि प्रोञ्छनादिनोऽङ्गनिर्मली
करणमात्रस्य। उद्वेति उद्वर्त्यते उत्साद्यते मलमनेनेति ल्युट् उद्वर्तनोत्सादने। द्वे उद्वर्तन
द्रव्येणाङ्गनिर्मलीकरणस्य उवटण इति ख्यातस्य। आप्लवेति आप्लवनमाप्लाव इति विभाषा
ङि रुप्लुवोरिति वा घञ् पक्षे ऋदोरप्। भावे ल्युट् स्नानं। त्रीणि स्नानस्य। वर्चेति वर्चनं च वी व
र्च दीप्तौ वर्च्यते ऽभ्यस्यते वर्चस्त्वध्ययने वा। क्विंति पूजिक थिकुं विचर्च श्वेत्यङ्। वाहुल्याद्
रोगाख्यायामपि वहुलमिति ण्वुल् टाप् इत्वं च वर्चिका ततः स्वार्थे ष्यञ् चार्चिक्यं। विरं निष्ठ
ति तिष्ठते वा यस वद्रस वत् स्थासः स्थास एव स्वार्थे कः स्थासकः स्थानं स्था। स्थितिस्तया आसय
ति दीपयति देहं त्रसग तिदीप्त्यादानेषु रायंतात् ण्वुलि वा स्थासकः। त्रीणि वंदनादिना
देहविलेपनविशेषस्य। अथेति प्रबोधयति। स्थितमेव गंधं जागरयति प्रपूर्वाद् बु

राम
१८३

धेर्वाकुलकात्कर्त्तरिल्गुड्प्रबोधनं। अनुपश्चाद्बोधयति अनुबोधः। हेन्द्रनपूर्वगंधस्यप्रयत्नविशे
षेण पूर्वसौगंध्यापादनस्य। पेतिपत्राणांपत्राकृतीनांलेखा। कार्यलक्षणायां ऽगुलिव्यापारे ऽगु
लिः पत्रार्थोंगुलिव्यापारोत्रपत्रांगुलिः। पत्रावलीपत्रवल्ली पत्रमंजरीत्यादयोप्यत्र। समेइतिप
त्रांगुलेः पुंस्त्वनिवारणाय। हेस्तनकपोलादौ कस्तूरिकादिरचितपत्रावल्याः। तेतितमालपत्रा
कृतित्वात्तमालपत्रं। तिलपुष्पाकृतित्वात्तिलकं प्रागुक्तं। नानावर्णजत्वाच्चित्रयति चित्रचित्र
क्रियायां पूर्ववत्ण्वुल् चित्रकं। नानावर्णैसातिशयं विशिनष्टि विशेषकं। तिलकभेदाएते प
र्यायत्वं त्वल्पांतरत्वादितिस्वामी। तमालोपितमालस्तिलके खड्गइतिविश्वात्। चत्वारिललाट
कृतस्यतिलकस्य। एतन्मध्येद्वितीयतुरीयेतिलकविशेषकेन। स्त्रियांनपुंसकेइत्यर्थः। अथे
मिकुमितिकोतिशङ्कायतेवा कुलकादिविप्रुषीत्यादिनामकः कुंकुमं ष्पोहरादिः। कशेः सौत्रा

ङ्कंभीरादयश्चेतीरनस्तुडागमश्चकश्मीरः कश्मीरावश्पयोरित्युष्मभेदान्मध्यनालव्यः कश्मीरदे
शेजन्मास्यकश्मीरजन्म। अग्निशिखशिखाकेशरोऽस्यअग्निशिखं। ब्रियतेदेवादिभिरपिप्रार्थ्य
तइतिग्रहहट्टहनिश्चीत्यपूर्वं। कश्मीरजंवह्निशिखंवाह्लीकंपीतनंवरमितिवाचस्पतिः। वर्ह
वन्तूहप्राधान्येइरितिइः वह्निः नाम्नियावादिभ्यः कन्वह्निके [illegible] केपश्चिमदेशेभवंकच्छा
घणअन्येषामपीतीकारस्यवादीर्घः। वाह्लीकंवाह्लिकंधीरहिंगुनोर्ना ऽश्मदेशयोरिति
त्रिकांडशेषः। वरवाह्लीकमित्येकंपदमित्यन्ये। काश्मीरंचारुवाह्लीकंसंकोचपिशुनंवर
मितितंत्रांतरेपाठात्वार्वर्ष्यस्यनाम। पीतयत्यंगंनंद्यादित्वाल्ल्युः पीतोवर्णोस्यास्तिपामा
दित्वाल्लप्रत्ययेवापीतनं। रंजनाद्रक्तं। अतएवास्त्रकुसंज्ञमितिस्वामी। संकुचतिसंकोचप
तिवावर्णांतरंसंकोचंपचाद्यच्। पिशअवयवेपिशिविशोः किच्चेत्युनन् पिशुनंपिशुनय

तिस्तूचयतिव्यंजयतिगलद्दव्यांतरंसौरभंणपनात् पचाद्यच् पिशुनंरक्तपर्यायःस्तवकपर्यायश्चास्य
नामेतिसुभूतिः। संकोचस्यपिशुनंसूचकमितिस्वामी। धीरंस्थिररागमितिचसः। लौहित्यजननात्
लोहितचंदनं। एकादशकुंकुमस्य। रंतिराजतेभ्हत्वदीतिवा हुलकात्सः रान्ताकपित्थि
कात्वात्वंलान्तालन्त्र्यतेदृश्यतेऽचपनेवालन्तदर्शनांकयोः मिदादिपाठादङ्‌ दृश्चिश्वर ल
योरेकत्वस्मृतेवीरान्तालान्तारन्ताच। लान्तायांरन्तएरन्तेतिरुद्रभसौ। जायतेवा हुलकात्
जनेस्तक्रुश्चात्वाभावश्चजतु। धूयतेमिश्रीभूयतेनेन अश्वयवःप्रशाद्यणियावः वाहुलका
त्घञिवा। रञ्जेः कर्मणिक्तप्रत्ययेरक्तः नरक्तोऽरक्तः अतएवरक्त इत्यर्थः कपित्थिकादित्वा
त्वेऽलक्तोऽजादिः अधरेष्वलक्तकइतिमाघात्। नलक्तोदुर्गंधत्वान्तकेनाप्यास्वादि
तोरकलकश्चास्वादनेक्तप्रत्ययेवा। द्रुमाणांवर्दराश्वत्थादीनामामयोरोगः द्रुमामयः॥

षट्लान्तायाः। लेति लूयते वयनेन छिद्यते वा हुलकात् पतेरंगाजित्यंगवूलवंगं। देवयोग्यकुसुमत्वात् देवकुसुमं। श्रीसंज्ञं लक्ष्मीपर्यायनामकं। त्रीणि लवंगस्य। अथेति जयति पुष्पांतरसौरभमभिभवति जिज्ञ अभिभवे तद्धिंसकत्वात् जायकं एवुल्। कालो वर्णभेदो दृश्यते ऽत्र शोषइति ठः कालीयः ततः स्वार्थे कनू कालीयकं कालिमेतद्दर्थं कुर्वति कालेयं गंध इत्य मिति भोजराजः सर्वत्रान्निकलिम्या मितिठकू। कालीयकं च कालेयं वर्णकं कांतिदायकमिति व्याडिरिति माधवी। क्वचित्कालेयकमिति च पाठः। कालस्य कृष्णस्य इत्यस्यानुसार्थ्ये सदृशीकरणीयं अत्र तु पूर्वोग म्यर्थः साहश्यार्थः नमन्वेत्यनुवभ्रानीत्यादिना साहश्यस्य वकप्रस्तावे दंडी। त्रीणि कान्तियइति ख्यातस्य। अथेति वमत्युद्गिरति निर्यासं सौरभं वा डु वम उद्गिरणे हस्त्ववमि कुम्यः शकृत दंतात्क नि टापीत्वेवं शिकावंशो त्रात्ती निठन् वंशिकं वंश इव वंशकं स्त्रीवंद्वेष तिक्तनावि

रम
१८५

तिकन्निति तु स्वामी।राजार्हं वंशिकं न तं वनद्रुमः परमहो वंशकं लोहनामकमिति वाचस्पतिः।लघु
नामत्वात् न गुरु अगुरु लघुपर्यायं अविद्यमानं गुरु महत्स्थाप्यमस्मादिति वा।कुस्कं वुरुकध
न्याकमगुरुर्वा पुंसि लघुनाम चेति बोपालिनः।राजानमर्हतीत्यर्ह इत्यच् राजार्हं।लूयते लोहं लू
जो हरतीति हः।कृमिभिर्जन्यते ऽन्येभ्योपीति डः कृमिजं।जुंगति वर्जयति दौर्गन्ध्यं जुंगि वर्जने वर्गा
दिः वा हलकौ वुन्गुणौ दुराहरत्वात् कातरैर्जुंग्यते र्म्यज्यते वा जोंगकं।षट् सामान्येनागुरु
काष्ठस्य।केतितदेवागुरु कालं कृष्णं कालागुरु अगुरुः स्यात् कालागुर्वपि अगुरु स्मृतइति
सुभूतिः।द्वे कृष्णागुरुणः।तद्वितीयरगुरुर्मल्लिर्मल्लिकातद्गंधितन्मंगल्यास्यात्मंगले सा
धुरितियत् एकं।येतियन्त्राण् धूपयति अरण्यन्त्र धूपः।सर्जस्य सालस्य रसो निर्यासः सर्ज
रसः द्विहंत्यः।नरातिन हदातिक ष्टमितिनअन्न पूर्वान्नुरातेर्हवादित्वात् कलत्र अरालः।राति

रा॰मु॰
१८६

त्रीतिं रालइतिस्वामी। अरालः सर्जवक्रयोरितिरभसः। रालः सर्जरसोऽरालो धूपको वह्निवल्लभ
इतिरभसः। सर्वेषां रसोऽनुरागोत्र सर्वरसः। वर्णभेदाद्बहुनिरूपाण्यस्य बहुरूपः। पंच धूप
स्य। अथेतिशीघ्रसंचारिगंधत्वात्तद्धकइव धूपोहृक्कधूपः। बहुगंधकृतत्वात्कृत्रिमश्चासौ
धूपश्चेति कृत्रिमधूपकः। केनानासुगंधिकृतस्य दशांगादिधूपस्य। स्वामी तुद्वे तुरुष्कप
र्यायमेवाह। त्विति तूर्यते हिनस्ति रोगं गर्धं तुरी त्वरणहिंसयोः बहुलमन्यत्रापि सिवत्य
येसंज्ञायां कनि तुरुष्कः यवनदेशजत्वाद्वा। पिंडतिहूरंगच्छति गंधोस्य पिंडिगतो अत्र
स्वार्थे कः पिंड्यते आवर्तादिना संहती क्रियते पिंडिसंघाते घञि वा पिंडकः। सहते
सुखोपभोगं सिह्लकः पृषोदरादिः। यवनदेशजत्वात् यावनोऽतस्यादिः या तते इ लां
तरेण मिश्री क्रियते युमिश्रणेऽगंधनात् कृत्यल्युट्इतिल्युटि वा। चत्वारि सिह्लकारव्यसु

१८६

गंधिइवास्य। अथेति दुग्धसमानत्वात् पय एव पायसः स्वार्थेऽण्। सरल इव रूपस्य पय
सः क्षीरस्य विकारत्वाद्वा॥ सरल इवः श्रीपिष्टो दधिक्षीर घृताक्तयइतिरभसः। श्रीणांवा
सोगृहं श्रीवासः वासयति सुरभयति वासः अथ श्रीणां वासः श्रीवास इति वा। श्रीवेशरवना
शो भा भारतीसरल इव इति विश्वः। वृकः स्यात् कृत्रिमेऽनेकधूपेति सरल इव इति रभसः। धू
प्यतेनेन धूपः वृकनामा धूपो वृकधूपः। श्रीः सरल इव तस्य पिष्टेन चूर्णेन जनितत्वात् श्री
पिष्टः। सरलस्य इवः सरल इवः। पंचसरल इवस्य। मृगेति मृगस्य नाभिर्मृगनाभिः सा
ह चर्यात् पुंलिंगः। मृगस्य मदो मृगमदः। कसति विकसति। सोगंधमस्याः वाहुल्यात्
खर्जाघुरत्वं तुकु चागमः गौरादिङीषि कस्तूरी। मृगनाभिर्मृगमदो मृगः कस्तूरिका चे
ति माधवः। मृगोप्यत्र। मुरभरा इन्द्रा त्रियेनाभिः पुंसि स्त्राण्यपंगके द्वयोः। चक्रमथेत्र

धानेचस्त्रियांकस्तूरिकामहइतिरभसात्नाभिरप्यत्र।महोप्यत्रमहोरेतसिकस्तूर्य्यामितिमे
दिनिः। त्रीणिकस्तूर्य्याः। अर्थेतिकुल्लतिसंस्त्यायतिकुलसंस्त्यानेञ्चलितिकसंतेभ्योण
इतिणः ततःस्वार्थेकन्एवुलिवाकोलकं। कक्कंतेत्रसंपहादित्वात्क्विप्ककलोल्पेक
कुवततकोलंचेतिकक्कोलंस्वार्थेकनुकक्कोलकं। कोषात्फलमस्यकोषफलं। त्रीणिका
कोलइतिख्यातस्य। अर्थेतिकल्पतेसुखवर्गोदूलादिसौरभातिशयकरणायकृपेःखर्जादि
त्वात्दूरःकर्पूरं। घनोदृढःसारःस्थिरभागोस्यघनसारः। घनःसांद्रेदृढेदार्ढ्यइतिविश्वः।
चंद्रसंज्ञःचंद्रपर्यायनामा। सिताभ्रमिवशुक्लत्वात्सिताभ्रः। सिताशुक्लाभाद्युतिरस्ये
तिसिताभइतिचपाठः। हिमाशीताचासौवालुकाचेतिहिमवालुकासेवतथा। रेणुका
वणिकर्पूरंचंद्रभस्महिमाह्वयमितित्रिकांडशेषः। पंचकर्पूरस्य। गेतिगंधोगंधातिशयवा

गोशी॰ चं॰

न्सारः स्थिरभागोस्य गंधसारः। मलयगिरिभवत्वान्मलयजः। भद्राश्रेष्ठाश्रीः शोभास्य भद्रश्रीः
हन्ति जात्यंतरे भद्रो वाप्यव कृष्णसाधुनोरिति विश्वः। चंद्यते आह्लाद्यते नेन ल्युट् चंदयति वानं
द्यादिः चंदनः। वेध्यकोमालयस्कस्या क्षीरखंडो रौहिणाख्य स इति त्रिकांडशेषः। चत्वारि श्वेतचंद
नसामान्यस्य। तैलेति तिलस्येव पर्णमस्येति तिलपर्णी हरिचंदनभेदः तत्रो जातं तैलपर्णिकं। गो
शीर्षं तदाकारे मलयैकदेशे जातं गोशीर्षमिति सुभूतिः। धवलं सुशीतं चंदनं तैलपर्णिकं
मलयाद्रिदेशजमेव कालनाम्नयामि श्रवणमुत्पलगंधि गोशीर्षमिति चारणकपटीके ति
माधवी। अतिसुरभिशीतलतया सदैव सर्पैर्वेष्टितमिति सुरभिचनामास्येति सुभूत्याद
यः। हरिमंडूकस्तदाकारे पर्वतभागे जातत्वात् हरि कपिलं तद्वर्णत्वाद्वा हरेरिंद्रस्य चं
दनं वा हरिचंदनं। यत्तु रक्तचंदनाकारं पत्रांगं तद्दैश्यवर्गे वक्ष्यत इति सुभूत्यादयः।

रा॰मु॰
१८८

चंदनविशेषाणां पृथक्‌ष्टमक्‌। तिलेति तिलस्येव पर्णानि पत्राण्यस्याः पाककर्णेत्या
दिना ङीष्‌ तिलपर्णी। पत्रमेवांगमस्य पत्रांगं। पत्रंगमपि हश्पतङ्गि शाद्विकाः। स्वामी
तु पतंगमाह। शोवेस्तु बोधे। गंधहीनत्वात्‌ कुत्सितं चंदनं कुचंदनं। बत्वारि रक्तचंद
नस्य। अथ्येति जात्याः कोषो जातीकोषः जातिकोश्यांताव। जातीच नामास्य जातिर्जा
तीफले पिवेति रभसः। कोषोऽप्रकोपेशस्यां पात्रे जातिकोष इति तु रभसः। फलमस्य
नाम फलं वाभे जातिकोषिवाणांऽग्रेफलके पिवेति रुद्रः। हे जाइफलं इति ख्यातस्य।
केति कर्पूरादिभिः समभागैर्यक्षप्रियः कर्दमो बहुगंधद्रव्यसाधितानुलेपनभेदः
यक्षकर्दमः। कर्पूरागुरुकस्तूरीकक्कोलत्वघुसृणानि च। एकीकृतमिदं सर्वं यक्ष
कर्दम इष्यत इति तु व्याडिः। कुंकुमागुरुकस्तूरीकर्पूरं चंदनं तथा। महासुगंधमि

राम
१८८

न्युक्तंनामतोयन्तुकर्द्दमइतिधन्वंतरिः।एकं।गेतिगात्रमनुलिप्यतेऽनयाकरणेल्युट्
गात्रानुलेपनी।वर्तयंतिसम्यक्चूर्णीकुर्वंतिनामितिवा तूलकाद्युजपवादः ण्यंतात्क्ति
र्वर्त्तिः यद्वावृतुञ्वरः तदाकृदिकारादितिङीषिवर्तीच।वर्णंकरोतीतिण्यंतात्ण्वुल्
वर्णकं।विलेपनंकरणेल्युट्।वर्णकःपुंस्यपिसुरतविलासिनांवर्णकोस्त्री।इतिमा
घः।चत्वारिगात्रानुलेपनयोग्यस्यपिष्टस्यघृष्टस्यवासुगंधिद्रव्यस्येतिमाधवाद
यः।रभसकोषेतुवर्तिविलेपनयोर्भेदएवगात्रानुलेपनीवर्तिर्विगंधमथविलेपनं।
वर्णकंचाथविच्छित्तिः स्त्रीकषायोंगरागकइतिएतन्मतेएवद्वेगात्रानुलेपनयो
ग्यस्यवर्त्तिनविलेपनस्यवर्णकादिद्वयंघृष्टचंदनादिविलेपनमात्रस्येतिसुभूत्या
द्यः।च्वितिचूर्ण्यतेप्रेर्यतेवर्णचूर्णप्रेरणेघञर्थेकः चूर्णानि।वासेसुरभीकरणे

युज्यतइतिवावास योगः। द्वेपटवासादिन्होहस्य। भेतिभाव्यते आप्यतेमेल्यतेपुष्पा
दिनावासितेवासितमित्येके। द्वेसुगंधिद्रव्यवासितस्य। समितिगंधमाल्यधूपादि
भिर्वस्त्रतांबूलादीनांयः संस्कारः सौरभाधानंतदधिवासनंवास उपसेवायांचुरादिणि
चोऽनित्यत्वल्युडितिसुश्रुतिः। एकं। मेनिमूर्ध्निमूर्द्धाधिकरणकंमल्यतेधार्यतेनेत्रह
लोरयितमालेवमाल्यंस्वार्थेष्यञिवा। मांलन्हंमीलातिआनइतिकः टापिमालाअन्य
त्राप्युपचारात्। स्रजंतिनांमालिकाइतिस्रक्कृत्त्विगादीसाधुः साहचर्यात स्त्रीत्वंत्री
णिमालायाः। केशेतिमाल्यमेवकेशमध्याधिकरणकंगर्भइवकन्गर्भकः। एकं॥
प्रेतितदेवमाल्यंशिखानच्छूडानोलंबमानंभ्रनुशधातोरादिकर्मणिक्तः भ्रष्टः क
नुभ्रष्टकं। एकं। पुरइतितदेवमाल्यंपुरः संमुखभागेन्यस्तंललाटपर्यंतमागतं

ललामं तिलकमिव इवार्थे कन् ललामकं।एकं।प्रेति।देवमाल्यमर्थात् कंठाद्दृल्लं वु
मानं प्रालंबं आङ् पूर्वो लंबि अवस्रंसने प्रालंबं।एकं।वैकेति।उरसि यज्ञोपवीतवत्तिर्यगनृदुह्नि
प्तं तद्वैकक्षकं विशिष्टः कक्षो भुजमूलमस्माद्विकक्षमुरस्तनोभवार्थे एणं तात् स्वार्थे क
च वैकक्षकं।एकं।शीति।शिखायां हि पीडं शिखाधिकरणकं वा माल्यं आपीडयति शिखां
पीड अवगाहने पचाद्यच् आपीडः।शेते शिरसि पृषोदरादित्वात् शिकारस्य खकारे स
लोपे च शेखरः।द्वे शिखास्थितमाल्यसामान्यस्य।रेति।रच प्रतियत्ने चुरादिर्ण्यंता म
सग्रंथो युजिति युच् रचना।परिस्पंदं तेनयन मनोस्यात्रा अधिकरणे घञ् स्पंदेः परिस्पंद
इति च पाठः लक्षणाभावाल्लघुत्वं भोगः।द्वे।उपेति उपधीयते आरोप्यते शिरोत्रेत्यधिक
रणे ल्युट् उपधानं।उपबर्ह्यते उद्यम्यते शिरोत्रेत्यधिकरणे घञ् उपबर्हः।द्वे।शेतिश

रा.कु.
२९.

य्यतेऽत्र शीङ्ः संज्ञायां समाननिपदनिपतमनविदषुञ्शीङ्भृञिणइति क्यप्। अयङ्
यि क्ङितीत्ययङ्। टाप्। शय्या। कृत्यल्युटो बहुलमित्यधिकरणेऽनीयः शयनीयं। ल्यु
टि शयनं। त्रीणि शय्यामात्रस्य। मेति मविधारणे पचाद्यच् मंचः अन्यत्रापि उपचारात्
परिसर्वतोभावे नाशोऽच्यते विक्ष्यतेऽयमिति कर्मणि घञ्। परेऽश्रघांक मोरि तिवा लत्वं
पर्य्यंकः पल्यंकः। खट्यते आकांक्ष्यते शयनार्थिभिरसौ खट कांक्षे अशिखघटिवि
शिभ्यः क्वः इति क्वप्रत्ययः टाप् खट्वा च त्वारि खट्वायाः। गड् इति गडुः तुल्लत्वादिं उ
प्रतिकृतिं कन्दुगें दुकः पृषोदरादिः। कंद्यते आहूयते क्रीडार्थिभिरथवा दुलकात्
भृष्ट इत्यादिना उः कंदुः ततः स्वार्थे कन् कंदुकः कंखुखंदयतेददाति वा मित्रघा दि
त्वात् ह्रस्वः ततः स्वार्थे कनि वासगृहं क्रीडास्थानं तत्र युवतीभिः सह क्रीडार्थं गेहूका

राम
२९०

दिरपेक्ष्यनइतिशय्यात्रस्तावेऽस्याभिधानमितिनाप्रस्तुतोक्तिशंकाद्वेगंडुकस्य। दीतिदीप्यतेनेनेति
घञ्दीपयतिवाइगुपधत्वात्कः पवाघञ्वाअन्येभ्योपसर्गनिहृत्यर्थप्रवृत्वंमेरुसुमेरुवद्वा
धात्वर्थानुवर्तकोत्रप्रशब्दः दीपस्तुस्नेहाशः कज्जलध्वजः। दशेधनोगृहमणिर्दीषानिलक इ
त्यपि। शिखावानरुदीपहृन्नोज्योत्स्नाहृन्नोथलोचकइतित्रिकांडशेषः। दृप्रदीपस्य। पीतिपी
यतेउपवेशनेनांतर्धीयतेपीडोवाहुलकष्ठः पीठंपिठतिहिंनस्तिश्रमंपिठहिंसायांइगुपधेन्या
दिनाकेऽन्येभ्योपिदृश्यतइतिदीर्घत्वेवा। विष्टरः पीठमस्त्रियामितित्रिकांडशेषात्पीठइ
तिच। आस्यतेउपविश्यतेनुकरणाधिकरणयोश्चेत्यधिकरणेल्युट् आसनं। दृआसनस्य
सितिसमुद्गच्छतीत्यन्येष्वपीतिडः डित्करणसामर्थ्यादभसंज्ञस्यापिटिलोपः ततः स्वा
र्थेकः। [illegible] समुद्गकः उङ्गेईकारोपधपन्नेसमुन्न्यतेआरोप्यतेभन्नादइव्यमत्रहल

रा॰मु॰
१८१

न्यधिकरणे घञि वा। संपुटति इग्वैः संश्लिष्टो भवति इगुपधेत्यादिना कः ततः स्वार्थे कन् संपुट
कः क्कुन् शिल्पिसंज्ञयोरिति क्कुनि वा। ह्वे संपुटस्य। प्रतिग्रतिगृह्णाति चर्वितद्रव्यं ग्रहो विभाषेति
णः प्रतिग्राहः। गृह्यते नेनेति ग्रहः ह्वः हृत्यादिना पिग्रहः पततो ग्रहः पतद्ग्रहः। ह्वे पडिगह इति ख्या
तस्य। प्रसाध्यते ऽनया ल्युट् प्रसाधनी। कंकति चलति कंकि लौल्ये वा कुलकात् स्थ ज्ञो ऽतव्
कंकतं गौरादिः ततः स्वार्थे कन् के ऽण इति ह्रस्वत्वे टापि कंकतिका कस्य शिरसो ऽकाः कंकाः के
शाः पूर्ववत् पररूपत्वं कंकेष्व तति के ऽण इति ह्रस्वत्वे टाप्यत दिवा क्कुन्। कंकती तु प्रसाधनी
ति त्रिकांडे ऽमरमाला। कंकतं तु प्रसाधनमिति क्लीवकांडं च। ह्वे कांकयी तिख्यातायाः। पीनि
पिष्टेन कुंकुमादिना ऽनतिपवाद्यच् पिष्टातः। पटो वास्यते नेनेति घञ् ततः कन् पटवासकः।
ह्वे पटवासस्य। हेतिहर्षयति हर्षयति हृष हर्षेणमोचनयोः नंद्यादित्वाल्लुः अहूकुपूवादिनाए

रा॰म॰
१८१

त्वं दर्पणः। आदर्शो दर्पणः प्रोक्त इत्यमरमाला॥ किं तद्दर्पणमस्ति यत्र सकलमिति धर्मसेनः। अतः स्त्री

त्वमपि। मंकति मंडयति मकि मंडने मकुरः दर्दुरादिति कुरच् मलोपो मुकुरोऽप्यत्र मोन्हा णो मुंवति स्पोति।

मुकुरो ह्युकारवांश्च। मकुर इति तु स्वामी॥ तेनात्ररूपत्रयं। आदृश्यते रूपमत्र आदर्शः हलश्चे

त्यधिकरणे घञ्। त्रीणि दर्पणस्य। अतिमज्जति वा युनाऽयोजनं वेत्यनेनेति ल्युट् इव हुल्लं संज्ञा छंद

हसोरिति वक्तव्यमिति नवी भावः। व्यजनं व्यज्यते विशेषेण चल्यते वातोऽनेनेति वा करणे ल्यु

ट्। तालवृंतं न विकारत्वात्। तालस्य वृंतं घटधारे वशैत्यजनकत्वात्तालवृंतं इवार्थे कन् तालवृंतकं। वृंतं प्रसवबंधे स्याद्घटधाराकुचाग्रयोरिति विश्वः। अन्यत्रापि व्यजनमुपचारात्॥

द्वे व्यजनस्य॥ ॥इति मनुष्यवर्गविवरणं समाप्तं॥ ॥सामान्यतः सांगानुसोपकरणान्म

नुष्यादीनभिधायेदानीं ब्राह्मणादयो विशेषा वाच्यास्तेषां चाचारतो भेदः स च कुलभेदकृत

इति प्रथमं कुलपर्यायं जकुमारेभे। कुलं च विद्यया जन्मना वाऽप्राणिनामेकलक्षणः सं

तानोवंशाइतिजयादित्यः तत्रजन्मकृतसंतानमाह संततिरिति संतन्यते संततिः कर्मणि क्तिन्
संतन्यतेनयेतिवा। गवतेशब्दयतिपूर्वपुरुषानुगुडु शब्दे सर्वधातुभ्यष्ट्रन् गोत्रं। जायंतेऽ
न्यधंतेत्रल्युट् जननं। कोलतिसंख्यापतिसंहतीभवतिकुलसंख्यानेइगुपधत्वात्कः कु
लं। अभिजायतेत्राधिकरणे हलश्चेतिघञ् जनिवध्योश्चेतिवृद्ध्यभावः अभिजनः। अनुयं
तिअन्वयवंतिपरस्परसंबंधं गच्छंत्यत्राधिकरणे एरच् अन्वयः अन्ववायश्च। वमन्तु ऋ
रतिपूर्वपुरुषानुद्वमिकुभ्यः शाकुवंशस्तालभ्यांतः हंशावंशाभ्यांमैके शपाशाकाइतिशभे
दात्। संतन्यतेसंतानः कर्मणिघञ्। नववंशस्य। वेतिब्राह्मणक्षत्रियवैश्यशूद्रावर्णाः
वर्णशब्दवाच्या इत्यर्थः। वर्ण्यतेवेदवाक्येनस्वाचारेषु प्रेर्यंते वर्णचूर्णप्रेरणे कर्मणि
घञ् वर्णाः। एकं। रेतिराजवीजमुत्पत्तिहेतुरस्यास्तीतिनिः राजवी जी। वंशभवो वंश्यः

दिगादित्वाद्यत् राज्ञो वंश्यो राजवंश्यः। द्वे राजवंशस्य। वीतियस्य कस्य चित् कुलसंभवो बीज्यः यप्
प्रकरणे ऽन्यत्रापि दृश्यत इतियप्। एकं। माहेति महत्कुलस्यापत्यं महाकुलात् खञ्खञौ माहा
कुलः। महत् कुलमस्त्यस्य तिस्यान्नमस्य महाकुलोऽक्तस्वादिरपि। कुलस्यापत्यं कुलात् खः कु
लीनः। अपूर्वपदादन्यतरस्यां यड्ढकञौ कुल्यः कौलेयश्चात्र। अर्यते ऽपजीमत्वेन गम्य
ते ऋहल्लोर्ण्यत् आर्यः। सभायां साधुः सभायाघः सभ्यः। सत् प्रशस्तो जनः सज्जनः। सा
धोतिपर्थेकार्ये हत्वापाजिमीत्यादिना उण् साधुः। षट् कुलीनस्य। ब्रेति। एतच्चतुष्ट
ये ब्रह्मचार्यादिचतुरवयवे समुदाये आश्रमो वर्तते प्रथमाश्रमीत्यादिभेदात् आश्रा
म्यंति स्वं स्वं तपश्चरंत्यत्र श्रमु तपसि खेदे चेत्यतः आङ्पूर्वाद्धलश्चेति घञ् नोदात्तोपदेशे
त्यादिना वृद्ध्यभावः आश्रमः। ब्रह्मवेदस्तदध्ययनार्थं यद्व्रतं भिन्नाचरणं मेखलादि भा

रणंचनरस्युपचारेणब्रह्मतच्चरितुं कर्तुं शीलमस्यणिनिः ब्रह्मचारी चतुर्विधः सावित्रः ब्रह्म
चारीवेदब्रह्मचारी प्राजापत्यब्रह्मचारी नैष्ठिकब्रह्मचारी च। अन्यक्तपंचयज्ञोधर्मार्थका
ममोन्द्यापरः कृतदारपरिग्रहः इतराश्रमोपजीवोगृहीगृहाद्दारारुद्धोगादितिः सोपि
वार्त्तावृत्तिः शिलनवृत्तिः यायावरोघोरसन्न्यासीच। वनवासीजटाजिनवल्कलधारी
वन्याहारभोजीवनस्थप्रस्थ एकदेशास्तत्रभवो विद्यमानः अएरवानप्रस्थः सोपिसा
ग्निभार्य्योनिरग्निभार्य्यश्चेति द्विविधः अस्यचभूशाय्याजटाजिनधारणवनवासवन्या
हारभोजित्वंचेत्यादिर्धर्म्मः सोपिश्रौडुंब[illegible]ः वैखानसः संप्रतीन्द्वालीयोर्मिश्चेति च
तुर्विधः। अत्राश्रमेन्त्यधिनाष्टुलतृतीयभागः काषायदंडधरः सर्वभूतेषुसमोध्यानधा
रणाव्यसनाध्यायनपरोभिक्षाशीभिक्षुः भिक्षोः सनाशंसभिक्षाउः सोपिकुटीचको

वहूदकोहंसः परमहंसश्चेति चतुर्विधः। एकोद्वी इति देहोत्पत्तिसंस्कारोत्पत्तिलक्षणे द्वे जाती जन्मनी अस्य द्विजातिः जातिपरत्वेनावं धुपरत्वाज्जात्यांताद्बवं धुनीति छोन भवति। अग्रे प्रथमं ब्रह्मणो मुखाज्जन्मास्येत्यग्रजन्मा। भुवो देवो भूदेवः। वडवा कुम्भदास्यश्वा स्त्री विशेषा द्विजन्मनामिति रभसः वडवा ब्राह्मणी तत्र भवः शेषेऽण् वाडवः। वलनं वालः वल संवरणे घञ् वालः इंद्रियाणां विषयेभ्यः संवरणं डलयोरेकत्वस्मरणात् वाडवस्तद्योगाद्धन्म त्रापि दृश्यत इति वः वाडव इति तु मारव्याम्रृतं। विशेषेण षट् कर्माणि प्रूरयति प्रा पूरणे आतश्चेति कः विप्रः। उप्यते धर्मबीजमत्र वपेर्न्नी जेंद्रादि नोरकिइत्वे च निपातनं विप्र इति वा। ब्रह्मा विप्रः प्रजापतिरिति वन्हपतिः ब्रह्मणोऽपत्यं ब्रह्म वेदस्तदधीते वा ब्राह्मणः। द्विजोग्रजन्मा द्विजातिरिति च वर्णज्येष्ठः कथो द्विजः मैत्रः पुनरुक्तजन्मा चेति त्रिकांड।

ति

शेषः। सूत्रकंठः पुमान् विप्र इति मेदिनीः। षट् ब्राह्मणस्य। असावीति असौ ब्राह्मणो या
गो यजनं तदादिभिर्युक्तः षट्कर्मास्यात्। इज्याध्ययनदानानि याजनाध्यापने तथा। प्र
तिग्रहश्चैतैर्युक्तः षट्कर्मा विप्र उच्यत इति षट्कर्माण्यस्येति बहुव्रीहिः। एकं। वीति
विदेः शतुर्वसुः विद्वान्। विप्रकृष्टं विनोति विपश्चित् पृषोदरादिः। दोषं जानाति कः दोष
ज्ञः। सर्वेषु शांतिकपौष्टिकादिषु अस्ति सन् असेः शतृ। शोभनं ध्यायतीति सुधीः। किं
नाम न वेत्ति कोविदः कौ इति धर्माधर्मौ शब्द्यायते कुशब्दे विच् कुर्वेदः तस्य विदो ज्ञाता
कोविद इति वा। बुध्यते कः बुधः। धियं संशयविपर्ययरहितां बुद्धिं राति कः धीरः॥ म
नीषायोगात् व्रीह्यादित्विनिः मनीषी जानाति सर्वं इगुपधेति कः ज्ञः। एवं प्रज्ञः प्रज्ञायो
गात् प्रज्ञाश्रद्धेत्यादिना णः इति वा। संख्या विचारणा तद्युक्तः संख्यावान्। पंडते नया

पडिगतोगुरोश्चेत्यकारः ८।२ ततः गत्यर्थाज्ज्ञानार्था इति पंडावुद्धिः तारकादित्वात्पंडितः।
कवते कह्ववर्णने इः कविः स्त्रियां कवी च। धीयोगात् धीमान्। सुनोति विविधं स्नाति सो
मसंधानं वा कुरुते सुञो दीर्घश्चेति रिः दीर्घौ साल्लसाम समस्सूरस्सूरय इति स्पभेदात् सूरि
रित्यादिः। अभिधानमालायां तु रन्यंतोपि सूरी। कृती कृतकर्मयोगादिनिः कृतमन्यं त
मनेन इष्टादिभ्यश्चेतीनि वा कृती करोतेः क्रियासामान्यवाचित्वाज्ज्ञानार्थत्वात् कृतं
ज्ञानमस्यास्तीति कृती ज्ञानीति ठुकलिंगः। कर्षति गूढार्थमिति कृषेः संज्ञायां तिकृ क
र्षयति निष्कर्षयति वा हलकात् कर्तरि क्तिन्स्वा कृष्टिः आकर्षणे स्त्रियां कृष्टिर्भवे
त्तातु विपश्चिं तीति रंति देवं व र्णनं वर्णः क्तिः घञ् क्तौ वर्णं तु वा न्हा र इति व
र्ण्यते लक्षो वर्णोयेन स लक्षवर्णः। विशिष्टं वष्टे चन्द्विडो ऽनुदात्तश्चेति पुत्रस्स

नयोः प्रतिषेधो वक्तव्य इति नख्याञादेशः। विचक्षणः। दूरान्दीर्घांश्च देशकालविप्रकृष्टानर्था
न्यः शास्त्रदृष्ट्या बुद्ध्या वा पश्यति स दूरदर्शी दीर्घदर्शी च दृशेर्णिनिः। द्वाविंशतिः पंडितस्य।
केचित्तु दूरदृश्वा दि द्वयं पृथगित्युक्तं तदयुक्तं दूरदृक्कोविदः सूरिरिति रभसादावेकपर्याय
त्वदर्शनादिति। श्रोत्रीति छंदोऽधीत इत्यर्थे श्रोत्रियं छंदोऽधीत इति घनि प्रत्यये छंदः शब्दस्य
श्रोत्रादेशः श्रोत्रियः। छंदोऽधीते वृत्तिवातदधीत इत्यादिनाऽण् छांदसः। द्वे वेदाध्येतुर्ब्रा
ह्मणस्य। उपेत्य यस्माद्वेदं वेदांगं वाऽधीयते स उपाध्यायः। उपेत्याधीयतेऽस्मादिती उ:
श्चेति घञ्। अध्यापयतीति ण्वुल् अध्यापकः। द्वे। स्येति सोऽध्यापको निषेकोगर्भाधानमा
दिनासीमंतोन्नयनादिर्मंत्रविद्यादानादेश्च ग्रहः तत्कर्ता पित्रादिर्गुरुः स्यात्। गृणाति
कथयति धर्मादिकं गिरति नाशयत्यधर्मं वा गृहशब्द इत्यतो गृ निगरण इत्यतो वा कृ ग्रो

रुक्षेतिऊः अंत्यस्य चोकारः गुरुः। एकं। मंत्रेति मंत्रो वेदस्तस्योपनयनपूर्वकं ग्रंथतोऽर्थतश्च यो ध्यापन
प्रतिपादयेन आचार्य तेज्ञानोत्कर्षीयसेमत इति आहलोऽर्घत आचार्यः। उपनीय तु यः शिष्यं
वेदमध्यापयेद्विजः। सांगं च सरहस्यं च तमाचार्यं प्रचक्षते इति मनुः। उपचारान्मंत्रादीनां प्रति
पादयिता ह्याचार्यः। एकं। आहइति अध्वरे यागविषये मम इष्टसंपादनाय यूयं कर्म कुरुतेति
ऋत्विजामादेशको यागस्वामी। व्रतमेणाजिनादिधारणं तद्युक्तो व्रती। यष्टा यजनशीलो
यजमानश्चोच्यते। त्रीणि। सइति सव्रती सोमपानवत्यध्वरे यजमानः स तु दीक्षित उच्य
ते दीक्षा मौंज्युपनयननियमव्रतादेशेष्वित्यतः क्तः दीक्षान्वितत्वाद्दीक्षितः अ
न्यत्राप्युपचारादिति कल्लिंगः। एकं। इज्येति इज्या यागः नित्यं तत्कर्त्री इज्याशीलः॥
पुनः पुनर्यागकर्त्रा यजेर्यङं तात्यजूपदशांयऊ इत्युकः यायजूकः। द्वे। येति विधिना

नेः

वेदवोधितविधानेनकृतयागोयज्वा।सुयज्वेतिनिघु।एकं।सइतिसयज्ञाग्नीष्यतीष्याबृहस्प
तिसवननाम्नायागेनेष्टवान्सम्बृस्थपतिः स्यात्सर्वान् वशेस्थापयतीतिवशेरतिरिति
वाकुलकात्स्यापेरप्यातिः कृस्थत्वंचस्थपतिः एकं।सोमेतिसोमः सोमलतारसः सपीतो
नेनेष्टाहिम्यष्ठेतीतिः सोमपीति।सोमंपीतवान्स्नातइतिकः सोमपः।द्वेपीतसोमलता
रसस्य।सर्वेतिसर्वस्वंदक्षिणायत्रसर्वस्वदक्षिणो।विश्वजिन्नामायागः सयेनेष्टः संपा
दितः सुसंगतीकृतोवासर्वस्वं विन्नवान्सर्वस्वंवेदयतिलंभयतिन्नत्विनइतिवाक्ता
मार्थस्यविदेरर्थंतादस्तुन्सर्ववेदाः।एकं।अनूचेतिसांगेशिक्षाद्यंगषट्कोपेतेप्र
वचनेवेदेऽधीतमनेनेष्टाहिम्यष्ठेतीतिः अधीतीकृताध्ययनोऽनूचानः प्रवचनइति
क्तास्येनविषयस्यकर्मणीतिसप्तमीअनुवचेरुपेयिवानित्यादिनेप्रातनादनूचानः

प्रवचनइ[illegible]विषयस्य कर्म[illegible]तीति स[illegible]दिनि[illegible]
हनूवानः। एकं। गुरोस्त्विति सांगवेदाध्ययनानंतरं गार्हस्थ्याय गुरुसकाशाल्लब्धा नु
ज्ञः त्वमिदानीं गृहस्थो भवेति प्राज्ञः समावृत्तः समाङ्पूर्वो वृतेः कर्तरि क्तः निवृत्त इत्यर्थः
एकं। सुखेति अभिषवः स्नानमात्रं इह तु प्रस्नावाद्यांगं स्नानं तत्कृतवानूयः सस्नु
त्वासुयज्ञो ईडु· निपु एकं। छात्रेति गुरुश्छिद्राच्छादनं छत्रं तच्छीलमस्य छत्रादिभ्यो णः छा
त्रः। पाठकाले ऽन्ते गुरुसमीपे वस्तुं शीलमस्य णिनिः शयवासवासिष्वकालादित्यलुक्
अंतेवासी प्रत्ययांतरविषयश्च वसिः शिष्ये प्रयुक्तो दृश्यते वसन्निवांते विनयेन जिह्मरि
तिभारविः वसिसमानार्थधातुप्रयोगोप्यत्र दृश्यते यथा मृगास्समुपासते गुरुमिवांत
६१ सई तिव। शिष्यते उपदिश्यते ऽसाविति एनिहित्वन्यादिना क्यप शिष्यः। त्रीणि शिष्यस्य

शैल्हाइतिगुरोरेस्च हलइत्यकारः शिल्हरणां शिल्हाप्रथमोपदेशः तत्साहचर्यात्तं यंथोपिशि
न्हानामधीयुतेतदधीतइत्यणशैन्हाः। प्रथमं कल्पं प्रथमं शिल्हाणीयं शास्त्रमधीयतेउ
कृथादित्वात्तंप्राथमकल्पिकाः। कल्पः शास्त्रे विधौ न्यायइतिमेदिनी ॥ द्वे प्रथमास्त्ववे
दाध्ययनानां। एकेति ब्रह्मवेदस्तदेकस्माद्गुरोरध्येतुमभिन्नं ब्रह्मचर्यारंभं व्रतमाचरंति
येते ऽन्योन्यंसब्रह्मचारिणउच्यंतेऽपचारात् ब्रह्माध्ययनार्थं व्रतमपिब्रह्मतच्चरंतीति
व्रतइतिणिनिः चरणे ब्रह्मचारिणीति समानस्यसभावः। सेतितीर्थं स्पृष्टिजुष्टजलेगु
राविति वन्हस्तेसमानेतीर्थे वसंतीति समानतीर्थेवासीतियत् तीर्थेयइतिसतीर्थ्याः। एको
ऽभिन्नोगुरुर्येषांतेऽन्योन्यंसतीर्थ्याः। द्वे। चीति अग्निं चितवान् गृहीतवान् विप्रोऽग्नि
चित्स्यात् अग्नौचेरितिक्विप् अग्निचित्एकं। पेति पूर्वंच पूर्वतराश्चेति द्वंद्वे परोवरपरं

परपुत्रपौत्रमनुभवतीतिनिर्देशात्परंपरादेशेलापिपरंपरानदुक्तंविनापिप्रत्ययंपुरंपराश
ह्वेदृश्यतेयथाविनिश्वसद्दक्रुपरंपरेणेतिरघुः ततः स्वार्थेष्यञिपारंपर्यंपारंपर्येणोपदेशः
पारंपर्योपदेशइत्यर्थः तत्राव्ययमितिहयथेतिहद्वैरुक्तमिहवटेयन्नाः प्रतिवसतीतितता ऽ
नेतावसथेतिहेतिस्वार्थेञ्यः ऐतिह्यं।ह्वे।उपेतिविनोपदेशेनप्रथमंज्ञानमुपज्ञानमुपज्ञायआ
वाल्मीकेः श्लोकनिर्माणेज्ञानंउपायनिरपेक्षत्वेनस्वाधीनत्वादुपसमीपंज्ञानमुपज्ञाआतश्चे
त्यङ्।एकं।ञेतिउपायउद्यमः सउपक्रमःप्रशकृवाभ्यः उपायज्ञानपूर्वकआरंभउपक्रमः य
यायमस्योपायोऽनेनैतत्सिध्यतीतिज्ञात्वाप्रथमारंभउपक्रमः परिपाटीतमुपगतःआ
प्तउपक्रमः।एकं।येतिइज्यतेहविर्दीयतेऽत्रयजयाचेतिनङ्।यज्ञः।सूयतेसोमोऽत्रसुञ
अभिषवेकर्त्रोरप्सवः।ध्रूह्वर्छेनेध्वरंतिकौटिल्यंकुर्वंतिध्वराः कुटिलाः अवञविघ

मानाध्वराः। अत्र अध्वरः। अध्वानं स्वर्गमार्गं राति ददाति वाध्वरः। इज्यतेवीयतेत्र हलश्चेत्यधिकरणे
घञ्। यागः। सप्तार्चिरग्निस्तंतुर्मूलकारणमस्य सप्ततंतुः। पृषोदरादिः। मखंति स्वभागं ग्र
हीतुमागच्छंति देवा अत्र पुंसीति घः। मखः। करोति स्वर्गादिफलं क्रियते वा फलार्थिभिः
कृञः क्रतुः। क्रीयते सोमोऽत्र क्रीणातेर्डतुजिति डक्तुक्रतुरित्यन्ये। क्रतुशब्दः ससोमके
यागेऽन्यत्र तूपचारात्। सप्तयज्ञस्य। पेति एतैः पाठादिभिर्ब्रह्मयज्ञादिनामकैर्ब्रह्मय
ज्ञपितृयज्ञदेवयज्ञभूतयज्ञनृयज्ञनामकैरवयवैरुपलक्षिताः पंचमहायज्ञाः स्युः॥
पाठो वेदस्य विधिनाऽभ्यसनं शिष्याणामध्यापनं च पाठः पठेः केवलाण्यंताच्च भावे
घञा व्युत्पत्तेः। देवतोद्देशेन हविषोऽग्नौ प्रक्षेपो होमः जुहोतेर्भावे सोमवद्धोरणादिको
मन्। अतिथीनां गृहागतानामासनादिदानेनान्नादिदानेन च सपर्या संतोषणं तर्प

णांपितृणांकव्यवालादीनांचविधिनाजलान्नदानेनतृप्तिसंपादनं।देवेभ्योभूतेभ्यश्चभुज्यंत
रीन्हेवान्नविक्षेपोवलिःवल्प्यतेसंव्रियतेवलसंवरणेइन्नितीतिंवलिः।अध्यापनंब्रह्म
यज्ञःपितृयज्ञस्तुतर्पणं।होमोदैवोवलिर्भौतोनृयज्ञोतिथिपूजनमितिमनुः।महत्वंवैषाम
हतःस्थूनाभवदोषा।स्थापनयनात्।सेतिसमयंतिसंगताभवंत्यस्यांसंज्ञायांसमजेत्यादि
नाक्यप्समज्याक्यपिवप्रतिषेधइतिनवीभावः।परितःसीदंत्यत्रेतिसंपदादित्वात्क्वि
प्सदेरप्रतेरितिषत्वंपरिषत्पर्षदितिद्यवृकमपीतिप्रमथाःस्थुःपारिषदाइत्यत्रष्टू
विस्मुक्तमेव।गावोनानावाचास्तिष्ठंत्यस्यांतिष्ठतेर्घञर्थेकःअंबावेत्यादिनाषत्वंगोरादि
ङीष्गोष्ठी।सहभांत्यत्रअन्येभ्योपिदृश्यतइतिदृशिग्रहणात्सर्वोवापाधिव्यभिचारा
र्थादधिकरणेडःसभा।संयंतिमिलंत्यत्रवाहुल्यात्क्तिन्समितिः।संसीदंत्यत्रसंस

ता। आगत्यतिष्ठंत्यत्रआस्थानी। ल्युट् आस्थानंसीदंत्यत्रास्मिन्नित्यसुन्सदः। नवसभा
याः। त्रेतिहविष्णोहोमइष्टाणामाधारोयज्ञगृहं ततः प्राक्पूर्वदेशे सपत्नीकयजमानसदस्या
दीनांस्थित्यर्थंयज्ञगृहं तत्रप्राग्वंशशब्दोवर्ततेप्राञ्चतिप्राक् ऋत्विगादित्वात्क्विन् वंशशा
ग्वंशो। त्रेतिविग्रहः। एकं। सेतिन्यूनातिरिक्तानांविपर्यासंचपरिहर्तुंविधिंवेदोक्तयज्ञक्रि
याकलापंद्रष्टुंयेषामुपादानंतेसदस्याः साधवउपकारकाः तत्रसाधुरितियत्सदस्याः॥
एकं। सेतिसभायांसीदंतिसत्सूद्विषेत्यादिनेतिक्विप् सभासदः। सभामास्तारणंतिस्तत्र
आच्छादनेकर्मण्यण् सभास्तारः। सभायांसाधवः यत्सभ्याः। समाजंजनसंघातंसम
वयंतिप्रविशेपकदेशीभवंतिसमवायान्समवैतीतिठगितिपूर्वटीकाकृतः। वयंतुसमा
जंरक्षतिरक्षतीतिठक्सामाजिकाइत्याचक्ष्महे। चत्वारियागसभायाश्चारंभकारणं।

अध्वेतियजुर्वेदादिविहित्विजांक्रमेणाध्वर्य्वादिनामत्रयं अध्वरमिच्छतिसुपइतिक्यच्क्यच
छंदसीत्युःकअध्वरष्टतनस्यलोपइत्यक्लोपःअध्वर्युःअध्वरान्यैतिअपष्ट्यादिर्वा।उद्गे
गायतिसामानिउद्गानात्तृच्एकं।अग्नीतिअग्निमिंधइतिजिइंधीदीप्तौस्फायीतिरक्रन
लोपःअग्नीध्रःअग्नीध्राद्याजनैर्वायोधनादिदत्त्वायजमानेनानष्टसंपादनायव्रियंतेत्वा
र्थ्यंतेयेऋत्विजोयाजकाश्चौंतेऋतौयजंतिऋत्विगादिनानिपातितःआदिनाब्रह्मो
द्गातृहोत्रध्वर्युब्राह्मणाछंसिअच्छावाकनेष्टृप्रभृतयःषोडशगृह्यंतेवाय्याइतिक्ल
हलोण्यत्एनित्त्वित्याद्यैसाहचर्यात्परस्मैपदिनएवहजोग्रहणान्नक्यप्।वेदिरि
तिवेदयतिनिवासयतिइङ्क्रमजातंविदवेदनाख्याननिवासेषुचुरादिःततोण्यंतादवइःवे
दिःपरिष्कृतायज्ञार्थपशुबंधनाययज्ञपात्रासादनायवाहितसंस्काराभूमिर्वेदिःसावड

मरुकाद्याकारा। पिंडिका एकं। सेति असंबाधेन तिष्ठंत्यत्र मिथिलादयश्चेतील विधात्वं तस्याण्डा
देशो निपात्यते स्थंडिलः। चत्वरं प्रागुक्तं हे यज्ञार्थपरिष्कृताया अनिम्नोन्नताया यज्ञभूमेः॥
चितिर्यज्ञस्समाप्तिस्तूवर्कं पशुबंधनाद्यर्थं यज्ञभूमौ वैल्वः खादिरो वा अष्टाश्रिर्यस्तस्यारोप्य
ते स यूपः तस्य शिरसि वलयाकृतिर्यः काष्ठविकारः स चषालः चषंति समाप्तिं संशयं चष
भक्षणे मूर्द्धन्यांतः सानसिपर्णशितं डुलां कुशाचषाले ल्वलाधिकृत्ये इत्यालच्प्रत्ययो
निपात्यते। कुंबेति अस्पृश्यादिदर्शन वारणाय यज्ञस्थाने या स्रुगहना निरंतरा वृत्तिर्वे
ष्टनं सा कुंबा कुवि आच्छादने विंति सूर्जिन्यादिनाऽकारः अन्यत्राप्युपचारात् एकं॥
यूपेति यूपस्याग्रं शिरः तर्मन तस्मिन्नप्रवर्तते दूरादभिव्यक्तिं यातीति मन्त्रितिमनट्द्रे॥ नी
ति निर्मथ्यते पूर्वमस्मुत्पादनायेति शेषः मंथ विलोडने ण्यत् अग्न्युत्थापर्यंतका

नाय

थंकाष्ठांतरेणघृष्यतेनेनारणिःस्यात्आऋछतिप्राणयत्यग्निंतरणिवदनिः अरणिःस्त्रियांङी
षिअरणीवयद्योगादग्निहोत्रिणउच्यंतेतान्दर्शयतिएकं। देतिदक्षिणाया। दक्षिणाग्निःसर्वना
म्नोहक्षिमात्रेपुंवद्भावेदक्षिणाग्निः अयंचाहवनीययोनिश्रोत्रियेयोनिःसविभववैश्यकुल
योनिश्चगृहपतिर्गृहस्वामीतेनसंवद्धोनित्यसंयुक्तोगार्हपत्यःगृहपतिनासंयुक्तेञ्य
इतिञ्यः अयंचसदारक्षणीयःगार्हपत्याउद्धृत्यहोमार्थंयःसंस्क्रियतेसआहवनीयः
आङ्पूर्वाज्जुहोतेःकृत्यल्युटइत्यधिकरणेऽनीयर्आहवनमर्हतीतिप्राकृक्रीता
च्छःआहवनीयःएतेत्रयोऽग्नयउच्यंते। राजदेवस्कदक्षिणाग्निगार्हपत्याहवनीया
इतित्रयाणांद्वंद्वसमासेपठंतिस्म। अग्नीतिइदमग्नित्रयंत्रेतोच्यतेत्राणंत्राःसदासंधु
क्षणंतामितात्र्याप्तात्राच्यतेत्रा। अग्निहोत्रिणआहुतयःत्राभिरितावाक्रेतास्त्री। एकं

प्रति। मंत्रादिसंस्कृतोऽग्निः प्रकर्षेणीतः प्रणीतः। एकः॥१

सितिसमोवहेरूहतेर्वीसम्प्रसारणेदीर्घमध्यः। परिणीयतेउपचीयतेपर्युपपूर्वाच्चिनोतेण्यदाय
देशीवक्षैयज्ञाग्निविशेषेप्रयोगएषामस्तिप्रयोगिणस्तत्रप्रयोक्तव्याः। नान्यत्रेत्यर्थः समूह्य
परिचाय्योपचाय्यसमूह्याइतिनिपातः क्वचिदग्निप्रयोगिण इतिपाठः। यइतिगार्हपत्याद
ग्नेरानीयोद्धृत्यः प्रणीयतेआरोप्यतेतत्रानाय्यः आनाय्योऽनित्यइतिणयदादिनिपातः
वैश्यकुलादिरप्यस्ययोनिरतोगार्हपत्यादित्युक्तं। अथेतिहुतभुजोऽग्नेः प्रियाभार्या। वृषा
कप्यग्नीत्यादिनाङीपूऐकारादेशोऽग्नायी। सुष्ठुआहूयतेदेवतानया सुष्ठुवशमाहाप
यत्यागमयतिसुराणसुपूर्वाह्न्युहोतेर्हाङोवाऽन्येभ्योपीतिडः पृषोदरादित्वादुकारः
स्वाहादेवहविर्दानेइतिवक्ष्यतेतदाइअस्त्यतित्वादनव्ययं पदांतुतन्मंत्राधिष्ठात्रीदेवता
स्तिभार्या। विवक्ष्यतेतदाइअस्तीत्वादनव्ययत्वं। स्वाहयेवहविर्भुजमितिरघुः। त्री

णि। कागिति अग्नेः समिंधनं समुद्दीपनं तन्निमित्तं या ऋक् च सन्धार्य समिदाधीयतेऽया वा
रोप्यते सामीधेनी समिधामाधाने षेण्यण् षित्वात् ङीषि सामिधेनी धाय्या चोच्यते। धीय
ते पुष्यते रग्निरनया धाञः पाय्य सान्नाय्येत्यादिना ण्यत् युगागमश्च दापधाय्या। एकं
गेति गायत्रीप्रमुखं गायत्र्यादिछंदः शब्दवाच्यं गायंतं त्रायते आतश्चेत्यादिना कः गौरादित्वा
त् ङीष् गानं गायः भावे घञ् युगागमः गायेन त्रायते मूलविभुजादित्वात् कः गौरादित्वा
त् ङीष् गायत्रीति म्नाख्यामृतं छंदः प्रमुखपदेन उष्णिगनुष्टुब्बृहतीपंक्त्यादिग्रहः ष
डक्षरपादा गायत्री सप्ताक्षरचरणा उष्णिक् उत्स्निह्यति ऋत्विगादिना क्विन् क्विन् प्र
त्ययस्य कुः उत्तिहे स्नलोपश्च उष्णिक्क्हांता। अष्टाक्षरपादाऽनुष्टुप्भांता। नवाक्ष

रा.सु.
२०२

रपादाह्वहती। दशान्तरापादां पंक्तिरित्या। द्विवोद्बंचंदयतिदीपयतिसंदर्भेव दिग्भ्राह्ला
दनेदीप्रोवचंदेरादेश्छ्वेत्यस्तुनच्चस्य छः छंदः कर्मस्रुवेदभागानां छंदोदेवतान्त्वषिपूर्व
को विनियोग इति छंदसामन्त्रकथनं। प्रथमप्रमुखे चोभे प्रधाने च प्रकीर्तिते इत्यमरः
हेति हव्यं देवार्थमन्नं पच्यत इति कर्मणि घञ् तयोः कर्मधारयः हव्यपाकः केचित्तु पच्यते
ऽत्रेति हलश्चेति घञ् पाकं कृत्पाद्य हव्यपाकः स्थाल्यादिरुच्यते ऽन्यत्रौपचारिक इ
त्याहुस्तदसत् अन्न एव तत्प्रयोगदर्शनात्। हेमपात्रेकृतं दोर्भ्यामाददानः पयश्चरुं
।चरोरर्द्धार्द्धभागाभ्यां तामयोजयतामुभे। कर्मकांडेच मुद्रतं डुलाभ्यां पयसाचच
रुः श्रपयितव्य इत्यादौ न तु स्थाल्यादौ तत्प्रयोगो दृष्टः मधुमाधव्यामपि पचनीये ह
व्येव रुरित्यर्थः यथाष्टाकपालं चरुं निवेशाये हितिस्थाल्यादौ तु तादर्थ्या उपचार इ:

राम
२०१

न्युपक्तं चरंतिमन्त्रयंतिदेवाइममितिचेर्मरुवडुःवरुः आमिन्नासा हवयीच्चरोः स्त्रीत्वाशंका निहृत्य
र्थे पुमानित्युक्तं। आमीतिश्रुते आवर्तितन्नेवन्तीरिदधियोगाद्याजटिलाकाराविकृतिर्जायते सा
ऽमिन्ना आङ्पूर्वान्मिहेदीर्घश्चेतिसउपधादीर्घत्वे वेतिदीर्घमध्येयमितिपुरुषोत्तमः। आ
ङ्पूर्वान्मिषस्पर्द्धायामित्यतः स्नुव्रश्चिकृत्यृषिभ्यः किदितिवाहुलकात्सप्रत्ययेकृस्वमध्ये
यमितिगोवर्द्धनः। हविर्विशेषत्वादस्यात्र कथयं एकंन्दिरिसइतिख्यातायाः। ध्रुवीतिहो
माग्नेः संधुन्त्रणाय मृगचर्मणाकृष्णसारत्वचा यद्रवितं क्षुतं व्यजनं तद्ध्रुवित्रं धूयते नेनेति धूवि
धूननइत्यतोऽर्तिलूधूसूखनइत्यादिना नेत्रविकुटादित्वात् ङित्वे गुणाभावे उवङि ध्रुवित्रं नि
रनुबन्धइत्यस्यग्रहणमिति वृत्तिः ध्रुवित्रमुकारादि सामान्येन धूञो पिग्रहणाद्धानिदेशिकङित्वु
स्यानित्यत्वाद्गुणेधवित्रमित्यपि। एकं। पृषेति पृषु सेचने पर्षति सिंचति पृषत्। प्रागुक्तः। पृ

बंधसा हवयादिधूविधून २

षदाज्यमत्रे तिपृषदाज्यंपृषद्वतराज्यंचेतिवा। सदधिदध्नासहितेमिश्रीकृतेआज्येपृतेपृषदाज्यं। पृषातकंसदध्याज्येपृषदाज्यंतद्दुच्यतइतिहै। पेतिदेवपित्रर्थत्वात्परमोत्कृष्टमन्नंपरमान्नंसन्महदित्यादिनाकर्मधारयः परम्मा उत कृष्णादेवादयस्तेषामन्नमितिवा। पयसासंस्कृतः पायसः संस्कृतंभक्षाइत्यण्। हृपायस्य। हेतिदेवानामिदंदैवं। पित्रणामिदंपैत्रंतस्येदमित्यण् देवसंबंध्यन्नंहूयतइदमित्यवो यत्। कम्यतेत्वन्निकारकत्वेनवर्ण्यतेकहवर्णेयोत्दुपधादितियत्कूयतेशब्द्यतेवर्ण्यतेकुशब्देऽचोयत्। यथाक्रमंदेवतान्नंहव्यंपित्रन्नंकव्यं। पात्रमितिपिबंत्यनेनपातिवाक्रियामाधेयंवादादिभ्यष्ट्रन्पात्रंभाजनंतत्प्रस्तावाद्यज्ञसंबंधिद्रव्यमिदंस्रवत्यस्मात्घृतादिकंस्रावः स्रुगतोघञर्थेकः स्रुवः आदिनावमसोऽखलमुसलताम्रस्रककपालादियहणंतस्यभेदाविशेषाः क्रकतिस्येर्घ्येपचाद्यच्कुटादित्वात्

ङित्वेडवङः टापू अवयाइयं ववटपत्राकृतिः। उपाधिकं विभर्ति भृञः क्विप् उपभृत् इयं स्रुवत्राकारा
जुहोति अन्येभ्योपि दृश्यत इति क्विप् दृशिग्रहणात् द्विर्वचनं प्रकृतेर्दीर्घत्वं वजुहूरईदं वंजाकृतिः
नापुमान्। स्त्रुवः स्त्रवत्यस्मात् घृतादिकं स्त्रुवः विक्रुस्त्रुरुवांता अन्येभ्योपि दृश्यत इति क्विप्
दृशिग्रहणात् द्विध्वंतरोपसंग्रहणार्थात् धातोत्रुगागमः स्त्रुचः स्त्रियः स्त्रीलिंगाः अवयासाह
वर्यात् द्वयोः स्त्रीत्वमेव स्त्रुच इति बहुवचननिर्देशात् बहुत्वं एकत्वादावपि अवयास्त्र इ गुप
भृद्वस्याद्विज्ञेयाचोत्तराज्जुहूरिति अवस्थासर्वस्वात् व्यक्तिभेदात् बहुत्वमित्यन्ये अन्येतुस्त्रु
वोभेदात्रुवाहयइतिस्त्रुवइतिषष्ठ्यंतं स्त्रियाइति च षष्ठ्यंतमाहुः। क्विपि दीर्घत्वे स्त्रूः स्त्रि
यांस्त्रुवइत्यन्ये। यज्ञपात्राणां पृथक् पृथक्। उपेति अभिमंत्र्य मंत्रेण पूतीकृत्य प्रातिप
दिकाद्धात्वर्थइति एंपतातद्क्लोल्पप्। कृञ् हिंसायां जीवत्यपि पशो हश्यतेपदासावुपा

रा॰मु॰
२०४

न्नतः पलायत इति प्रायश्छिन्नोपदेशात् इतः शस्त्रेण हत इत्यर्थात् एकं। पेति परमित्य शापार्थे
ऽमयं परः श्रेष्ठ आक्रो गतिरस्य अक कुटिलायां गतौ घञ् परं पर आक्रो ऽस्मादिति बहुव्रीहिः
हता हि पशवः परां गतिमवश्यं लभंत इति स्मृतिः। शमु दमु उपशमे ल्युटि शमनं। उन्नासेव
ने ल्युटि प्रकृष्टं सन्नह्यति जनकमुन्नाणमस्येति प्रोन्नाणं त्रयं वधार्थकं वध वा श्वि। त्रयं यज्ञा
र्थपशुहननस्य। वेति एते यज्ञार्थे ये हताः पशव उच्यंते ते च वाच्यलिंगाः मीञ् हिंसायां
कर्मणि क्तः सज्ञतिलाभात् उपाधिकः संपन्नो जातः उपसंपदेरुत्पन्नार्थात् कर्मकर्त्वेकर्त
रिक्तः प्रकर्षायोन्क्षितः प्रोन्क्षितः। प्रोक्षितः। प्रोक्षितं निहते सिक्त इति रभसः त्रीणि। सेति
हविर्हेति मइ मैसान्नाय्यं संनीयते व। क्लिना संयोज्यते पाय्य सान्नाय्येत्यादिना एयदा या
देशो समस्य दीर्घो निपात्यते। हूयते हविः जुहोतेरर्वि श्रुवीत्यादिना इसिः। अग्नाविति ज्ञ

राम
२०४

ग्नौ हुतं प्रन्तिप्तं हविर्द्रव्यं वषट्कारेण हुतं वषट्कृतं वषडित्यव्ययं हवने ऊर्ध्यादित्वाद्गतित्वेन गति
समासः तत्र त्रिषु वषट्कृतः पुरोडाशः वषट्कृताय वाग्रूः वषट्कृतं हविः। अग्निग्रहणं ब्राह्मण
सुखादिव्याहृतये। एकं। दीतिप्रधानयागोदीन्हातस्मातः समायको योऽपरोयज्ञोन्यूनत्वादिदोष
निरासाय प्रधानयागस्य पूरणाय प्रतिष्ठार्थं क्रियते सोऽवभृथः। अवहीनं विभर्ति पोषयति
अवेभृ त इति क्थन्नू अवभृथः। एकं। तदिति तच्छब्देन यज्ञमात्रपरामर्शः तस्य कर्मक्रियासंपा
दनं तेन यज्ञसंपादनेन यस्य ब्राह्मणस्य देशस्य द्रव्यस्य वशास्त्रोक्ता योग्यता तद्यज्ञकर्मार्हं तीत्य
र्थे यज्ञर्त्विग्भ्यां घखञाविति घः यज्ञियं तत्र त्रिषु यज्ञियो ब्राह्मणः यज्ञिया भूः यज्ञियं द्रव्यं
अथेनिक्रतुर्यज्ञस्तत्र कर्मदानादिक्रतुश्च कर्म च क्रतुकर्म तदिष्टमिष्टशब्दवाच्यं। इष्टं यज्ञे व
दानेच वाञ्छिते पिप्रयुञ्जतइत्यजयः। पूर्तमिति खन्यतइति खातं पुष्करिण्यादि तडागादिय

रा.मु.
२०५

त्कर्मदेवकुलादिनहादिनागृह्यते तद्युक्तं तत्र पूर्तमुच्यते तडुक्तं पुष्करिण्यः सभा वापी देवता
यतनानि च। आरामश्च विशेषेण पूर्तं कर्म विनिर्दिशेदिति। पूर्यते पाल्यते वा पूपालनपूरणयोः
नध्याख्येति निष्ठानत्वाभावः। अघितियज्ञस्यपक्षेषं घृतादितदमृतमुच्यते अपमृत्युहर
त्वादमृतमिवामृतं। देवपित्रतिथिगुर्वादिभुक्तस्यपक्षेषं तत्र विघसः विशेषेणाघते भक्ष्य
त इति उपसर्गेऽदइति कर्मण्यप्रघजपोश्चेति घस्लादेशः। त्येति त्यजेर्भावे घञित्यागः। वि
पूर्वाज्जहातेर्ण्यन्तात्क्तिनिष्ठायां विहापितं। दानः उद्दिपूर्वात्सृजेः विपूर्वात् अणुदान
रत्यतश्चुरादेः विपूर्वान्नरतेः स्पृशोः प्रतिपूर्वात्पदेर्ण्यन्तात् प्राङ्पूर्वाद्दिशेः निरपूर्वोद्वपेः
अपपूर्वाद्धृञ्जे भावे ल्युट् दानादिपदानि। हंति दुर्निमित्तमनयोर्हंतेरंहश्चेति अतिः अंहति
मेध्याकारवतीति हत्त्व चंडादयः। आहिगतावनेकार्थत्वाद्दानार्थात् क्तिन् तितुत्रतथेत्यत्र

राम
२०५

अयहारीनामितिवक्तव्यमितीटिऋंहितिर्मध्येकारवतीतितुकलिंगादयः।त्रयोदशदानस्य।
मृतेतिमृतार्थमृतायतदहर्मरणदिनंतदहःप्रभृतिदानंतदहर्दानंशाकपार्थिवादित्वात्प्रभृति
पदलोपः।देहोपलक्षणंदेहधारणादूर्ध्वंपरतऊर्ध्वदेहःराजदंतादिःतत्रभवंऊर्ध्वदेहमाचौर्ध्वदेहा
चेतिवृनृऔर्ध्वदैहिकमितिपूर्ववटीकाकाराः।वयंतुपितृदानंनिवापइतिवक्ष्यतेऽतोत्रपदंप्रे
तपरंतेनप्रेतस्यसपिंडीकरणात्पूर्वंयदहःप्रभृतियन्मृतार्थंप्रेततत्त्रिहेतुकंदानंतत्रौर्ध्वदे
हिकंऊर्ध्वशब्दोवकारवाननव्ययंमांताव्ययमितितुहलुवंडः।वकाररहितऊर्ध्वशब्दोऽभिधेय
लिंगइतितुदेशना।यदहःक्रिमृतस्तदहःप्रभृतिदीयमानस्यपिंडजलादेःएकं।पीतिपितृग्र
हणंमात्रादेरुपलक्षणंतेनमात्रादेरपिग्रहणं।निवापःसहकारमंजरीतिकुमारःनिपू
र्वीवपिरुपसर्गवलाद्दानार्थोनिर्वपिरितिआदेशनंनिर्वपणमित्युक्तोरन्यत्रापितत्प्र

योगदर्शनान्निवापइतिभावेघञ्। दे पित्राद्युद्देशेनान्नवस्त्रसुवर्णादिदानस्य। श्रेतिशास्त्रशद्वे
नलक्षणयाशास्त्रोक्तविधौवर्त्ततेशास्त्रेणशास्त्रोक्तविधानेनतन्मातापिटदानंतस्ययत्क
र्मक्रियासंपादनंकालपात्रादिनियमेनयद्ब्राह्मणभोजनादितच्छ्राद्धंप्रज्ञाश्रद्धेत्यादिनाणः।ए
कं। अन्वेतिपन्हमात्रशेषदेयत्वादनुपश्चाद्दाक्रियतेक्ताहल्लोएर्पत् अन्वाहार्य्यंमासिकेप्र
तिमासदेयत्वात्मासिभवंकालात्ठञ्मासिकंपार्वणंश्राद्धंतत्रवर्ततेपिंडान्वाहार्य्यश
ब्दोप्यत्रवर्ततेपिंडान्वाहार्यकंश्राद्धंकुर्यान्मासानुमासि - कंमितिमन्वादेः।हे। अंशइति
पंचदशमुहूर्तात्मकस्याह्नोदिन - स्याष्टमोंऽशोभागःकुतपःकुंपापंतपतीत्यच्कुंभूमिंम
ध्यंदिनेतपत्यर्कोत्रकुतपः दिवसस्याष्टमेभागेमंदीभवतिभास्करः।सकालःकुतपोज्ञे
यः पितृणांदत्तमक्षयमितिसातातपात्। एकं। मरीतिइत्येरानिछ्रार्थस्येतिघुच् अन्वेष

णापरेर्वैतियुष्क्तिनौपर्यैषणापरीष्टिः। गवेषमार्गणेचुरादिण्यंताघुञ्गवेषणा। चत्वारित
कोदिनायथावोधितधर्माद्यन्वेषणायाः। सेतिषणुदानेसायतेदीयतेपुष्पादिकमत्रऔणा
दिकइः सनिः धमनीवत्सनीव। अन्वेषणावदध्येषणा। द्वेपुर्वीदेराराधनस्यसत्कारपूर्व
कंक्कविदर्थेनियोजनस्य। येतियजयाचेतिनङिःयाच्वनंयाच्ञा। शान्सुस्कतौयावनेच अ
भेःक्तिः अभिशस्तिः। याचेण्यंपंतादर्थयाच्ञायामनोपिण्यंताघुव्अर्थना। चत्वारिभि
न्हामात्रस्य। षडितिअर्घ्याद्यआगंतुपर्यंताः षड्त्रिलिंगाः। अर्घार्थेवारिणिजलेऽर्घ्ये
। पादार्थवारिणिपाद्यंपादार्घाभ्यांचेतियत्। व्रत्येकं। केतिअतिथ्यर्थेवस्तुनिअतिथे।
ण्यअतिथ्यंअतिथेसाधुरित्यर्थेपथ्यतिथिवसतिस्वपतेर्डन्अतिथेयं। कमेणै
केकम्। स्यादितिआवेशनमावेशं। तः प्रापणंतदर्हतिआर्हादगोपुच्छर्तिठक्विम्रा

माघर्यमा। विश्पतेस्थीयतेत्रावेशोवेशः स्थानं अधिकरणेघञ् सप्रयोजनमस्यप्रयोजनमि
तिठग्वा आवेशिकः स्त्रियामावेशिकी। आगतोगृहमित्यागंतुः गमेर्दीर्घत्वे आगंतुरपी
तिहस्त्वर्वंकः। अचिरस्थिरत्वादनित्यास्थितिरस्यपृषोदरादित्वादतिथिः अतनीतिकातन्य
न्वीत्यादिनाइथिन् वा। प्राघुणस्त्वतिथि र्द्वयोरितित्रिकांडशेषात् स्त्रियामितिथिरति
थीचल्लीवेत्यतिथ्येवत्रीणि। पूजेतिपूजपूजायां चिंतिपूजीत्यादिना ऽङ् पूजा। नमो
वरिवसितिक्यचिश्रप्रत्ययादित्यकारः नमस्या। व्याष्टपूजानिशामनयोः क्तिनित्यंविभा
वोवक्तव्यइतिविभावे ऽपचितिः। कंड्वादिषुपूजार्थः सपरशब्दः पठ्यतेयकिअप्रत्यया
दित्यकारेसपर्या। अर्चपूजायांगुरोश्चहलइत्यकारः अर्चा। अर्हतेर्युरादित्वणंताद्युच्
अर्हणा। समा अभिन्नलिंगाः। षट्पूजायाः। वरिवस्शब्दात्पूजार्थात् नमइत्यादिना

क्यच्प्रत्ययेटापिवरिवस्या॥ शृणोतेः सेवार्थात्सन्प्रत्यये शुश्रूषा। परिपूर्वश्चरिः से
वार्थः परिचर्या। परिसर्येत्यादिना श प्रत्यये यकि च परिचर्या निपातिता। उपासिरपि सेवा
र्थः ततो ल्युट् उपासनं स्त्रियामुपासना। उपासिः। चत्वारि सेवायास्तु कालाचरणस्य। व्रेति
व्रज्यजो भावे क्यप् व्रज्या। अटाद्यापरिचर्यावत्। हृष्याघारवत्तु सातस्मा इति श्रयो गदर्श
नाद्धयाव। अटाटर्यापर्यटनं भ्रमइतिरत्नकोषाहृदापि। त्रीणि व्रतवशात्भ्रमणस्य भ्रमणमा
त्रस्य च। त्वेति ईर्यते गुरोः शास्त्रोपासनया ज्ञायते ईरगतौ या वनेव रायतत्तस्याः पंथा उ
पायः ऋक्पूरेत्यादिना समासांताकारः ईर्य्यापथस्तत्र ध्यानधारणाद्युपाये परि
व्राजकादीनां या स्थितिरवस्थानं तस्याः अपरित्यागस्थ्र्यापरिचर्येत्यत्र वा हुलकात्
परिणा विनापि चर्या निपातः। एकं। उपेति उपपूर्वात्स्पृशेर्भावे घञ् उपस्पर्शः। आ इ.

रा॰मु॰
२०८

पूर्वाचमु अदन इत्यतो ल्युटि आचमनं । हे आचमनस्य । अथेति मुनेर्भावः कर्मवा इगंता
द्वेत्यण् एमोर्नेअभावः रणां हे मौनस्य । आन्विति पूर्वं पूर्वमनुपूर्वं वीप्सायामव्ययीभावः कर्म
वाहकादित्वात् ष्यञ् षित्वात् ङीष् हलस्तद्धितस्येति यलोपः आनुपूर्वी स्त्रियां वेति अभा
षणसाहचर्यादानुपूर्व्यं च । आवर्तते व्यापारोऽस्यां संपदादित्वात् क्विप् आवृत् । परिभा
वे भागेन पाटनं गतिर्नियोगोऽस्यां पटगतौ ण्यंतात् वइः परिपाटिः आनुपूर्वी साहच
र्यात् आवृत् परिपाटी स्त्रियोः ई डुदेद्विवचनमिति प्रगृह्यत्वात् यणादेशः कृदिकारादि
ति पन्ने ङीषि परिपाटी च । कृतालंकाभर्तुर्वदनपरिपाटीषु घटने ति पूर्वप्रयोगः ॥ अ
नुगतः क्रमोनुक्रमः प्रादिसमासः । परिपूर्वाद्दिणः परावनुपात्ययइणइति घञ् पर्य
यश्च । क्रमस्यापिशास्त्रार्थीभूतत्वेनेह कथनं । पंचानुक्रमस्य । अतीति अतीत्युपतनं

राम
२०८

गत्तिरतिपातोभावेघञ्परावनुपात्ययइतिघञ्भावएवपर्ययः ऽपगतस्यातिक्रम्यगमन
मुपात्ययएरच्। त्रीणि शास्त्रबोधितस्यलोकव्यवहाराबाधाप्रस्यार्थस्यपरित्यागस्य। नी
तिनियमनंनियमः समुपनिविषुचेत्यप्। छ्णोत्त्या। छादयतिस्वात्तंत्र्यंम्रियतेवासीष्टायब्र
तं पूष्पिरंजिभ्यांकिदितिवाहुलकाहृजोप्पतचूकित्वेपएणादेशः। कस्मविन्मलिनात्मनोपि
नियमोभवतियथापरस्वंमयाहर्तव्यंप्राणिनोहंतव्याइतितन्निरासायाह। तञ्चेतिचकारो
ऽवधारणेऽयमर्थः शास्त्रेपुण्यत्वेनपवित्रजनकत्वेनयद्बोधितमुपवासादितदेवव्रतंनतु
यः कोपिनियमः व्रतं च शास्त्रोक्तनियमः पुण्यंप्राग्युक्तंततः संज्ञायां कन्तदेवव्रतमुपवा
सनक्तंभोजनादिस्वल्पकालावच्छिन्नंपुण्यकमितिभेदः। तञ्चेत्यादिस्वरूपकथनमित्य
न्ये। आदिनानक्तंभोजनान्नारलवणाशनानशनादिग्रहः। त्रीणि। उपेतिवसुस्तंभेउप

पूर्वाद्भावेक्त उपवस्तं। उपोषितमपि। वसतेर्घञि उपवासः। उपोषणाद्दिनु उषदाहेऽयमथ भोज
नेवर्ततइतिमाधवी। नित्यविहितभोजनद्वयनिवृत्तेर्द्वेनाम्नी। वीतिविवेचनं विवेघञि विवेकः।।
पृथग्भिन्नश्चात्मास्वभावोयस्य तथा तद्भावस्तत्ता। द्वेपरस्परमाहत्यावस्क्तस्वरूपनिश्चयस्य।। प्र
कृतिपुरुषभेदज्ञानस्येत्यन्ये। स्येतिहत्तं वेदवोधितस्याचारस्य परिमाणं पालनं। अध्ययनं ब्र
तपूर्वकं ग्रहणं गुरुमुखेन वेदाभ्यसनं तयोर्न्नोद्भिस्तत्परिपालनकृतस्तेजस उपचयो ब्रह्मव
र्चसमुच्यते ब्रह्महस्तिभ्यां वर्चस इत्यच् समासांतः। द्वे। अथेति अध्ययनस्यादावंते च गुरवे प्र
णवोच्चारणपूर्वकोयोऽञ्जलिः क्रियते स ब्रह्माञ्जलिरुच्यते न त्पाठार्थत्वात् ब्रह्मणो
ऽञ्जलिर्ब्रह्मांजलिः। सामवेदपाठे स्वरविभागार्थे योऽञ्जलिः स ब्रह्मांजलिरिति तु माधवा
द्यः। पेतिपाठे वेदपाठे विप्रुषो मुखनिःसृतजलबिंदवो ब्रह्मविंदव उच्यंते। एकं। ध्येति ध्मा

नंनिरालंबनज्ञानंयोगःसालंबनध्यानंपरमात्मचिंतनंयोगश्चित्तवृत्तिनिरोधमात्रंतयोर्यदास
नंस्वस्तिकाद्द्विपादपद्मासनादिकंतत्रब्रह्मासनंस्यात्एकं।केतिसोपायेतिकर्तव्यतोपदेशः क
ल्पःकल्पतेफलजननायसमर्थोभवतिपचादित्वात्कपरत्वकल्पस्तत्रविधिक्रमोस्यातांविधी
यतेसंपाद्यतेफलार्थिभिरितिकिः विधिः।क्रम्यतआरभ्यतइतिक्रमेघञ्जिक्रमः।त्रीणिवैदिक
विधानस्य॥मुख्यइतियागादिषुशास्त्रविहितःप्रथमोऽर्थोमुख्यःकल्पःउत्कृष्टत्वात्मु
खमिवशाखादिभ्योयःमुख्यःयथाव्रीहिभिर्यजेतेत्यादिएकं।अन्वितिततोऽधमोहीनोगौ
णोऽनुकल्पःहीनार्थेनानुनाप्रादिसमासः।यथाव्रीह्यभावेनीवारैर्यजेतेतिहीनइतिकर्मप्र
वचनीयत्वेकर्मप्रवचनीयानांप्रतिषेधोवक्तव्योऽनभिधानादितिनिषेधात्कथंसमासइ
तिनदेश्यंअनभिधानबीजोहिनिषेधइहत्वनभिधानमस्त्येवयथा।अभिरक्ततमतिरक्त

तिरित्यादिएकं। समितिसंस्कारो वटुकरणं तत्पूर्वकं श्रुतेर्वेदस्य ग्रहणमुपाकरणं उपाक्रिय
तेऽधिकः संपाद्यतेऽनेन करणे ल्युट् उपाधिके ऽउपाकर्म ऽउपसंग्रहणं चात्र एकं। सेतिपादग्रह
णं पादयोः स्पर्शः अभिमुखीकृत्य संबोध्य वादनाशिषो याचनं मह्यमाशिषो देहीति यया
क्रियतेऽभिवदेर्ण्यन्तात्स्त्रीत्वाविवक्षायां ल्युट् अभिवादनं। द्वे नामोच्चारणपूर्वकस्य नम
स्कारस्य। भी इति भिक्षते नित्यं सनाशंसभिक्ष उः भिक्षुः। परितो व्रजति परौ व्रजेः षश्च पादां
तः दृषिग्रहणाद्दीर्घत्वं परिव्राट्। कर्मन्दिना प्रोक्तं भिक्षुसूत्रमधीते कर्मन्दकृशाश्वादिनिः
कर्मन्दी। पराशरस्यापत्यं गर्गादित्वाद्यञ् पाराशर्यः तेन प्रोक्तं भिक्षुसूत्रमधीते वा पारा
शर्यशिलालिभ्यामिति णिनिः पाराशरी। माकर्तुं काम्यकर्म निरोद्धुं कर्तुं शीलमस्य म
स्करमस्करिणौ वेणुपरिव्राजकयोरिति सुट् ह्रस्वश्च भावः उपपदस्य कृत्त्वं मस्करी।

पंचचतुर्थाश्रमिणः। नेतितनयोग्योगात्तपः सहस्राभ्यां विनीनी अण्चेति विन्यस्तोतपस्वीताप
सः। पारमस्यास्तीतिपारिब्रह्मज्ञानंतत्कांक्षतिनाकांक्षेणि निः परंब्रह्मज्ञानमवश्यंकांक्षतीति णि
निः पृषोदरादित्वाद्ह्रस्वेदीर्घः पारिकांक्षी। त्रीणि तपस्विनः। वेतिव्रतवशाद्वाचंयच्छत्युपरतोकरो
तिवाचियमोव्र [illegible]ते खः वाचंयमपुरंदरौचेति निपातितः वाचंयमः। मनुते जानाति मने रुच्चेति
इनुउपधायाउत्वंचमुनिः द्वे मौनव्रतिनः नव्रतिन इत्यन्ये। तेति श्रान्तितपसायः क्लेशः शरी
रशोषादिस्तंयः सहते तस्मिन्सत्यपिनोद्विजते स दांतः द्वे। वेतिवर्णः स्वतिस्तद्योगोवर्ण
ब्रह्मचारिणीति इनिप्रत्ययेव र्णिनः। ब्रह्मचारीबटुकः। द्वे प्रथमाश्रमिणः। ऋषेति ऋषं
तिज्ञानसंसारयोः पारंगच्छतीति ऋषीगनो इगुपधत्वात्किन् ऋषयः। सत्यवचसस्तेच
सप्तविधाः महर्षिर्देवर्षिर्ब्रह्मर्षिपरमर्षयः कांडर्षिश्चश्रुतर्षिश्चक्रमावरा इति रत्नको

षः। विषिर्मञ्जनादिश्च विद्या विदग्धमतयो। विषयः ब्रह्मद्वार इति बालपंडितज्ञानकान् स्त्रियं
त्रपीच। द्वे त्रषेः। स्नेति ब्रह्मचर्यं त्यक्त्वा यो गृहाश्रमं गतः स स्नातकः स्नाताद्वेदसमाप्ता वि
तिकन्तु स्नातकश्च त्रिविधः ब्रह्मचर्याचरणस्य यः शास्त्रबोधितोऽवधिस्तावद्व्रतमुपास्या
प्राप्तवेद एवाश्रमांतरं गतो यः सव्रतस्नातकः। वेदमधीत्य वीगेव तथा करोति यः स विद्या
स्नातकः। पालितसमग्रव्रतः प्राप्तवेदायो द्वितीयाश्रमं गतः स उभयस्नातकः। आप्लवः
स्नानं तत्रव्रती नित्यस्नायी समाप्तवेदाध्ययनो य आश्रमांतरं नगतः स स्नातकः। क्व
चिद्दाप्लुतव्रतीति पाठः प्लवतेर्भावे क्तः द्वे। यइति निर्जितः स्ववशे स्थापित इंद्रियाणां
ग्रामो गणो येस्तेयतमिंद्रियसंयमोऽस्त्येषामिति नित्ययोगे इनिः यती व्रयले इत्रिति
वा इनिः यमेस्तिगितिति कियतिरित्यन्ये। त्रीणि वसिष्ठादेः। यइति व्रतं नियमस्तत्स्

पादनायस्थंडिलेतृणाद्यनाच्छादितभूभागेशेतेसस्थंडिलशायिस्थंडिलशाद्भ्यामुच्यतेव्र
तइतिणिनिःस्थंडिलाच्छयितरिव्रतइत्यण्ह्वे। अथेतिविगतेरजस्तमसीयेषांतेविरजस्तम
सः।द्वयंद्वैतमतिक्रम्यगच्छंतिअन्येभ्योपीतिगमेर्डःद्वयातिगारजस्तमःशून्याःसत्वैकनिष्ठाः
साक्षात्कृतब्रह्माणोजीवन्मुक्तामासादयोविरजस्तमसोद्वयातिगाउच्यंते।द्वे।पेतिपवते
ऽशित्रा विनिङ्व्रःपवित्रः विशेष्यनिघ्नेद्रुदधिगोमयादिसामान्यंपवित्रंस्वभावपवित्रंवाव
च्यते।प्रकर्षेणयतःयमेरकर्मकत्वेकर्तरिक्तःप्रहृष्टंयततइतिवाऽच्य्र। पवतेःक्तप्रत्य
येपूङःश्वेतीड्विकल्पेपूतः।त्रीणिपवित्रस्य।पेतित्रयीवाक्यविपरीतव्यवहाराःसर्वक
र्तृव्यतयालिंगिवंबोधयितुंशीलंयेषांतेतथातेचबौद्धक्षपणकादयःपापंसिन्वंतिद
इतीतिपाषंडाःसचवरंडादौमूर्द्धन्यमध्योनिपातितः।सर्वेषांवर्णाश्रमाणांकिंचित्लिं
दिस्यश्लोका५

रा॰मु॰
२११

गंते पाषंडा इत्येके। सर्वाश्रमिणां लिंगानि भजंते सर्वलिंगिनः इति रुद्रः। द्वे। पेति व्रते ब्र
ह्मचर्यव्रतिनां पलाशकाष्ठकृतो दंडः आषाढी पूर्णिमा प्रयोजनमस्य विशाखाषाढादण्मं
थदंडयोरित्यण् आषाढः। पालाश इति पलाशादिभ्यो वेति विकारार्थेऽण् एकं। वेति व्रते व्र
तनिमित्ते व्रतविषये वा वेणुकृतो दंडो रांभः स्यात् रंभो वेणुस्तत्कृतो दंडो रांभः स च कुशा
दिस्थापनार्थः पालाशवदण्। रंभा कदल्यप्सरसोनी वेणौ वानरांतरे इति मेदिनिः। व्रता
दन्यत्र वैणव एव एकं। अस्त्रीति मंडनं मंडः भावे घञ् कस्य जलस्य मंडः कमंडः तं लातीति कमं
डलुः कस्य शिरसो मंडो भूषा तं लातीति वा कुडिदाहे कुंडति दहति पिपासादिकं पचाद्य
च् कुंडं जानपदादिना ङीष् कुंडी। द्वे कमंडलोः। वेति व्रतिनामासनं वृषी ब्रुवंतः सीदंत्यु
स्यामिति पृषोदरादित्वात् ङुः वर्षत्यासनात् सुखं ददातीति वृषु सेचने इगुपधेति कः गो

राम
२१२

रादित्वात्तडीषिवाहृषीमूर्ङ्न्यांता। गंडूषामंडूषाहृषीतिमूर्ङ्न्यांतेषुलिंगकारिका। वसंन्य
स्यामितिपृषोदरादित्वेदंत्यांतोपि अतसीहसीमांसीतिदंत्यांतेषुवंङगोमी। अजीतिव्रता
र्थिभिरज्यतेगम्यतेप्राप्यतेअनेरजश्चेतीनुवीभावाभावायधातोरजादेशाश्च अजिनं।। च
रितंसेवितंनंतदितिचरेर्भूतेपि हश्यंतइतिमनिनुचर्म। क्षत्यतेछिद्यतेक्तिनुक्तेि जीणिव्र
ह्मचर्यादीनांधार्यत्वेनवोधितायामृगादित्वचः। भैक्ष्यमिति। भिक्ष्यतेयाच्यतेभिक्षासमू
हार्थेभिक्षादिभ्यो ऽण्भैक्ष्यं। स्वेतिसुसुकृतायआहत्या ऽ धीतिः इङःक्तिनिघञ्स्वाध्या
न२ यः। जपनंजपः जपमांसे चत्यधजपोरित्यप्जपः वाहुलका द्वञ्जापइतिरन्वितःते
नघ्नइस्यमंत्रजापंप्रत्यनधिकारादित्याहिसिद्धिः द्रुआहत्यावेदाध्ययनस्य। स्वितिति
सवनंस्नुत्याषुञ्अभिषवेसंज्ञायांसमजेत्यादिनाक्यप्। अभिपूर्वात्सुनोतेर्कदार

पुउपसर्गा दित्या दिनाभत्वेऽभिषवोमूर्द्धन्यमध्यः। ल्युटिसवनं। सेतिस्तुत्यापरामर्शः। त्री
णिषत्तस्नानस्य। सोमलतासंधानस्ययोग्यनाकरणस्य। सेतिसर्वैनसंमानसादिसर्व
पापानामपध्वंसि विद्यातिजलगंडूषनासामारोप्ययोवेदावयवोजप्यतउद्घाषितेनतद्
घंमर्षतिसहतेऽभिभवतिम्टषुसहनेसहंनमभिभवः अतएवाम्टष्टाखिलकरुवइति
माघः। यद्वाम्टष्यतिसहतेशक्नोतिमर्षणः अतिपन्नः। षहषुहशक्यार्थेकर्तरिल्यु
ट् करणेवा अनेनषष्ठीसमासः त्रिषुस्त्रियामघमर्षणीक्रगिति। हेतिपन्नांतयोरमावा
स्यापौर्णमास्योर्यागोदर्शभवत्वात्पौर्णमासीभवत्वाद्दर्शपौर्णमासौदर्शःप्रागुक्तः
पौर्णमास्याः संधिवेलादौपाठ्यद्गणपौर्णमासः। दर्शादिपदसाध्योयागःकार्यकार
णभेदोपचाराद्दर्शादिपदवाच्यः। पृथग्भिन्नोनतुपर्यायः। पन्नांतेऽग्निहोत्रिणांप्रति

मार्संसंपाद्ययोः प्रयाजादीनांब्रह्मतिर्य ग्नृयोः क्रमेणैकैकं। शेतिउपायांतरनिरपेक्षेणश
रीरेणैवयत्साध्यं नित्यंयावज्जीवमवश्यंकार्य्यंसत्यास्तेयाहिंसादिकंयत् कर्मतद्यमः य
मः समुपनिविष्ठुवेत्यपष्। अहिंसासत्यववनंब्रह्मचर्यमकल्कता। अस्तेयमितिपंचैतेय
माश्चैवव्रतानिचेतिमनुः। एकं। नीतियत्कर्म नित्यंकामिकर्त्तव्यंतनुयावज्जीवंआगंतु
भिः कादाचित्कैः कामनयासमयविशेषादिभिः सहकारिभिः साध्यमुपवासादितन्नि
यमउच्यतेपूर्ववदत्र। व्रतंकृतंकाम्यंदद्यात्यकरणेतुनप्रत्य वायः इहत्वक्रियमाणे
प्रत्यवायोऽपियथागृहिणामृतुकालेऽपर्वकालेवरत्यादिवर्जनमितिपूर्वनियमाद
स्यभेदः। उपेतिदन्तिणोकरेश्रोहूनेवहिछ्नतेसतिवामस्कंधार्पितंयज्ञसूत्रमुपवीतमु
च्यतेयज्ञविधिष्टतंसूत्रंयज्ञसूत्रंशाकपार्थिवादिः उपाधिक्येऽधिकंवेतिशोभतेवीगु

तिप्रजनकोत्यादिषुकर्तरिक्तः ऽउपवीतं।प्रेतिआद्यादावन्यस्मिन्वामेकरेऽधोहृतेसतित
द्देवप्राचीनंप्रदक्षिणमावेतिवीधातोःपूर्ववत्क्तःप्राचीनावीतं।नीतिकरद्वयेवहिष्का
तेऽनुभावेनकंठाल्लंवितंनत्निकंगदधोभावेनवीतंगमनमस्यनिवीतंनिरितिप्रकृते
राधोभावविन्यासइतिमेदिनिः। अंग्वितिअंगुलीनामग्रेमूर्ध्निदैवंदैवसंबंधिती
र्थंतेषांतेषांसंनिधिःतेभ्योजलेकिंचिज्जलादिकंदेयंदैवेनैवतीर्थेनदेयमितिस्मृ
तेः।स्वेतिस्वल्पांगुल्योःकनिष्ठानामिकयोर्मूलेऽधोभागेकःप्रजापतिर्देवताऽस्य
तस्येदमित्यणएरश्चांतादेशःहस्वायादेशेकार्यंतीर्थं।मेतिअंगुष्ठतर्जन्योर्मध्येपि
त्र्यणामिदंपैत्रंतस्येदमित्यण।अंगुलिरत्रसामीप्यात्प्रदेशिन्येवगृह्यते।मूलइ
तिहिअवधारणेऽगुष्ठस्यमूलएवब्राह्मंतीर्थमित्यन्वयःपूर्ववदणिटिलोपेब्रा

स्तं। स्येति ब्रह्मणो भवनं तद्रूप्यं भुवो भाव इति क्यप् ब्रह्मभूयं ब्रह्मत्वं। योजनं युक्तनत्स हि
तः सयुक्तद्भावः सायुज्यं ततः समाप्याः वोपसर्जनस्येति सभावः ब्रह्मसंयुनक्ति आत्म
नासं वध्नाति सत्सूद्विषेति क्विप् संयुक्तद्भावो वा सायुज्यं। देवेति तदद्ब्रह्म भूया दिवत्
विरूपमित्यर्थः। कृच्छ्रमिति सांतपनचांद्रायणप्राजापत्यादिकं प्रायश्चित्तं कृच्छ्रं कृच्छ्
परवान्यं कृच्छ्रयति तत्करोतीति णिजंतादच् यथा गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशो
दकं। एकरात्रोपवासश्च कृच्छ्रं सांतपनं स्मृतं। एवमन्यत्रापि। सामिति सम्यङ्न्यासः
क्षपणमात्यंतिकस्त्यागः सन्न्यासः तदुक्तेऽनशनेऽभोजने प्रायो वर्त्तते सचादंतः प्र
पूर्वादिणएरवश्रयते: अपूर्वो ह्यन्नप्रायः पुमा। नित्युक्तेरदंतः सांतत्वे प्राया इति स्मा
त् प्रायोपवेशनमतिर्न्नृपतिर्बभूवेति रघुः। अथेति प्रमादादिना कारणांतरेण वा

वीरः पूर्वेक्तोग्निस्तं हतवान् क्षिप्रवीरहाश्वरवीरविक्रांतो चुरादिस्ततोण्यंताद्धेतुमणिविवीरयति विक्रांतं करोति २

यस्यामिहोत्रिणोग्निर्नष्टो निर्वीराणः स्यात् सः वीरोग्निस्तं हतवान् क्षिप्रवीरहोच्य
ते वीरयति प्रभाववर्णनं करोति पचाद्यचि वीरः पूर्वोक्तोग्निस्तं हतवान् क्षिप्रवीरहा॥
कुहेति लोभादविहितपररवग्रहणाशावशाद्या मिथ्याऽतत्वेर्ईर्यापथस्याचारभेद
स्य कल्पना संपादना सा कुहना शब्दवाच्या कुह विस्मायने चुरादावदंतस्ततो युच् वि
स्मायनं घञर्थे कः तं नयति प्रापयति रणीजोऽन्येभ्योपिडः। दंभमात्र क्षुतध्यानमौ
नादिः कुहनाः अर्थलिप्सया मिथ्याधर्माश्रयणमित्यन्ये। कुहना ग्राम जालं

दि॰२

स्यांतिरत्नकोषः। व्रेति अष्टचत्वारिंशत् संस्कारहीनः षोडशवर्षादूर्ध्वमकृतव्रत
वंधो भ्रष्टगायत्रीकोदानाद्यकर्ता द्विजो व्रात्यः व्रातो व्याधादिः सदृवशारवादिभ्यो
यः अर्हत्यर्थे दंडादित्वाद्यायः। अस्वेति जतग्रहणपूर्वकं गुरोर्वेदाभ्यसनं स्वाध्या

यस्तच्छूयः। निर्गता आकृतिरध्ययनचेष्टाऽस्मादिति निराकृतिः द्वे। ध्वेति लिंगेन ज
टादिधारणेन हृत्तिर्जीवनमस्य लिंगवृत्तिः। धर्मस्य ध्वजश्चिह्नं तद्योगादिति धर्मध्व
जी। द्वे भिन्नार्थे जटादिधारकस्य। अवेति आरब्धस्य नियमस्य स्त्रीमरणादिना ध्वस्तत्र
तोऽवकीर्णी कृ हिंसायां भावे क्तेऽवकीर्णं हिंसा तद्योगान्मत्वर्थे इष्टादिभ्यश्चेति वा इनिः
अवकीर्णी द्वे। सुप्त इति यत्र सुप्ते निद्राणेऽस्तुमानकोऽस्तमस्ताचलं गच्छति सोऽभिनि
र्मुक्तः सर्वतोभावेन सायं तेनेन कर्मणा निर्निश्चयेन मुक्तोऽभिनिर्मुक्तः। यत्र वसुप्ते
ऽर्कउदेत्युदयाद्रिमौलिं याति सोऽभ्युदितः अभ्युदितमभ्युदयः सूर्य्यस्य तद्योगाद् शी
आद्यवभुक्ता ब्राह्मणाइत्यादिवत् क्रमेण द्वे नाम्नी। येति ज्येष्ठेऽनूढेऽकृतविवाहे
सति अनुजः कनिष्ठो दारपरिग्रहाद्धेतोः परिवेत्तोच्यते हेतौ विभाषायामिण इति पं

रा.सु.
२१६

चमीपरिवेर्नेनेक्रमविधित्यागेनजायां विंदति विक्लृलाभे त्वच् एकं। येतिनस्यपरिवेत्तु।
ज्यायान्ज्येष्ठः परिवर्जनं विंदति लभते संज्ञायां क्तिच् सकारवांश्च परिविन्निरिति ह
न्तः। एकं। वीति विशिष्टोऽग्निसाक्षिकोवाहो वहनं स्वीकारो विवाहः। उपपूर्वोयमि
त्विकारे नियमवदपूर्वप्यमः। तथा समुच्चये। परिणयनं परिणयः एरच्। पूर्ववदु
द्वाहः। पाणेः पीडनमवगाहनं ग्रहणं कृद्योगाच्चेति समासः पाणिपीडनं। दारक
र्मकरग्रहो वात्र। षट् विवाहस्य। व्येतिव्यवायः। ग्राम्याणां ग्रामभवानां जनानां
धर्मो ग्राम्यधर्मः। रतं रमणं। धुवनं चालनं निश्चितं हस्तपादादिचालनं निधुव
नं तद्योगादच् निधुवनं। रति सुरत मैथुन धर्षित संप्रयोगाद्योप्यत्र। चत्वारि
रतेः। त्रीणि। धर्मः प्रागुक्तः। यथाविधिनिजस्त्रीसेवनं कामः। अर्थो धनं एतैः पुरु

रम
२१६

षस्यकर्तव्यमनयोपदिष्टैस्त्रिभिरवयवैरुपलक्षितो वर्गस्त्रिवर्गः स्यात्त्रयाणां वर्गः स
मूहः त्रिवर्गः। त्रिगुणो ऽपि न वाध्यते ऽस्य त्रिगुणाः परस्परमित्यभिधानात्॥ एकं। चेति मोक्ष
सहितैर्धर्मकामार्थैरुपलक्षितो वर्गश्चतुर्णां वर्गश्चतुर्वर्गः। एकं। सेति वलं शक्तिः
समानवलैरन्यूनाधिकशक्तिभिस्तैर्धर्मादिभिः चत्वारि भद्राणि श्रेष्ठानि समानाक्रान्ता
नि चतुर्भद्रं पात्रादित्वात् क्लीवत्वं भद्रे ग्रकृते वाप्यवकृष्टसाधुनोरिति विश्वः। समान
स्येति योगविभागात् समानस्य सभावे सवलैरिति। एकं। जेति वरस्य जामातुर्ये स्निग्धा
स्तत् पन्त्या वयस्यास्ते जनीं वधूं वहन्तीति संज्ञायां जन्या इति यदन्ते न निपातः। ज
न्यो वरवध्वोर्ज्ञाति प्रियभृत्ययोर्हिते ऽपि चेति विश्वः॥   ॥ इति ब्रह्मवर्गविवरणं समाप्तं॥
॥   ॥ मूर्द्धेति मूर्द्धन्यभिषिक्तो मूर्द्धाभिषिक्तः राज्यारोपणसमये प्रथमतः क्षत्रि

